प्यवश्यं हि निवृत्तिरेव फलं॥ वृत्तिस्तु स्वकारणादेवेति बोध्यं एवं मंगलस्य विघ्नध्वंसं प्रति जनकत्वे स्वतः सिद्धविघ्नविरहवतेति विघ्नात्यन्ताभाववता॥ ननु निष्फले प्रवृत्तिरेव कथमत आह विघ्नशंकयेति॥ संशयनिश्चयसाधारणेन विघ्नज्ञानमेव प्रवर्त्तकमिति भावः तदाचरणान्मंगलाचरणात्॥ ननु विघ्नसंशये मंगलाचरणमेवासिद्धमित्यत आह तथैवेति॥ विषयितासंबंधेन मंगलस्येति शेषः ननु निर्विघ्नपुरुषानुष्ठितमंगलस्थलेऽन्वयव्यभिचारेण विघ्नध्वंसं प्रति मंगलस्य कारणता बाधिता. तथा च बाधितार्थबोधकत्वाद्वेदस्याप्रामाण्यमितीमां श्रुतेः कारणताबोधकत्वमंगीकुर्वतां मते शंकां निरस्यति नचेति। तस्य निर्विघ्नपुरुषानुष्ठितमंगलस्य तद्बोधकेति मंगलविघ्नध्वंसयोः कार्यकारणभं° वबोधकेत्यर्थः सति विघ्न इति तथा चोपदर्शितस्थले प्रतियोगिरूपकारणाभावेन विघ्नध्वंसरूपका र्यानुदयोपपत्तौ कारणतायाः अबाधितत्वेन न तत्कारणताबोधकवेदाप्रामाण्यमिति भावः अत एवेति

।दि०के० नाशंप्रतिप्रतियोगिनःकारणत्वादेव॥ ॥तद्बोधकेति।प्रायश्चित्तस्यपापनाशकत्वबोधकवेदप्रामाण्ये
मित्यर्थः।ननुमंगलंनविघ्नध्वंसेकारणंविनायकस्तवपाठादिजन्यविघ्नध्वंसेव्यभिचारात्.विनाय
कस्तवस्यमंगलत्वेपितदनुकूलकण्ठाभिघातरूपस्यमंगलत्वाभावात्।नचपाठकृतासंबंधेनविनाय
कस्तवएवविघ्ननाशकःसचमंगलमेवेतिनव्यभिचारइतिवाच्यं।सर्वेविघ्नाःशमंयान्तीत्यादिना
तत्पाठस्यापिविघ्ननाशकत्वबोधनात्।प्रायश्चित्तजन्यविघ्नध्वंसेव्यभिचारश्चेत्यतआहमंगलंचेति।
दी०त्र स्तवपाठादिनाप्रायश्चित्तैंसंग्रहः।तथाचमंगलस्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेनमंगलवि
शिष्टविघ्नध्वंसत्वंविजातीयविघ्नध्वंसत्वंवाकार्यतावच्छेदकं।एवंविनायकस्तवपाठादेरुपदर्शितसं
बंधेनविनायकस्तवपाठादिविशिष्टविघ्नध्वंसत्वंविजातीयविघ्नध्वंसत्वंवाकार्यतावच्छेदकमिति
नव्यभिचारइतिभावः।ननुविघ्नध्वंसएवयदिमंगलस्यफलंतदासमाप्तिकामस्यमंगलेप्रवृत्तिर्न्नः ॥७॥

स्यादतः समाप्तिसाधनविघ्नध्वंससाधनत्वान्मंगले प्रवृत्तिर्व्याख्या॥ तच्च न संभवति॥ स्वतः सिद्धविघ्नवि
रहस्थले व्यभिचारेण विघ्नध्वंसस्य समाप्तिसाधनत्वाभावादिसाशंकां निरस्यति। क्वचिच्चेति। प्रति
बंधकेति। संसर्गाभावस्य संसर्गाभावत्वेन संसर्गाभावस्य। तथा च विघ्नध्वंसस्य संसर्गाभावत्वेन
हेतुत्वात्पूर्वोक्तव्यभिचार इति भावः। अत्र वतत्वच्छिन्नाभावत्वेन हेतुता न तु विघ्नाभावकूटत्वेन वि
घ्नप्रागभावादीनामेकत्रासंभवेन समाप्तिर्न स्यादिति बोध्यं। यत्र मंगलं विनापि समाप्तिः तत्र विघ्न
ध्वंसाभाववति समाप्तेर्दर्शनात् व्यतिरेकव्यभिचारमाशंक्य निषेधयति॥ इत्थं चेति॥ दुरितध्वंसकत्व
नैतज्जनकीभूतमंगलकल्पने च गौरवादाह स्वतः सिद्धेति॥ यत्र च मंगलसत्वेन समाप्तिस्तत्र मंगलेन वि
घ्नध्वंसो भवत्येव समाप्त्यभावस्तु विघ्नभूयस्त्वात् तन्मंगलानन्तरोत्पन्न विघ्नाद्वेत्यवधेयं॥ अथ समाप्तिः
विघ्नध्वंसयोः आकाशात्मनिष्ठयोः कथं कार्यकारणभाव इति चेदुच्यते। स्वप्रतियोगिप्रयोजकत्व

दि०क० त्वसंबंधेन चरमवर्णध्वंसरूपसमाप्तिं प्रति विशेषणतासंबन्धेन विघ्नसंसर्गाभावत्वेन हेतुत्वमिति॥ व
स्तुतस्तु आहुरित्यनेन सूचितामन्यथासिद्धिं प्रकटयति क्वचिदिति। विघ्नात्यन्ताभाव एवेत्येवकारेण वि
घ्नध्वंसस्य तद्वारकमंगलस्य च व्यवच्छेदः समाप्तिसाधनं।समाव्यवहितपूर्व्ववर्त्तितया निष्पन्नः तथा चैते
नैव मंगलस्थलीयसमाप्तिनिर्वाहे मंगलस्य तज्जन्यविघ्नध्वंसस्य चान्यथासिद्धिः ध्वंसप्रागभावयोरत्यं
ताभावेन विरोधेनाभावात् ध्वंसस्थलेप्यत्यन्ताभावसत्वादिति भावः न त्वेवमन्योन्याभावभिन्नाभावत्वे
नैव लाघवात्प्रत्युतास्वत आह प्रतिबन्धकसंसर्गेति। प्रतिबन्धकसत्वेपि संबन्धान्तरावच्छिन्नप्रति
योगिताकाभावस्य सत्वात्कार्य्योपत्तिवारणाय तत्तत्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वेनैव हेतु
त्वस्य वाच्यत्वेन ध्वंसस्य न हेतुतानन्यप[illegible]संसर्गावच्छिन्नत्वे मानाभावात्। दुरितं विघ्नध्वंसः सामग्री प्रयुक्तः ॥८॥
स्वतः सिद्धो दुरितकारणाभावः प्रयुक्तः एतेन विघ्नध्वंसस्य तदत्यंताभावस्य वा समाप्तिहेतुता। विचा

नमस्कार्यस्य भगवतः सेव्यत्वोक्तर्विषयीभूतमाहात्म्ये पं २

रस्याप्रकृतनयातन्नु व्यवस्थापनप्रकृतानुपयोगः एवं प्रतिबंधकाभावकूटस्य हेतुत्वे प्रागभावध्वंस
योः युगपदवस्थानासंभवेनैकदाकृत्यप्रसिद्धिः पूर्वोक्तरीत्यानन्तसंसर्गाभावत्वेनप्रतियोगिताक
त्वस्य प्रति[redacted]बन्धकाभावविशेषणत्वेन ध्वंसप्रागभावयोरसंग्रह इति दूषणानि निरस्तानि उ
क्तरीत्या प्रतिबन्धकात्यन्ताभावस्यैव कार्यमात्रे हेतुत्वादिति ॥ अत्र केचित् निर्विघ्नं परिसमाप्यतामिति का
मनया इह विघ्नो मा भूदिति कामनया मंगलमाचरन्तीति निर्विवादं । तन्नाद्या कामनाफलविषयिणी
द्वितीया तूपायविषयिणी न च द्वितीयैव कामनाफलविषयिणी । आद्या कामनानुसविशेषणे हीति न्या
येन विघ्नाभावफलत्वबोधिके इति वर्द्धमानोक्तेन शंक्यं तन्न्यायस्य सति विशेष्यबाधे एव प्रवृत्तेः
न चोपायविषयिणी कामना नहेति वाच्यं पुत्रो जायतां तेन त्वां यज इत्यादौ यागसाधनीभूतपुत्र
विषयिण्या अपि कामनाया दृष्टत्वात् आद्या तु कामना नोपायविषयिणीति स्यात् फलविषयिण्येव नैवं

दि०क० नयविघ्नध्वंसस्मा आय[illegible]मनायाः कथं समाप्तिः फलमिति चेत् अविघ्नध्वंसादौ व्यभिचारेण कामनया वि-
षयत्वे विषये तस्य फले विनिगमकाभावात् न विघ्नाभावस्य फलतावच्छेदकत्वेन कामनाविषयता-
त्वेन च इत्यनियामकसंबन्धस्य प्रतियोगितानवच्छेदकत्वे न न संबन्धावच्छिन्नकारणतायाः प्र-
सिद्धिरिति वाच्यं इत्यनियामकस्यापि प्रतियोगितावच्छेदकत्वेन नमस्कार्यस्य भगवतः नमस्कारि-
सन्तुष्टतां सूचयितुमाह मूले गोपेति। तस्मादिति तच्छब्दः सामान्यतः सकलजनप्रसिद्धत्वसूचनाय। 45
श्रीकृष्णायनम इत्यनेन भगवतः नमस्कारिनूतोऽप्यावधित्वमुक्तं भगवति मानाभावादित्याशंकायां नैया-
यिकाभिमतेश्वरसाधकानुमानं सूचयन्नाह संसारेति संसारस्य महीरुह इति षष्ठीतत्पुरुषः भ्रमं वार
वारयितुं कर्म्मधारयमाह मुक्तावल्यां संसारेति बीजत्वं न समवायिकारणत्वं तदीश्वरे बाधितत्वादाह नि- ॥८॥
मित्तेति॥ नन्वीश्वरनमस्काररूपं मंगलमयुक्तं ईश्वरे मानाभावात् न हि तत्र प्रत्यक्षं प्रमाणं अरूपि

द्रव्यत्वेन वाह्यप्रत्यक्षाविषयत्वात्। नापि मानसं परात्मनः परेण मनसा प्रत्यक्षतावारणायात्मप्रत्यक्षं प्रति परात्मव्यावृत्तविजातीयमनःसंयोगहे न हेतुत्वस्यावश्यकतयाईश्वरे तस्याभावात्। न च द्यावाभूमी जनयन्देव एक इत्यादिश्रुतिप्रमाणं श्रुतीनामीश्वरोच्चरितत्वेनैव प्रामाण्यादीश्वरसंदेहे श्रुतिप्रामाण्यस्यापि संदिग्धत्वादत आहुः। एतेनेति। प्रमाणमनुमानरूपं तथेति। न चात्र किं पक्षतावच्छेदकं न तावत् क्षितित्वं अंकुरादेरपि क्षितित्वेन पृथक् तदुपादानवैयर्थ्यात्। किं च क्षितित्वसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे दृष्टान्ते घटादावंशतः सिद्धसाधनं अवच्छेदकावच्छेदेन तथात्वे परमाणौ बाधः जन्यक्षितित्वस्य पक्षतावच्छेदकत्वे परमते जन्यपदव्यावर्त्तेरप्रसिद्धिः। तन्मतेऽजन्यक्षितेरभावात्. जन्यत्वस्यैव तथात्वसंभवेन पक्षतावच्छेदककोटौ क्षितित्वस्य व्यर्थत्वाच्च। न च तदपि संभवति पक्षतावच्छेदकहेतोरैक्यप्रसंगादिति चेन्न। स्वस्वसंबंधविशेषरूपकार्यत्वस्य पक्षतावच्छे

दि०कं० दकत्वात्। प्रागभावप्रतियोगित्वरूपकार्य्यत्वस्यैव हेतुत्वेन तयोरेकाभावात्। साध्यं नेचेत्स्वोपादान
गोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वं कार्यमात्रं प्रतिकृतेरेवान्वयव्यतिरेकाभ्यां हेतुत्वेन त
ज्जनकज्ञानचिकीर्षयोस्तत्रान्यथासिद्धत्वेन न तत्त्रितयजन्यत्वरूपसाध्यस्य तत्राभावात्। दृष्टान्तपक्ष
साधारणस्य स्वत्वस्याभावेन तद्घटितस्वोपादानगोचरेत्यादिसाध्य ऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽ

4.6

॥१०॥

स्वासमवाय। कृतित्वावच्छेद्योपादानगोचरे कृतिमत्वस्य गौरवेण कार्य्यजनकतानवच्छेदकत्वात्किं
तु विशेष्यतासंवंधावच्छिन्नकृतित्वावच्छिन्नकारणतानिरूपितकार्य्यत्वं तेनादृष्टद्वाराऽस्मदीयकृ
तिजन्यत्वस्य पक्षे सत्वेपि न सिद्धसाधनं यच्च कार्य्यमात्रे कृतित्वेनेवान्वयव्यतिरेकाभ्यां ज्ञानत्वे
नेच्छात्वेन च हेतुत्वं स्वीक्रियते। तादृशज्ञानजन्यत्वमिच्छाजन्यत्वं कृतिजन्यत्वं वा साध्यमस्तु यत्तु क
र्त्तृजन्यमेव साध्यमिति तन्न कार्य्यमात्रे कर्तुर्जनकत्वे मानाभावात्। लाघवात्कृतित्वेनैव तत्र हेतुत्वो
त्वौत्। ननु कार्यविशेष्यतासंवंधावच्छिन्नकृतिनिष्ठजनकतानिरूपितसमवायसंवंधावच्छिन्नजनता
ताशालिप्रागभावप्रतियोगित्वादित्यमानं कलितं। तत्र च ध्वंसे पक्षतावच्छेदकाक्रान्तविशेष्यतासंवंधा
वच्छिन्नजनकतानिरूपितसमवायसंवंधावच्छिन्नजन्यत्वरूपसाध्यस्यतत्राभावात् बाध इति चेन्न॥
सत्वविशिष्टजन्यत्वस्यैव ध्वंसव्यावृत्तस्य पक्षतावच्छेदकत्वोपगमात्। न च हेत्वधिकरणे ध्वंसे उक्त

शा न १

दि०क० साध्याभावेन व्यभिचार इति भावः। स्वत्वविशिष्टत्वस्य हेतौ विशेषणत्वात्। अथैवं रीत्या व्यभिचारवा
रणेऽपि ध्वंसस्य कृतिजन्यत्वे मानाभावेन कार्यमात्रस्य कृतिजन्यत्वप्रवादो व्याहन्यत इति चेन्न। तादृश
प्रवादस्य निर्युक्तिकत्वेनाश्रद्धेयत्वात्। यद्वा जन्यत्वमात्रं ध्वंससाधारणमेव पक्षतावच्छेदकं कृति
जन्यत्वमात्रं साध्यं. एवं हेतावपि सत्त्ववैशिष्ट्यं नोपादेयं प्रयोजनाभावात्। एवं ध्वंसेपीश्वरीयकृति 47
जन्यत्वस्य निराबाधतया कार्यमात्रे कृतिजन्यत्वप्रवादोप्युपपद्यते। न च कृतिजन्यत्वमात्रस्य साध्य
त्वे अदृष्टद्वारा हविरादिगोचरास्मदीयकृतिजन्यत्वमादाय सिद्धसाधनमिति वाच्यं। अदृष्टाद्वारक ए१
त्वेन कृतिजन्यतायाः विशेषणीयत्वादिति दिक्। एतादृशानुमितौ लाघवसहकारेँ ज्ञानेच्छाकृतिषु नि
त्यत्वमेकत्वं च भासत इति नित्यैकतासिद्धिः। अथेश्वरज्ञानादेः कीदृशमेकत्वमनुमित्या विषयीक्रि ॥२२॥
यते। न तावत्संख्यारूपगुणो गुणानङ्गीकारात्। न च नित्यज्ञानवन्निष्ठभेदप्रतियोगितानवच्छेदक

दि०के० कत्वरूपमेकत्वं तद्विषयेपीति वाच्यं एतादृशैकत्वस्य नित्यज्ञानानुमितेः प्रागनुपस्थितत्वेन तादृशानु
मितौ भानासंभवादिति चेन्न॥ अत्र केचित् सामानाधिकरण्यसंबंधेनैवेश्वरज्ञानादौ आश्रयग
तमेकत्वमनुमितौ भासते यद्वा द्वित्वासमानाधिकरणरूपानामेकत्वं तद्विषयः न च जीवेश्वरग
तद्वित्वसामानाधिकरण्यस्य तत्र सत्त्वाद्बाध इति वाच्यं आत्मानात्मवृत्तिभिन्नत्वेनापि विशे
षणीयत्वादित्याहुः दुःखवदवृत्तित्वेन द्वित्वस्य विशेषणीयत्वान् न चैवमपि घटेश्वरगतद्वित्व
समानाधिकरण्यस्य तत्र सत्त्वाद्बाध इति वाच्यं॥ आत्मानात्मवृत्तिभिन्नत्वेनापि विशेषणीय
त्वादित्याहुः तन्न ईश्वरे ज्ञानद्वयांगीकारेप्येतादृशैकत्वभाननिर्वाहेणोद्देश्यासिद्धेः वस्तुतस्तु स्वा
धिकरणावृत्तिस्वभिन्नज्ञानकत्वमेवैकत्वं। एवमेवेश्वरेच्छाकृत्योरपि द्रष्टव्यं एवं च तादृशज्ञानादि ॥२॥
सिद्धौ न तद्गुणत्वेन हेतुनाऽव्यवृत्तित्वे साधनीये द्रव्यान्तरस्य बाधादीश्वरसिद्धिरिति द्रष्टव्यं। अत्रेयो

ला५

दि०क० जकत्वादिति। अनुकूलतर्काभावादिति भावः। इदमुपलक्षणं शरीराजन्यत्वेन हेतौ शरीररूपवि
शेषणस्यासिद्धिवारकस्यापि व्यभिचारवारकत्वेन व्यर्थतया तद्विशेषणावच्छेदेन व्याप्तिग्रहा
संभवेन व्याप्यत्वासिद्धिश्चेत्यपि द्रष्टव्यं। ननु व्यर्थविशेषणस्याधिकोक्त्या निग्रहस्थानत्वेन न
ज्ञानस्य व्याप्तिज्ञानप्रतिबंधकत्वे मानाभावादिति वाच्यं। तथापि गुरुधर्मस्यानवच्छेदकतया सं
ध्यसंबंधितावच्छेदकरूपव्याप्तेस्तत्राभावेन व्याप्यत्वासिद्धिर्दुर्वारेति। तदुक्तमाचार्यैरेकाम सि
द्धिं परिहरतो द्वितीयापत्तिरिति। कर्तृत्वेन कार्यत्वेन कार्यकारणावेति। नन्वन्वयव्यतिरेकाभ्यां
घटत्वाद्यवच्छिन्नं प्रति कुलालादित्वेनैव हेतुता तादृशकार्यकारणभावे मानाभावादिति वाच्यं
घटत्वपटत्वादिभेदेनानन्तकार्यकारणभावकल्पनापेक्षया कार्यत्वावच्छिन्नं प्रति कृतित्वेन हेतु ॥१२॥
त्वकल्पनस्यैवोचितत्वात्। यद्विशेषयोरिति न्यायेन कार्यत्वकृतित्वाभ्यां सामान्यकार्यकारण॥

48

ला३ दि३ भावए ४

भावस्यावश्यकत्वाच्च। नच तादृशान्वयो प्रमाणक इति वाच्यं. कार्य्यत्वावच्छिन्नाभावेन तत्त्वेस्य भावकूटस्य प्रयोजकत्वकल्पने ~~[illegible]दिनिवेशे किन्तु~~ गौरवात्। कृतितांभावस्यैकस्य प्रयोजकत्वकल्पने लाघवादिति केचित। मास्तु कार्य्यत्वं हेतोः कार्य्यतावच्छेदकं तथापि घटत्वावच्छिन्नं हेतोः कारणतया सर्गाद्यकालीनघटादिकं पक्षीकृत्य घटत्वादिहेतुना सकर्तृकत्वसाधने जीवानां बाधादीश्वरसिद्धिरित्याहुः दीधितिकृतस्तु। कार्य्यत्वावच्छिन्नप्रतिकृतेर्हेतुत्वाभावेपि घटत्वाद्यवच्छिन्नं प्रतिकृतेर्हेतुतया खंडपटोत्पत्तेः पूर्वं कृतेरावश्यकतया तदाश्रयत्वेनेश्वरसिद्धिः। नन्वेवं रीत्या घटादिकुलालचेष्टयोरन्वयव्यतिरेकाभ्यां कार्य्यत्वाद्यवच्छिन्नं प्रति चेष्टात्वादिना हेतुत्वादंकुराद्युत्पत्तेः पूर्वं चेष्टानुरोधेनेश्वरस्य नित्यशरीरमपि सिद्ध्येदिति चेन्न। न तादृशान्वयव्यतिरेकाभ्यां कार्य्यत्वे कार्य्यत्वावच्छिन्नं प्रति क्रियात्वेनैव हेतुत्वात्. तत्र चेष्टात्वेन हेतुत्वे मानाभावात्. आचार्य्यानुयायिन

दि०क० स्तु। अस्तु नन्वचेष्टात्वेन हेतुत्वं। अस्तु च तदनुरोधेनेश्वरस्य नित्यशरीरं तथापीश्वरस्यातिरिक्तशरीरा
सिद्धिः परमाणूनामेव तच्छरीरत्वोपगमात्। एवं चेश्वरकृतिजन्यचेष्टावद्भिः परमाणुरूपशरीरैरेव
न कार्य्याणामुपपत्तिः परमाणुक्रियायां चेष्टात्वरूपत्वे आत्मांगीकारात् शरीरस्य लक्षणे अन्त्या
वयवित्वस्यानिवेशाच्च न परमाणूनां शरीरानुपपत्तिः ननु नानापरमाणूनां शरीरत्वकल्पने गौर
वात् लाघवेन तस्यातिरिक्तशरीरसिद्धिरिति वाच्यं। तच्छरीरस्य महत्त्वे मग्नस्य तस्य पाषाणादौ प्र
वेशासंभवेन पाषाणान्तर्वर्त्तिभेदकशरीरोत्पादकत्वानुपपत्तेः अणुत्वे च दूरस्थकार्य्योत्पादकः
त्वानुपपत्तेरित्याकुरिसलं पल्लवैरिति यत्तु पूर्वोक्तस्थापनानुमाने शरीरजन्यत्वमुपाधिः तस्य घ
टादौ साध्याव्यापकत्वात् अंकुरादौ साधनाव्यापकत्वाच्च न चांकुरादौ सकर्त्तृकत्वरूपसाध्यसंदे ॥१३॥
हे नोपाधेः साध्यव्यापकत्वशंसया नोपाधित्वनिश्चय इति वाच्यं। तथापि संदिग्धोपाधित्वस्य दुर्वार

तस्यप्रतिबंधकत्वेयत्पक्षेहेतुनिश्चयेपिसाध्यसंदेहोनतंयानुमितिस्तस्याःविलयस्यादितिभावः१

नोपाधेःसाध्यव्यापकत्व४

त्वात्। न च तादृशोपाधिसंदेहाद्धेतौ व्यभिचसंदेहः पक्षीयव्यभिचारसंदेह एव। स न च प्रतिबंधक इतिवाच्यं। पक्षेतत्समये व्यभिचारस्यापि प्रतिबंधकत्वात्। अत एवानुकूलतर्कविरहदशायां पक्षेतरत्वं संदिग्धोपाधिरित्यभिधानं ग्रंथकृतां संगच्छत इति तत्त्व। कार्य्यत्वेन कृतित्वेन कार्य्यकार्य्यकारणाभावरूपस्यानुकूलतर्कस्य सत्वेन कार्य्यत्वरूपहेतोः साध्यव्याप्यत्वनिश्चयेन साध्यव्याप्याव्यापकत्वेनिश्चयादिति। एवमुक्तानुमानेनेश्वरसिद्धौ तद्रचितत्वेन वेदस्य प्रामाण्यनिश्चयाद्वेदोपीश्वरे प्रमाणमित्याह। द्यावाभूमी इति इत्यादयः इत्यादिना ईश्वरं उपासीनयः सर्वज्ञः ससर्ववि[illegible]सो कामयते त्यादीनां परिग्रहः। कार्य्यपक्षकानुमानं चोपलक्षणं सर्ग्गाद्यकालीनद्व्यणुकप्रयोजकं कर्म्मप्रयत्नजन्यं कर्म्मत्वात् गुरुत्ववतां पतनाभावः पतनप्रतिबंधकप्रयत्नप्रयुक्तः धृतित्वात्। ब्रह्माण्डनाशः प्रयत्नजन्यः नाशत्वात्। घटादिव्यवहारः स्वतंत्रपुरुषप्रयोज्यः व्यवहारत्वात्। आधुनिकल्पितलिप्यादिवत्। वेदज इ

कौ १   स्वतंत्रानमयंतपः४ व्यवहार१

दि०कृ० न्यप्रमावत्त्वरूपयथार्थवाक्यार्थज्ञानजन्यशाब्दप्रमात्वात् वेदः असंसारिपुरुषप्रणीतः वेदत्वात् वेदः पौ
रुषेयः वाक्यत्वात् द्व्यणुकपरिमाणजनिका संख्या अपेक्षाबुद्धिजन्या एकत्वान्यसंख्यात्वादित्यनुमानान्त
राण्यपि साक्षात्परंपरया वा ईश्वरसाधकानि बोद्धव्यानि ननु कार्यायोजनधृत्यादेः पदा प्रत्यय
तः श्रुतेः वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्यय इति आयोजनं कर्म पद्यते गम्यते ऽनेनेति पदं
व्यवहार इति संक्षेपः मूले शिष्यावधानाय प्रतिजानीते द्र्यं गुण इति। निरूप्यते इति शेषः संयोगापेक्ष
या कर्मणोऽतिरिक्तत्वं नास्तीति भूषणमतं निराकर्तुं तथेत्युक्तं यथा गुणः पृथक् तथा कर्मापीत्यर्थः 50
अभावोऽधिकरणात्मक एवेति प्राभाकरमतं दूषयितुं पुनस्तथेत्युक्तं युक्तिश्चाग्रे वक्ष्यते यद्यपि विभा
गवाक्यस्य न्यूनाधिकसंख्याव्यवच्छेदकतयैव सप्तसंख्या लब्धा तथापि सप्तग्रहणं ग्रहणं स्पष्टार्थं ॥१४॥
नत्वन्ये पदार्थाः सप्तमस्त्वभाव इति निरूपितं तथैवात्र कुतो न निरूपितमित्याशंक्याह मुक्तावल्यां स
कुतो नोक्तास्तत्राह। कीर्तिता इति। तथा चैतेऽन्ये पदार्थाः न सन्त्येव कणादप्रभृति पदार्थास्त ४
भिरनुक्तत्वादिति भावः नव्यतरेषु ग्रंथेषु षड्भावपदार्थाः १

एतेचेति ४ भाकोः १ अर्थसूत्रं १

त्तमस्येति अत्र समवायैकार्थसमवायान्यतरसंबन्धेन सत्तावत्त्वं भाववत्त्वं तद्भाव इति प्राप्तं तेन प्राप्तत्वेन पृथगुपन्यास इति भावत्वेनोपन्यास इत्यर्थः तेषामिति शेषनन्वन्येपदार्थाः कथं न संतीन्यायग्रंथे षोडशपदार्थनिरूपणादित्याशंकानैयायिकानामपि तेसप्तपदार्था इत्यविरुद्धं षोडशपदार्थानां सप्तपदार्थेष्वेवान्तर्भावादित्याह। उक्तार्थे भाष्यसंमतिमाह। प्रतिपादितमिति एवमेवेति। द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्था इति षोडशपदार्थानामत्रैवान्तर्भावादिति प्रतिपादितमित्यर्थः कथमन्तर्भाव इति चेत्। इत्थं प्रमाणस्येन्द्रियादेर्द्रव्ये व्याप्तिज्ञानादेर्गुणे प्रमेयस्यात्मशरीरेन्द्रियस्वरूपस्य द्रव्ये अर्थस्य गंधरूपरसस्पर्शशब्दस्वरूपगुणे बुद्धेर्गुणे मनसो द्रव्ये प्रवृत्तेर्गुणे दोषाणामिच्छाद्वेषमिथ्याज्ञानस्वरूपाणां रागद्वेषमोहपदप्रतिपाद्यानां गुणे प्रेत्यभावो जननमिति व्युत्पत्त्या मरणोत्तरजन्मत्वं प्रेत्यभावपदप्रवृत्तिनिमित्तं चरमप्राणसंयोगध्वंसो मरणं आद्य

शरीर १

दि॰कौ॰

शरीरप्राणसंयोगो जन्म तथा च मरणान्तरतादृशसंयोगरूपस्य नस्य गुण। सुखदुःखसंवेदनरूपमुख्य
फलस्य गुणो गौणमुख्यसाधारणजन्ममात्रस्वरूपस्यापि रव्यादिषु पीडालक्षणस्य दुःखस्य गुणान्तर्भा
वः अपवर्गस्तु आत्यन्तिकी दुःखनिवृत्तिः दुःखानि शरीरं षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं
चेत्येकविंशतिः तत्र दुःखत्वं जातिशून्ये शरीरादौ दुःखसंबंधितया गौणं दुःखत्वं स्वर्गादिसुखस्या
पि तन्नाशज्ञाने न दुःखसंबन्धित्वमव्याहतमेवं [illegible] न चैकविंशति दुःखान्तर्गतयोः मनःश्रवणयोर्नि
त्यत्वोत्कर्षं नाश इति वाच्यं यद्रूपविशिष्टस्य ज्ञानद्वा दुःखहेतुतया दुःखत्वं तद्रूपकर्णशष्कुल्या नाशेन वि
शिष्टश्रवणेन्द्रियरूपं नाशात्। एवमात्ममनःसंयोगरूपव्यापारविशिष्टस्यैव मनसो ज्ञानद्वा दुःखज
नकत्वेन दुःखस्वरूपतया व्यापारनाशेन तद्विशिष्टमनोरूपदुः नाशसंभवादिति दुःखनिवृत्तावात्ये
न्तिकत्वं च स्वसमानाधिकरणदुःखासमानकालीनत्वं न चैतादृशदुःखध्वंसस्य मुक्तित्वे कथं तत्त्वज्ञा ॥१५॥

51

त४ दुःख३ श्रवणस्या४ रा४ ख२ रा२

दुःखध्वंस।

न्साध्यता तस्येति चेदिदं तत्त्वज्ञाने न मिथ्याज्ञानं वासनानाशे च दोषजन्यवासनाविशिंरागादेरभा
वः विशेषणाभावे विशिष्टाभावात्. तादृशरागरूपहेत्वभावे च प्रवृत्तेर्धर्माधर्मरूपाया अभावोनु
त्पत्तिः तदनुप्राप्ते प्रारब्धकर्माधीने देहान्यदेहसंबंधरूपजन्माभावः भोगतत्त्वज्ञानाभ्यां प्रार
ब्धतद्भिन्नकर्मनिवृत्तिरिति जन्माभावाद्दुःखानुत्पादः तथा च स्वसमानाधिकरणदुःखासमानौंनर्कं
लीनस्वरूपविशेषणांशे तत्त्वज्ञानस्य प्रयोजकत्वान्मुक्तेस्तत्त्वज्ञानसाध्यत्वं तथा च सूत्रे दुःखजन्मप्र
वृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति। अस्यार्थः पठितेषु जन्मादिषु
मध्ये उत्तरोत्तराणामपाये तदनन्तराभावात्। अव्यवहितपूर्वाभावात्. तथा च तत्त्वज्ञानेन मिथ्याः
ज्ञानस्य नाशः तेन दोषाणां नाशः तेन प्रवृत्तेरनुत्पादः तेन जन्मानुत्पादः तेन दुःखानुत्पादः इति
पूर्वोक्त एवार्थः पर्यवसितः। एकविंशतिदुःखनाशस्तु स्वकारणसाध्यो न तत्र तत्त्वज्ञानस्य प्रयोजकत्वे

नर

१ दि०कृ० निवदन्ति। नव्यास्तु योग्यविभुविशेषगुणनाशं प्रतिस्वोत्तरवर्त्तिगुणानां कारणत्वात् स्वोत्तरोत्पन्नगु
णेनैव दुःखध्वंसरूपमोक्षसंभवेन न तत्त्वज्ञानापेक्षेति दुःखपदं दुःखसाधनं दुरितपरतया व्याख्ये
यं दुरितस्य च योग्यगुणत्वाभावात् स्वोतरवर्त्तिगुणनाश्य[illegible]ति तन्नाशरूपमुक्तेस्तत्त्वज्ञानसाध्य
त्वमेवेत्याहुः। तथा चैतादृशापवर्गस्याभावे संशयस्य गुणे साध्यतयेच्छाविषयरूपस्य प्रयोजनः
स्य यथायथं द्रव्यादिषु साध्यसाधनोभयवत्तानिश्चयविषयस्वरूपस्य दृष्टान्तस्य यथायथं द्रव्यादि
षु तत्तत्स्थस्वप्रतिपाद्यरूपस्य सिद्धान्तस्य द्रव्यादिषु शाब्दस्वरूपप्रतिज्ञाद्यन्यतमरूपाणामवयवा
नां गुणे व्याप्यारोपेण व्याप॰रोपरूपस्य तर्कस्य गुणे निर्णयस्य गुणे विजिगीषुकेथांरूपंकथारूप
स्य जल्पस्य गुणे स्वपक्षस्थापनाहीनकथारूपवितण्डायाः गुणे अनुमितिनकारणज्ञानान्यत ॥१६॥
रप्रतिबन्धकज्ञानविषयरूपाणां हेत्वाभासानां यथायथं द्रव्यादिष्वभिप्रायान्तरेण प्रयुक्तस्य

का३ नरवुमुसो: कथारूपवादस्य गुणे ।२

52

शब्दस्यार्थान्तरं परिकल्प्य दूषणाभिधानरूपस्य छलस्य गुणे असदुत्तररूपजातेर्गुणे पराजयहेतुस्वरूपनिग्रहस्थानानां यथायथं व्यादिश्वन्नभावः निग्रहस्थानानि प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरनिरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुँपर्य्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगः। अपसिद्धान्तो हेत्वाभासाश्च। अत्र चकारोनुक्तसमुच्चयार्थः तेन दृष्टान्ते साध्यवैकल्यादीनां संग्रहः। तत्र विशिष्य प्रतिज्ञातस्य पक्षादेः परित्यागरूपप्रतिज्ञाहानेरभावे परोक्तदोषोद्दिधीर्षया पूर्वोक्तविशेषणविशिष्टतया प्रतिज्ञातार्थकथनरूपस्य प्रतिज्ञान्तरस्य गुणोस्त्वोक्तसाध्यादिविरुद्धहेत्वादिकथनरूपप्रतिज्ञाविरोधस्य गुणोस्त्वोक्तसाध्यादेः परेण दूषणोक्तेन तत्साध्यापलापरूपप्रतिज्ञासन्यासस्य गुणोपरोक्तदूषणोद्दिधीर्षया पूर्वोक्तहेतुनावच्छेदकाविशिष्टकथनहेत्वन्तरस्य गुणे प्रकृतानं न५

निरुक्तहेतुनावच्छेदक१

रूप२

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

प८१

कांक्षिताभिधानरूपार्थान्तरस्य गुणो ऽवाचकंप्रयोगरूपनिरर्थकस्य गुणः परिषत्प्रतिवादिबोधा
नुकूलोपस्थितिजनकवाचकवाक्यप्रयोगरूपाविज्ञातार्थस्य गुणो ऽभिमतवाक्यार्थावबोधानु
कूलाकांक्षान्यूनपदरूपस्यापार्थकस्य गुणः समयबंधविषयीभूतकथाक्रमविपरीतक्रमेणा
भिधानरूपस्याप्राप्तकालस्य गुणो यत्किंचिदवयवशून्यावयवाभिधानरूपस्य न्यूनस्य गुणो ऽधि
के हेत्वाद्यभिधानरूपस्याधिकस्य गुणः पुनरभिधा नरूपस्य पुनरुक्तस्य गुणः परिषदा त्रिरभिहि
तस्याप्रत्युच्चारणरूपस्याननुभाषणस्याभावे परिषदा विज्ञातार्थस्य वादिना त्रिरभिहितस्याप्यविज्ञान
रूपस्याज्ञानस्याभावे ऽनन्तरार्थपरोक्तं बुद्धि ऽनन्तरं प्रतिपत्तिरूपाया अप्रतिभायाः अभावे ऽसंभवात्
कालान्तरकार्यव्यासंगमितिमुद्भाव्य कथाविच्छेदरूपविक्षेपस्याभावे स्वपक्षेमनुधृत्य परपक्षे दो
षाभिधानरूपाया गुणो निग्रहस्थानं प्राप्तवतो निग्रहस्थानाननुज्ञावनरूपस्य पर्यनुयोज्योपे ॥१९॥

मतानुज्ञा१ ध्या३ स्या३ स्य२ दोष

ण।

क्षरूपस्याभावे निग्रहस्थानानवसरे तन्निग्रहस्थानाभिधानरूपस्य निरनुयोज्यानुयोगस्य गुणोक्त
थायांस्योक्तसिद्धान्तरूपप्रवचनस्यापसिद्धान्तस्याभावे हेत्वाभासानां पूर्वोक्तलक्षणानां द्रव्यादिष्व
न्तर्भाव इति भाष्यस्यार्थत्वमाशंक्य गंगेशोपाध्यायानां संमतिमाह। अत एवेति। मण्यादिसवधाने
सति वह्निना दाहेऽसति कारणाय मण्यादेः कारणविघटकत्वरूपप्रतिबन्धकताया व्यासाच वह्नि
ष्ठदाहानुकूलशक्तिरूपकारणविघटकतयैव निर्वहतीति मण्यादेः प्रतिबन्धकत्वान्यथानुपप
त्त्या सिद्धायाः शक्तेः षट्भावेष्वनन्तर्भूतत्वादतिरिक्तत्वमिति पदार्थाः सप्तकीर्त्तिता इति मूलमयुक्त
मित्यभिप्रायेण प्राभाकरः शंकते। न चेति। अतिरिक्तेति। क्लृप्तपदार्थातिरिक्ते इत्यर्थः अतिरिक्तप
दार्थत्वमेव व्यवस्थापयति। तथाहीति। मण्यादीत्यादिना मन्त्रौषध्यादिपरिग्रहः समवहितेन सः
मीपवर्त्तिना। नन्वग्निरूपकारणाभावादेव न दाह इति न मण्यादेः प्रतिबन्धकत्वमतः समवहिते

दि०क० नवह्निनेति दाहोत्पत्तिरोत्पत्तिः पूर्वरूपपरावृत्तिर्वा मण्याद्यतिरिक्तप्रतिबन्धकत्वं खण्डयति तस्य
चेति मणिसमवधानशून्येत्यर्थः ननु वह्नौ यदि दाहानुकूला शक्तिः तदा मण्यादिसत्त्वे कु
तो न दाह इत्यत आह. तत्रेति. पूर्वोक्ता शक्तिः सिद्धा वित्यर्थः। दाहानुकूलेति. अत्र चानुकूलत्वं
कारणतावच्छेदक साधारण्यं तेन शक्तेः कारणतावच्छेदकत्वेपि न क्षतिः नाश्यत इत्यस्य इति
कल्प्यत इत्यनेनान्वयः तथा च वह्निनिष्ठशक्तित्वावच्छिन्नं प्रति मणित्वेन नाशकत्वस्वीकारेण मण्या 54
दिसत्त्वदशायां शक्तेरभावादेवेति भावः ननु मण्यादेर्यदि शक्तिनाशकत्वं तदा सत्युत्तेजकविशिष्ट
वह्नौ मण्याद्यपसारिते वा दाहानापत्तेरित्यत आह. उत्तेजकेनेति। मण्याद्यपसरणेन चेत्यत्र चः
कारो वाकारार्थः न च दाहं प्रति मण्यभावत्वेन हेतुत्वकल्पनान्न मणिसमवधानकाले दाहापत्तिरि ॥१८॥
ति वाच्यं. मण्यभावत्वेन रूपेण सर्वत्र हेतुताकल्पने गौरवाद्विलक्षणशक्तिमत्त्वेन वह्नेः कारणत्वक

ल्पनस्यैवोचितत्वादित्यभिमानात्. नन्वेवं शक्तिसिद्धावपि तस्या अतिरिक्तत्वासिद्धिरिति चेन्न उक्तपदा
र्थेष्वनन्तर्भूतत्वात्. तथाहि न तावद्द्रव्यात्मिका शक्तिः गुणादिवृत्तित्वात्. अत एव न गुणात्मिका क
र्मात्मिका शक्तिः गुणादिवृत्तित्वात. अत एव गुणात्मिका कर्मात्मिका वा सा न च सामान्याद्यन्यतमरूपा
उत्पत्तिमत्वे सति विनाशवत्वादिति एवमतिरिक्तां शक्तिं प्रसाध्य सादृश्यस्याप्यतिरिक्तपदार्थतां व्यवस्था
पयति। एवमित्यादिना. अतिरिक्तइति. उक्तसप्तपदार्थातिरिक्त इत्यर्थः षड्भावानन्तर्भूतत्वे सति प्र
माणान्तर्भूतत्वादिति हेतुः पूरणीयः तत्र सत्यन्तासिद्धिं निरस्यति. तद्धीति. तत्सादृश्यं हि हेतौ सामान्ये
पीति सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वात्. तेन सामान्यत्वेन व्यभिचारः। व्यतिरेकित्वे सतीति
विशेषणात्प्रमेयत्वादौ न व्यभिचारः भावत्वे च द्रव्यादिषट्कान्यतमत्वरूपे हेतुमति साध्यसत्वान्न व्य
भिचार इति. नचेति। यदि सादृश्यं द्रव्यादावन्तर्भवेत्तदा द्रव्यादेः सामान्यावृत्तित्वेन यथा गोत्वं नित्यं

दि० क० तथात्वमित्यबाधितप्रतीतिर्न्न स्यादित्यर्थः अभावेन्तर्भावमात्रं क्वनिराचष्टे नापीति. यद्यप्यति
रिक्ताभावःमनंगीकुर्वतः प्राभाकरस्य मते. अभावेन्तर्भावचिन्ता न संभवति. तथापि परमतमभ्यु
दं३ पगम्यैं निराकृतमिति भावः सत्वेन भावत्वेन प्रतीयमानत्वात्. प्रमीयमानत्वात्. मणिसमवधा
नकालीनवह्निना दाहवारणाय प्राभाकरेण साधितां शक्तिं दूषयति मण्यभावेति। अतिरिक्तश प ४
ल्यपक्तिकं नां पूर्वोक्तनाशस्य नाशकाभावकल्पनं चापेक्ष्य लाघवाद्दाहत्वावच्छिन्नं प्रति मण्यभावत्वादिनै
वहेतुता कल्पनमिति भावः दाहादिकमित्यादिपदेन वह्निसंग्रहः मणिसत्त्वे वह्नेरप्यनुपपत्तेः 55
तथा च मणिरूपप्रतिबंधकत्वान्न दाहापत्तिरिति भावः ननु यदाकदाचित् मण्यभावविशिष्टाद्व
ह्नेर्दाहापत्तिः कारणतावच्छेदकावच्छिन्नकारणस्यैव कार्योत्पत्तिनियामकत्वात्. मण्यभावविशिः
ष्टवह्नित्वं वह्निविशिष्टमण्यभावत्वं वा कारणतावच्छेदकमित्यत्र विशेषणविशेष्यभावे विनि ॥१९॥

सद्धा३

न२ घ१

गमनाविरहे गुरुभूतकार्य्यकारणभावद्वयापत्तिरित्यत आह · मण्यभावादेरिति. तथा च प्र
तिबन्धकत्वं च कार्य्यानुकूलधर्म्मविघटकत्वं चेबाधज्ञानस्यानुमितिप्रतिबन्धकत्वापत्तेः किन्तु
कारणीभूताभावप्रतियोगित्वं तच्च मण्यभावस्य हेतुत्व एवोपपद्यते नत्वतिरिक्तशक्तिंकाल्पितिः सत्वे
भावः ननु प्रतिबंधकत्वस्य एतादृशत्वे कारणीभूतवह्निरूपाभावप्रतियोगिवह्न्यभावेऽतिव्याप्तिः ३ नि४
स्वप्रागभावप्रतियोगिनि घटादौ चेति चेन्न तादात्म्यातिरिक्तसंबंधावच्छिन्नाया कारणतानतदाश्र
यीभूतो योऽभावभिन्नो योऽत्यन्ताभावस्तत्प्रतियोगित्वस्य विवक्षितत्वात् · कारणताविशेषोपादाना
च्च स्वात्यन्ताभावप्रत्यक्षे स्वस्य प्रतिबन्धकत्वापत्तिः परास्ता . विषयस्य तादात्म्यसंबंधेनैव प्रत्यक्षे
हेतुत्वात् · ननु वह्निमण्यभावयोर्द्वयोर्हेतुतापेक्षया अतिरिक्तशक्तेरेकस्या एव हेतुता युक्ता लाघवा
दित्यत आह . अनेनैवेति. दाहादिकं प्रति मण्यभावादेर्हेतुत्वकल्पनेनैवेत्यर्थः सामंजस्ये . मणिसम

दैशिकः स्वरूपसंबंधविशेष इत्यर्थः भावाभावसाधारणत्वस्वीकाराभिप्रायेण वा इदं एवमग्रेपि ३

दि०कि० वधानदशायां दाहवारणे प्रागभावे मानाभावात्। दाहध्वंसेति। इदमुपलक्षणं प्रतियोगिध्वंसयोः शक्तिना
शमण्योः शक्तिमण्यपसारणयोश्च कार्यकारणभावकल्पनापि स्यादिति बोध्यं। उत्तेजकाभावेति। तथा
च। केवलं मणिर्न प्रतिबंधकः किंतूत्तेजकाभावविशिष्टमणिः तदभावश्चोत्तेजकसमवधानकाले
पि तिष्ठतीति न व्यभिचार इति भावः। अथ मण्यादिस्थलीयदाहं प्रत्युत्तेजकस्यैव हेतुत्वमस्त्विति
चेन्न। तस्याननुगतत्वात्। तदभावकूटविशिष्टमण्यभावस्य चानुगतत्वात्। अत्रेदं बोध्यं। अभा 56
वीयविशेषणतासंबंधेन दाहत्वावच्छिन्नं प्रति उद्देश्यतादैशिकतान्यतरसंबंधावच्छिन्नप्रतियोगिता
त कानंतं उत्तेजकाभावानां सामानाधिकरण्यरूपं यद्वैशिष्ट्यं तदवच्छिन्नस्य मण्यादेः दैशिकविशेषण
तासंबंधावच्छिन्नप्रतियोगिताकाभावस्याभावीयविशेषणतासंबंधेन हेतुत्वमिति। तेन संयोगसं
बंधावच्छिन्नप्रतियोगिताकमण्यभावस्य तत्संयुक्तेपि सत्त्वान्न दाहापत्तिः। न चानुमानमेवं शः ॥२०॥

विशेषण४
काभावस्याभावीयविशेषणतासंबंधेन हेतुत्वमिति तेन संयोगसंबंधावच्छिन्नप्रतियोगिता १

ह्नौ प्रमाणं । न चाहि वह्निर्दाहानुकूलाद्विशिष्टातीन्द्रियधर्मसमवायी दाहजनकत्वादात्मवदिति वह्निद्व्य
णुके कर्मसमादाय मर्जनकपालस्थवह्निनिष्ठानुकूलरूपमादाय वा सिद्धसाधनवारणाय साध्ये दाहा
नुकूलेति । वह्निद्व्यणुके इन्धनसंयोगमादायादृष्टवदात्मसंयोगमादाय वा न तद्वारणाय विशेति । वह्नि
निष्ठेत्युक्तस्पर्शमादाय न तद्वारणायातीन्द्रियेतीति चेन्न विपक्षे बाधकतर्कविरहेणास्यानुमानः
स्याप्रयोजकत्वात् । केचित्तु वह्निं प्रति तृणफूत्कारसंयोगादिरूपेण कारणतायाः व्यभिचारेण संभवा
दतिरिक्तशक्तिसिद्धिः न च तृणफूत्कारयोररणिनिर्मन्थयोर्मणिनरतिकिरणयोः संबंधस्य ज
न्यतावच्छेदके वह्निवृत्तिवैजात्यत्रयं कल्प्यत इति न व्यभिचार इति वाच्यं । तज्जन्यतावच्छेदकवैजात्य
त्रयकल्पनापेक्षया न तत्संबंधानामेकशक्तिमत्वेन कारणत्वकल्पनाया एव लघुत्वेन न्याय्यत्वा
दित्याहुः । तन्न न तत्संबंधसाधारणैकजातेरेवाभ्युपगमात् । न च योग्यवृत्तिजातेर्योग्यत्वापत्तिरि

कारण३ त्वर

दि०क० तिवाच्यं. दोषविशेषेण विशिष्यंभावे विनिगमनाभावेनैशक्तेरिवायोग्यत्वकल्पनात्. नच नोदनत्वा
दिना शंकरः तस्यादोषत्वात्. अन्यतमत्वेन कारणतासंभवाच्च. न चान्यतमं घटकभेदानां मिथो वि
शेषणविशेष्यभावे विनिगमनाविरहेण तावच्छेदकभेदात्कारणताबाहुल्यमिति वाच्यं. कारण
तावच्छेदकानां समनियतानां भेदानामैक्येन कारणतावच्छेदकैक्यसंभवात्. न च भेदानां स्वरूप
तावच्छेदकतासंभवेन तृणपूत्कारे संयोगभेदविशिष्टारणिनिर्मथनसंबंधभेदविशिष्टमणितर 57
णिकिरणसंबंधभेदावच्छिन्नप्रतियोगिताकभेदत्वादिनावच्छेदकत्वं वक्तव्यं. तथा चावच्छेदकताव
च्छेदकभेदादवच्छेदकताभेदस्तद्भेदे न च कारणताभेद इति वाच्यं. स्वरूपसंबंधरूपाया अतिरिक्ताया
वा कारणतायाः ऽवच्छेदकभेदे ऽप्यभेदादित्यत्र विस्तरः. परे तु तृणादिसंबंधकालीनवायुसंयोगादीनां ॥२१॥
[illegible]शक्तिमत्वेन हेतुतामादाय विनिगमनाव्रशक्तिरित्याहुः. यदाशंकिते सादृश्यमप्यतिरिक्तपदार्थं

वाच्या विरहा सिद्धि रू३

[illegible]तदपि निराकरोति. सादृश्यमिति. तद्भिन्नत्वे सतीति. इदं च सादृश्यनिरूपकेति व्याप्तिवारणा
य अनुयोगितासंबंधविलक्षणोनुनदेयमेव तदुक्तं भूयोधर्मवत्त्वमिति. तच्चासाधारण्येन विद्यमा
ना ये भूयांसो धर्माः तद्वत्त्वमित्यर्थः नन्विदं गगनं गगनाकारं सागरः सागरोपमः रामरावणयोर्यु
द्धं रामरावणयोरिवेत्यादावव्याप्तमिति चेन्न. तत्र तद्वृत्तिधर्ममात्रस्य विवक्षितत्वात्. युगभेदवि
वक्षया भेदसत्त्वाद्वा. अत एव युगभेदविवक्षायामिहोपमालंकारः अन्यथानन्वयालंकार इत्युक्त
मालंकारिकैः सादृश्यघटकधर्मश्च क्वचिज्जातिरूपः यथा घटसदृशः पट इत्यादौ क्वचिदुपाधिरूपः
यथा गोत्वं तथा गवयत्वमपीत्यादौ यथा चंद्रसदृशं मुखमित्यादावाह्लादकत्वादि अतिरिक्तकल्पने गौ
रवादिति नव्यास्तु सादृश्यमतिरिक्तमेव न चातिरिक्तत्वे पदार्थविभागव्याघात इति वाच्यं. तस्य
साक्षात्परंपरया वा तत्त्वज्ञानोपयोगिपदार्थमात्रनिरूपणपरत्वात्. एवमधिकरणत्वमपि

तस्यसंयोगादिस्वरूपत्वेवदरकुंडसंयोगस्यद्विनिष्ठत्वेन कुंडेवदरमितिवत्. वदरेकुंडमित्यपिप्र
योगस्यात्. एवंप्रतियोगित्वमपिप्याकुः सादृश्यलक्षणंलक्ष्येयोजयति. यथेति स्त्रियांक्तिन्निति
सूत्रविहितस्यक्तिन्प्रत्ययान्तक्षितिशब्दस्य क्षयवाचकत्वात्क्षितिशब्दस्यप्रकृतोपयोगिनम
र्थमाह. क्षितिःपृथिवीति. अप्शब्दस्याप्त्रित्यादिपाणिनीयसूत्रेशब्दपरत्वादाहआपोजलानीति.प्र
तापस्यापितेजःशब्दवाच्यत्वात्. प्रकृतेतेजःपदार्थंदर्शयति. तेजोवह्निरिति. वह्न्यादिरित्यर्थः.देव
विशेषस्यापिमरुच्छब्दवाच्यत्वादाहमरुद्वायुरिति व्योमशब्दस्यवेदेब्रह्मणिप्रयोगादाह. व्योमआ
काशमिति देहविशिष्टार्थकात्मन्शब्दाद्देहावयवानुपस्थितेराहदेहीआत्मेति. अथेश्वरस्यदेह
[illegible]ध्येनअमूर्तत्वात्कथंद्रव्यत्वमितिचेन्न. कृत्स्नामूर्तावेशन्यायेनेश्वरस्यशरीरमिच्छन्ति. संसार्यदृ
[illegible]च्छरीरमित्यन्ये. आत्मएवास्वरसादात्मेति. पृथिव्यप्तेजोवाय्वाकाशानि. इतिपंचैद्रव्याणि
वो

व्योमादेरीश्वरस्यान्त्यात्मनो मनसः समवेतमूर्त्तत्वाभावादिति नवीना आहुः तन्मतं निराकर्त्तुं संख्याबो-
धकपदस्मरणेनार्थमाह. एतानि नवेति. व्योम्नस्तावच्छब्दाश्रयतया सिद्धिः न च गगन एव शब्दाश्रय-
त्वं प्रत्येकजीवमादाय विनिगमनाविरहात्. न च जीवानामाश्रयत्वे शब्दवानहमिति प्रत्यक्षापत्तिः अ-
दृष्टवदयोग्यतया तस्य विकल्पनात्. कालदिशौ तु एतस्मिन्काले परः पूर्वस्यां दिशि घट इत्याद्यनु-
गताकारप्रत्ययात्. मनसश्चासमवेतत्वात् पार्थिवादित्रसरेणूनादाय विनिगमनाविरह इत्याश्र-
यः. अधिकमग्रे व्यक्तीभविष्यति मूले द्रव्याणीति द्रव्यपदं द्रव्यत्वरूपजातिविशिष्टार्थकं न तु गुणाश्र-
यत्वादिति विशिष्टार्थकं गौरवात् मुक्तावल्यां किं प्रमाणमिति किंशब्दः प्रश्ने ननु द्रव्यमित्यनुगतप्रती-
तिरेव जाति. साधिका भविष्यतीत्यत आह नहीति. न च द्रव्यत्वजातौ घटेनेति तथा च घटादिषु पाम-
राणां द्रव्यत्वज्ञानाभावेन सकलद्रव्यसाधारणद्रव्यत्वजातिर्न सम्भवतीति भावः। कार्य्येति। कार्य्यत्वे

न२

दि०कं० प्रागभावप्रतियोगित्वं। न च ध्वंससाधारण्यं सत्वेन विशेषणीयत्वात्· तत्र च कार्य्यस्य समवायः प्र
त्यासत्तिः कारणस्य तादात्म्यं यत्र समवायेन कार्य्यं तत्र तादात्म्येन द्रव्यमिति नियमात्· ननु जन्यस
त्वस्य कार्य्यतावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेन कारणत्वे मानाभावः न च नीलेन नीलोत्पत्तिवारणे
य तथा हेतुत्वेनुमावश्यकमिति वाच्यं· समवायेन नीलं प्रति स्वाश्रयसमवेतद्रव्यत्वसंबन्धेन नील
हेतुत्वेनैव तद्वारणात्कार्य्यत्वस्य कार्य्यतावच्छेदकत्वे गौरवात्· कालिकसंबंधेन घटत्वादिकमा 59
दाय विनिगमनाविरहाच्चेत्यत आह संयोगस्येति अत्र च रूपादिगुणानां सकलद्रव्यसाधारण्या
भावेन द्रव्यकार्य्यतया परित्यागः सकलद्रव्यवृत्तिसंख्यादित्रयस्य गगनादिवृत्तिसंख्यादित्रयस्य
[illegible] न च संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन समवायीकारणत्वे मानाभावः तत्तद्व्यक्तिसमवेतस ॥२३॥
[illegible]मान्यं प्रति तत्तद्व्यक्तित्वेन समवायिकारणत्वस्यावश्यकतया गुणादौ तदुत्पादासंभव इति वा

न३

कार्य्यमात्रवृत्तिजातेः कार्य्यतावच्छेदकत्वनियमेन नादृशाकारणत्वस्यावश्यकत्वात्. नित्यसंयोगा
णीकत्वं मध्यसाधारण्येनाह विभागस्यैति द्रव्यं सिद्धेः जातिरूपद्रव्यत्वसिद्धेः क्वचित्तथैव पाठः अन्यथा
यदि गुणत्वेनान्यथासिद्धिं संभवति. तथापि साक्षात्संबद्धधर्मवाधसत्त्वे वानुमितिः परंपरसंबंध
विषयत्वमिति भावः इत्युपलक्षणं द्रव्यवति द्रव्यान्तरानुसत्यासमवायेन द्रव्यस्य संबंधत्वं कल्पनीय
मिति प्रतिबन्धकतावच्छेदकतया द्रव्यत्वसिद्धिः प्रतिबध्यतावच्छेदकं च पृथिव्यादिचतुष्टयमात्रवृ
त्तिमूतत्वमेव नित्यव्यावर्त्तकत्वात्. मूर्त्तत्वस्य प्रतिबंधकतावच्छेदकत्वे मूर्त्तत्वस्य तथात्वमादाय विनि
गमनाविरहापत्तिः द्रव्यत्वस्य प्रतिबंधकतावच्छेदकत्वे तु धर्मिग्राहकमानसिद्धं न च तस्य गगनादि
वृत्तित्वमानाभाव इति वाच्यं मूर्त्तत्वेन तुल्यव्यक्तिकत्वापत्त्या विनिगमनाविरहेन गगनादिपंचवृत्तित्वे
भ्युपगमात्. न च मूर्त्तत्वेन तुल्यव्यक्तित्ववारणाय मनोवृत्तित्वमेव द्रव्यत्वे कल्प्यतां. गगनादिवृ

तुल्यत्वात्तिर

दि०क० त्तिहेतुत्वकल्पने गौरवात् । गगनादि हेतुत्वकल्पनेपि मूर्त्तत्वेन सांकर्यवारणाय मनोहेतुत्वस्यावश्यकत्वादिति वाच्यं । तथा सति मूर्त्तत्वजात्या द्रव्यत्वस्य तुल्यत्वापत्तिरिति [illegible]नु दशमद्रव्यस्य तमसः सत्वात्कथं नवद्रव्याणीत्युक्तमित्यभिप्रायेण मीमांसकः शंकते तमश्चेति । ननु तमसि मानाभावात्रोक्तमित्याशंक्यानः साधकप्रत्यक्षप्रमाणमाह । तमसीति । तमोहीत्यर्थः प्रत्यक्षेण चक्षुरिंद्रियेण । ननु तमसः सिद्धावपि तस्य द्रव्यत्वे किं मानमित्याशंक्यानुमानं प्रमाणमाह । तस्येति तमस इत्यर्थः चकारो द्रव्यत्वमित्यनेनान्वेति । तथा च । तमो द्रव्यं रूपवत्वादित्यनुमानेन तमसः द्रव्यत्वे प्रमाणं सूचितं इदमुपलक्षणं परत्वापरत्वाश्रयत्वादित्यपि बोध्यं इदं तमः परमपरमिति प्रतीतेः हेत्वन्तरमाह । च[illegible]वत्वादि[illegible]कर्मवत्वं समवायसंबन्धेन विवक्षितं तेन जन्यमात्रस्य कालिकसंबंधेन कर्मवत्वेन व्यभिचारः न च स्वरूपासिद्धिः चलति छायेति प्रतीत्या कर्मवत्वसिद्धेः तमसः क्लृप्तद्रव्येष्वन्तर्भावं निराकु ॥२५॥

60

मर

[illegible]लिङ्गेत्यादिना गंधेति गन्धाभावस्य हेतुत्वोक्तौ पटगतगंधप्रतियोगिकाभावमादाय पटे व्यभिचा-
रः अतः स्वरूपत्वमुक्तं हेतुश्च प्रतियोगिव्यधिकरणः समवायसंबंधावच्छिन्नप्रतियोगिताकोभावः तेनो- ने २
त्पत्तिकालीने संयोगसंबंधावच्छिन्नगंधाभाववति घटे न व्यभिचारः नीलरूपेति अनुगतेनैकेनैव नील- वे २
रूपेन हेतुना जलाद्यपक्षभेदसिद्धेः तेषामभाव[illegible]भावेत्वे रूपाभावादीनां अननुगतानां न हेतुतयोपन्यासः
जलादिकमित्यादिना तेजःप्रभृतिद्रव्यसंग्रहः तथा च नवद्रव्येष्वन्तर्भावसंभवेन परिशेषेण तमसोऽधि-
कद्रव्यसिद्धिरिति भावः ननु तमः खलु चलं नीलं परापरविभागवत् प्रसिद्धधर्म्मवैधर्म्यान्नवभ्यो भेद-
मर्हतीति ननु तमसो द्रव्यत्वे आलोकनिरपेक्षेण चक्षुरिन्द्रियेण ग्रहो न स्यात् द्रव्यग्रहे आलोकसहकृत-
चक्षुरिन्द्रियस्य हेतुत्वादित्यत आह तत्प्रत्यक्षे चेति तमसः प्रत्यक्षे चेत्यर्थः तमोभिन्नचाक्षुषद्रव्यत्वा-
[illegible]न्नं प्रतीत्येव संयोगसंबन्धेनालोकत्वेन कारणत्वावधारणादिति भावः अभावस्य तेजोभावेनेति.

प्रकृष्टमहत्त्वोद्भूतानभिभूतरूपवत्तेजस्त्वावच्छिन्नाभावेनेत्यर्थः॥ अन्धकाराभाव एव तेजः किं न स्यादिति
नसम्यक्उद्भूतस्पर्शाभास्वररूपवुद्धेरनुपपत्तेरिति सूचनायावश्यकपदउपपत्तौ तमो व्यवहारोपपत्तौ
ननु तमसस्तेजोभावरूपत्वे रूपवत्ताप्रतीतिः कथं अभावे रूपाभावादित्यत आह॰ रूपवत्तेति॰ ननु रूप
वत्ताप्रतीतेर्भ्रान्तित्वेऽपि चलतीति प्रत्ययेन कर्मवत्त्वहेतुना तमसोऽद्रव्यत्वं सेत्स्यतीत्यत आह कर्मवत्तेः
ति॰ नहि रूपे अन्योपाधिकी कर्मप्रतीतिरिति भावः ननु प्रतीतेर्भ्रान्तित्वं तत्रैव स्वीक्रियते यत्रोत्तरकाले
वाधः प्रकृते च तमो न चलतीत्युत्तरकाले वाधाभावात्कथं प्रतीतेर्भ्रान्तित्वमित्यतो दूषणान्तरमाह॰ त
म इति अवयवादीत्यादिना उत्पत्तिध्वंस[illegible]रिग्रहः यत्त्वारोपितं नीलं रूपं तम इति कंदलीकारमतं तन्न.
[illegible]अन्धकार इति प्रतीतेरपि भ्रान्तित्वापत्तिः तमो नीलं न तु नीलिमेति प्रत्ययाच्च. ननु तमसो नातिरिक्तैः
[illegible]सुवर्णस्यातिरिक्तस्य सत्त्वात्तद्वत्त्वव्याघातस्तदवस्थ एवेत्यत आह सुवर्णस्येति वक्ष्यत इति तेजो

गुणनिरूपणावसर इति शेषः कंठत इति रूपरसगंधस्पर्शाः संख्यापरिमाणे पृथक्त्वं संयोगौ विभागौ परत्वापर
त्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणा इति विभागसूत्रे सप्तदश कंठोक्ताः चशब्देन सूत्रोक्तचशब्देन
द्रवत्व गुरुत्वस्नेहसंस्कारधर्माधर्मशब्दाः समुच्चिताः ते च सर्वे एकत्रया चतुर्विंशतिगुणा इति व्यवहृताः न
नु चतुर्विंशतौ किं नाम गुणत्वं न च जातिविशेषः न तत्र प्रमाणाभावादित्यत आह तत्रेति तेषु गुणेष्वित्यर्थः
अग्रे गुणनिरूपणावसरे वक्ष्यत इति द्रव्यकर्मभिन्नसामान्यवति या कारणता सा किंचिद्धर्मावच्छिन्ना कार
णतात्वादित्यनुमानं गुणत्वजातौ प्रमाणमिति भावः एतत्सर्वं स्फुटीभविष्यतीति प्रत्यक्षसिद्धेति चल
नाकारानुगतप्रत्ययबोध्येत्यर्थः अधिकतयेति कर्मविभाजकोपाधिभिर्भ्रमणादिभिः मूले गमनादेवेति
अथैवमुत्क्षेपणादीनामपि गमनादेव लाभे उत्क्षेपणत्वादिभिरपि विभागो नुः ननूत्क्षेपणादौ गमः
नत्वं नानुभाविकं इदमधश्च प्रक्षिप्ते लोष्टादौ ऊर्ध्वं गच्छत्यधो गच्छतीति प्रत्ययादिति नेत्र स्वतंत्रेच्छस्यमु

णं।

दि०कि० नेर्निर्वक्तुमशक्यत्वादिति. तल्लक्षणमिति. लक्षणप्रयोजनं त्वितरभेदस्य व्यवहारस्य वा सिद्धिः सामान्य
मितरेभ्यो भिद्यते सामान्यमिति व्यवहारविषयो वा नित्यत्वे सत्यनेकसमवेतत्वात्. यन्नैवं तन्नैवं यथाद्
व्यमिति. एवं लक्षणान्तरेऽप्यूह्यं. अनेकेति. अनेकत्वमेकभिन्नत्वं जलपरमाणुरूपादावतिव्याप्तिवार
णायोक्तौ विशेष्यभागः तद्घटकसमवायफलमाह नित्यत्वे सत्यनेकवृत्तित्वमिति न चैवं नित्यसंयोगेः
तिव्याप्तिरिति वाच्यं तस्य निरस्तत्वात् कुतो निरास इति चेत् द्रव्यनिरूपितसंयोगनिष्ठकार्यतावच्छे 62
दककोटौ जन्यत्वनिवेशगौरवात्. नित्यसंयोगांगीकर्तृनये संयोगत्वस्य नित्यवृत्तित्वेन कार्यताव
च्छेदकत्वे तुल्ययुक्त्या नित्यविभागसिद्ध्यापत्तिः न चाकाशत्वरूपजातावव्याप्तिः तस्यानेकसमवेत
त्वा[illegible]दि[illegible]स्यालक्ष्यत्वेनोत्तरमाह. एकमात्रेति. व्यक्त्यभेदरूपबाधकसत्त्वादिति शेषः अनुगत ॥२६॥
[illegible]जातिकल्पिकाया अभावादिति भावः ननु व्यक्त्यभेदस्य जातिबाधकत्वमेवासिद्धं. निःसामान्य

वार

विशेषत्वे च सति समवेतत्वस्य जातिलक्षणत्वादित्यन[illegible]मतिमाह. तथा चोक्तमिति द्रव्यकिरणावल्यामुदयनाचार्यैरिति शेषः बहुवृत्त्येकधर्मस्यैव सामान्यतया सर्वसिद्धत्वात् एवं व्यक्तेर्जातिरनभ्युपेयेति भावः एकव्यक्तिकत्वमाकाशत्वादेः जातित्वे बाधकमुक्त्वा [illegible]त्वं तुल्यव्यक्तिवृत्तित्वं घटत्वकलशत्वादीनां जातीनां भेदे वस्तुतस्तु तुल्यत्वं तुल्यव्यक्तिवृत्तित्वं स्वभिन्नजातिसमनियतत्वमिति यावत्. न च जातित्वे बाधकमेवेति ध्येयं शंकरश्च परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्रसमावेशः मूर्तत्वादेर्जातित्वे भूतत्वं विहाय मनसि वर्तमानस्य मूर्तत्वस्य मूर्तत्वं विहाय गगने वर्तमानस्य भूतत्वस्य च पृथिव्यादिचतुष्टये सत्त्वात्. ननु सांकर्यं जातिबाधकत्वे किं मानमिति चेन्न. स्वसमानाधिकरणस्वाभावसामाधिकरण्यान्यसंबंधेन जातिविशिष्टजातित्वावच्छेदकं स्वसमानाधिकरणाभावप्रतियोगित्वाभावनियमस्यभंगप्रसंग एवेति. तादृशनियमेमानाभावान्नसांकर्यं जातिबाधकमिति नुन

लक्षणान्तरकरणे बाह.४ निःसामान्यत्वे सति सामान्यभिन्नत्वे च सति समवेतत्वस्य लक्षणत्वात्.३

दि०के०

न्याः अनवस्थानुजातेर्जातिमत्त्वे यद्यपि निखिलजातिष्वेकवैजात्यांगीकारेपि न द्वैजात्येन वैजात्यान्तरमे
कव्यक्तित्वान्तथापि निखिलजातिष्वेकवैजात्यसिद्धौ वैजात्यतदाश्रयजातिषु पुनर्वैजात्यान्तरमेव
मङ्गेपीत्यनवस्था बोध्या. रूपहानिः निःसामान्यत्वगर्भलक्षणव्याघातरूपाद्विशेषस्य जातिमत्त्वे रू
पस्य स्वतो व्यावर्त्तकत्वस्य हानिः तत्र जातिस्वीकारे तयैव व्यावर्त्तकत्वं वाच्यं. सामान्याश्रयस्य सा
मान्यरूपेणैव भेदसाधकस्य नियमात्. न च सामान्यरूपेण विशेषाणां भेदसाधकत्वं संभवति व्यभि
चारात्. तादृशनियमानंगीकारे परमाणुगतैकत्वानां तत्तद्व्यक्तित्वेनैव परमाण्वन्तररूपभेदसाधक
त्वसंभवेन विशेषस्य वैयर्थ्यप्रसंगादिति तु सत्यान्यः असंबंधो नेति. प्रतियोगितानुयोगितान्यतर
संबंधेन समवायाभावः समवायाभावयोर्जातिमत्त्वमिति तदपेक्षया चेति. सत्तापेक्षया चेत्यर्थः. स
जातिश्च द्रव्यं सद्गुणः सन्नित्याद्यनुगतप्रतीत्यैव सिद्ध्यति. अत्र नव्याः सन्निति प्रतीतिविषयो भावः

स्यात्. नुयोगितेति. तावन्मात्रे च पक्षे हेत्वभावः पूर्वपक्षिणोऽभावत्वस्य. जातित्वांगीकारे तत्प्रतियोगित्वसमवायस्यानुयोगितासंबंधसत्त्वात्. अतः जात्यति
रिक्तभे तद्रूपितानुयोगितासंबंधेन समवायाभावस्य वाच्यतया तस्य च गुणादावपि सत्त्वेन गुणत्वादीनां जातित्वं न स्यादतस्तमाह. प्रतियोगितेति. तथा च जात्यतिरिक्त प्रतियोगि

तानुयोगिताप्रतियोगितान्यतरसंबंधेन सम
वायाभावेति फलितार्थः गुणादौ प्रतियोगि
तया समवायान्न कोपि दोषः

स्तित्वञ्चात एव सामान्यादिष्वपि सदिति व्यवहारः न त्वतिरिक्तद्रव्यादित्रिकवृत्तिसत्ताख्या जातिरिति तेन लक्षिमपरं द्विविधं सामान्यं परं सत्तेति वैशेषिकविभागो निर्युक्तिकत्वादेवानादेय एवेत्याहुः तदसत् ध्वंस कारणतावच्छेदकतया सत्ताजातिसिद्धेः यतः प्रतियोगितासंबंधेन ध्वंसोत्पत्तिस्तत्र तादात्म्यसंबंधेन सदिति सामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावात्. न च प्रागभावे व्यभिचारः प्रागभावे सत्ताविरहादिति वाच्यं. प्रागभाववृत्तिप्रतियोगिताभिन्नप्रतियोगितायाः कार्य्यतावछेदकसंबंधत्वादिति. वस्तुतस्तु सत्त्वावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेन कारणतया जन्यतावछेदकतया सत्ताजातिसिद्धिः तादृशकार्य्यकारणभावे मानाभावादिति न च. स्वाश्रयसमवेतत्वसंबन्धेन नीलादेर्नीलत्वादावपि सत्वात्तत्र नीलापत्तिवारणाय तादृशकार्यकारणभावस्यावश्यकत्वात्. न च स्वाश्रयसमवेतद्रव्यत्वसंबंधेन नीलादेर्हेतुतयैव न तदापत्तिरिति वाच्यं. तादृशसमवेतत्वद्रव्यत्वयोर्विशेषणविशेष्यभावे वि

दि०क० निगमनाविरहेण कारणताबाकुल्यापत्तेः कालिकसमवायोभयसंबन्धस्य कार्यतावच्छेदकतावच्छेदक
त्वात्समवायाः नित्यसमाधारणेपि स्वनिविरहादित्यन्यत्र विस्तरः स्वत एवेति. स्वतो व्यावृत्तत्वं च स्वभिन्न
लिंगजन्यस्वविशेष्यकस्वसमानजातीयभेदानुमितिविषयत्वं साजात्यं च पदार्थविभाजकोपाधिरूपेण
तेन घटादेस्तादात्म्येन व्यावृत्तत्वेपि विशेषस्य गुणांशस्यत्वेनेतरभेदानुमितिविषयत्वेपि द्रव्यादेरपि 64
प्रमेयत्वादिना विशेषसजातीयत्वेपि न क्षतिः. नित्यद्रव्यवृत्तय इति विशेषाणां स्थानकथनं. ननु ल
क्षणप्रविष्टं प्रयोजनाभावात्. तत्र विशेषव्यावृत्तौ नन्वेतरव परमाण्वादयो व्यावर्त्तकमविष
न्नि किं विशेषणेति चेन्न: अव्यावृत्तधर्मस्य व्यावर्त्तकत्वाभावात्. तत्र व्यावर्त्तकान्तरापेक्षायामनव
स्थानात्. ननु विशेषे स्वयं प्रसंग इति चेन्न. तस्य धर्मिग्राहकमानेन स्वतो व्यावृत्ततयैव सिद्धेः एवं च नित्य ॥२८॥
[illegible]षु विशेषाः सिद्धाः तद्गुणास्तु न विशेषवन्तः आश्रयरूपेण विशेषणेनैव तेषां व्यावृत्तत्वात्. आश्रयः

स्वभिन्नलिंगजन्येति । स्वभिन्नलिंगजन्या स्वविशेष्यका स्वसजातीयो यस्तत्प्रतियोगिताको भेदस्तद्विषयकानुमिति
तद्विषयत्वं यद्यत्त्वेन तद्भेदकूटवत्त्वं भवति हि विशेषे । शब्देन घटादिस्तद्भिन्नं यल्लिंगं घटत्वादिस्तज्जन्या घटादिविशेष्यिका ।
घटादिसजातीयो यस्तत्प्रतियोगिताभेदविषयिण्यनुमितिविषयं यद्यत्त्वं घटादि तद्भेदकूटस्य विशेषे सत्त्वाल्लक्षणसम
न्वयः । एतेन परमाणुसाधकानुमितौ शब्देन परमाणुस्तद्भिन्नं लिंगं विशेषा [illegible]
त्मकं लिंगं तज्जन्यानुमितिविषयत्वमेव विशेषेऽस्तीत्यप्रसिद्धिरपि परास्ता । स्वशब्देन यदुपादानं तस्यैव तद्विषयत्वात् ।
तथा च परमाणोस्तद्विषयत्वेन विशेष इति सूक्ष्मदृशा पर्यालोचनीयं । न च स्वलिंगतादृशानुमितिविषयत्वमेव वाच्यं ।
तथा सति घटादिपक्षकतादात्म्येन तद्धेतुकेतरभेदानुमितावतिप्रसंगः स्यादतो न दलद्वयघटना । तथा च घटत्वादिहेतुक
घटादिविशेष्यकानुमितिविषयत्वस्य घटसत्त्वेऽत्र तद्भेदकूटवत्त्वं । प्रथमदलानुपादाने विशेषः विशेषान्तरादिर्यत्त्वेन वि
शेषादिस्तत्र स्वशब्देन विशेषस्तद्विशेष्यकतादृशानुमितिविषयत्वविशेषत्वादसंभववारणाय तत् । द्वितीयदलानुपादाने
विशेषवान्परमाणुरितरेभ्यो भिद्यते इत्यत्र रूपादिस्तत्र स्वशब्देन विशेषस्तद्भिन्नं यल्लिंगं तद्रूपादि तज्जन्यतादृशानुमितिविष
यत्वसत्त्वेनासंभवः स्यादित्यतः स्वविशेष्यकेति । भेदप्रतियोगिनि सजातस्वविशेषणानुपादाने तु विशेषः इतरेभ्यो भिद्यते ।

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

गुणादिशून्यत्वादिस्तत्र विशेषभिन्नं यल्लिंगं गुणशून्यत्वादिरूपं तज्जन्यभेदविषयं यद्यत्स्वं विशेषापि तद्वि
षयत्वमेव विशेष इति पुनरसंभवः स्यात्. तद्धाने तु रूत्वादिप्रतियोगिकभेदस्य विशेषसजातीयप्रतियो
गिकत्वाभावान्न क्षतिः न च साजात्यं स्ववृत्तिधर्मवत्त्वं. तथा च. स्ववृत्तिप्रमेयत्वादिरूपधर्मस्य रूत्वादौ स
त्त्वात्तत्प्रतियोगिकभेदस्यापि स्वसजातीयत्वात्तद्विषयकानुमितिविषयमेव स्वमिति पूर्वोक्तदोषस्तदव
स्थ इति वाच्यं. साजात्यस्य पदार्थविभाजकोपाधिरूपेण विवक्षितत्वेन विशेषवृत्तिपदार्थविभाजकोपा
धिर्विशेषत्वरूपस्तद्वत्त्वस्य रूत्वादावसत्त्वान्न पूर्वोक्तदोषावकाशः॥ टिप्पनी। २ द्वितीयपृष्ठे पंक्तिद्वये

स्यविशेषणतयाव्याप्तेः नत्वेनविशेषणत्वसंभवादिति भावः ईश्वराकाशयोर्नित्यज्ञानशब्दाभ्यां व्याप्तेः
संभवान्नतत्रविशेषइत्यप्याहुः नवीनास्तुविशेषेति रिक्तेमानाभावः यथा विशेषाणां स्ववृत्तिधर्मवि
नाव्यावृत्तत्वं तथानित्यद्रव्याणामपीत्याहुः घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः॥ तेषु जातेश्च संबं
ध इति मूलं तत्र घटकपालपदे अवयव्यवयवपरे इत्याह अवयवावयविनोरिति जातेश्चेति चः
कारेण नित्यद्रव्येषु विशेषसंबंधसमुच्चीयँ इत्याह नित्यद्रव्ययोरिति समवायस्य लक्षँमाह नित्यसंबं ९५
धश्चात्रसंबंधिभिन्नोग्राह्यः तेननित्याभावादिस्वरूपविशेषसंबंधेनातिव्याप्तिः ननु समवायस्य संबंध
त्वे किं प्रमाणमित्याशंक्याह नप्रमाणंत्विति गुणक्रियादीत्यादिना जातिपरिग्रहः संयोगादीति द्रव्य
योरेव संयोग इति नियमादिति भावः अत्र समवायसंबंधेन पटत्वावच्छिन्नं प्रतितादात्म्यसंबंधेन तंतु
त्वेन हेतुत्वात्कार्यत्वावच्छेदकसंबंधविधया समवायसिद्धिः नच समवायस्थाने स्वरूपसंबंधं निवेश्य

घटध३ द्वि५

द्वि०क० कार्यकारणभावः कल्पनीय इति वाच्यं. तथा सति यत्समवेतं कार्यमुत्पद्यते इत्यादि समवायिकार
णव्यवस्था न स्यात्. न च यत्संबद्धं कार्यमुत्पद्यते तत्समवायिकारणमित्येव व्यवस्थास्त्विति वाच्यं. क
पालसंबद्धेऽंप्रति कपालस्य समवायिकारणत्वप्रसंगादित्यपि दूषणं सिद्धसाधनमिति। अयु
तसिद्धयोः स्वरूपसंबंध इति वदतः परस्येति शेषः. अर्थान्तरं चेति समवायसाधने प्रवृत्तानां नैया 66
यिकानामिति शेषः. ननु तथापि समवायस्यैकत्वे न मानमत आह। लाघवादिति. तथा च यथाक्षित्या
दिजनकतयेश्वरो लाघवादेक एव सिद्धस्तथा समवायोऽपीत्यर्थः. रूपवत्ताबुद्धिरिति. रूपवत्ताः
बुद्धेः प्रमात्वप्रमांत्वेप्रसंगादित्यर्थः. स्पर्शसमवायरूपसमवाययोरैक्यादिति भावः. तत्र वायौ वा रू
पाभावादिति. न च समवायसत्त्वेन संबन्धेन तत्र कथं रूपाभावः संबंधसत्त्वस्य तेन संबंधेऽसंबं. ॥२९॥
धित्वव्याप्यत्वादिति वाच्यं. रूपनिरूपितत्वविशिष्टसमवायनिरूपिताधिकरणताया एव रूपसं

ण१ ने२

रूपनिरूपितत्वविशिष्टसमवायस्यैव रूपसंबंधतया वायौ तदभावात्। न च विशिष्टस्यानतिरिक्ततया विशि
ष्टसमवायोऽपि वायावस्तीति वाच्यं.१

वंधत्वात्. तस्य वायावभावात् पृथिव्यां गंधस्य समवायो न जले इत्यादिप्रतीतेः समवायस्य नानात्वे
मिति तु नव्याः संबंधांतरं अतिरिक्तपदार्थतयैव शेषः सिद्ध इति तस्य भूतलादावितिशेषः यदिवि
शिष्ट्यमतिरिक्तमुररीक्रियते तदा तन्नित्यमनित्यं वेति विकल्प्याद्ये दूषणमाह. तस्येति देशान्तरेपि न
नु वैशिष्ट्यस्य तत्र सत्वेपि घटवत्तादशायां तत्र घटाभावाभावादेव न घटाभावबुद्धिरत आह. घटा देशान्तरेपिप
भावस्येति. तत्र घटवति भूतले तस्येति घटाभावस्येत्यर्थः अन्यथा घटाभावस्यानित्यत्वे घटशून्यदेशे
पीत्यर्थः घटत्वेनावच्छिन्नाभावस्यैकविधत्वादिति भावः। वैशिष्ट्यस्येति. वैशिष्ट्यस्य नित्यत्वाभ्युपगम
पक्ष इत्यादि. तत्र घटानयनेन घटवति न च घटवति न घटाभावबुद्धिः घटवत्ताज्ञानस्य प्रतिबंधकस्य
सत्वादिति वाच्यं. घटवत्ताज्ञानविरहदशायां घटाभावबुद्धेर्जायमानायाः प्रमात्वप्रसंगादित्यभिप्रायं
त्. ननु सिद्धान्तिनोपि नतेयाकेन रक्ते घटे श्यामरूपसमवायस्य सत्वात् श्यामरूपवत्ताबुद्धिप्रसंग इत्यतः

दि०क० आह. ममत्वेति. द्वितीयदूषणमाह. वैशिष्ट्यस्येति. ननु वैशिष्ट्यानंगीकारे घटाभावभूतलयोः कः संवं
धः स्वरूपसंवंध इति चेत्. तथा सति घटशून्यतादशायामिव घटवत्तादशायामपि भूतले घटाभाव
वुद्धिस्तव मतेपि स्यात्. घटाभावभूतलयोस्तत्स्वरूपसंवंधस्य च सत्वादत आह। एवं चेति. तत्तत्कालीन
व४ मिति. घटाभाववद्भूतलमिति ज्ञानकालीनमित्यर्थः तत्तद्भूतलादिकमिति. यत्र भूतले घटाभाववुद्धि
स्तद्भूतलादिकमित्यर्थः. तत्तदभावानामिति यस्य अभाववुद्धिस्तस्येत्यर्थः तथा च न स्वरूपमात्रं सं 67
वंधः किंत्वीदृशः स्वरूपविशेष इति न पूर्वोक्तातिप्रसंग इति भावः नव्यास्तु वैशिष्ट्यं पदार्थान्तरमेव भूत
लं घटाभाववदिति प्रत्ययात्. स्वरूपसंवंधाभ्युपगमे चाभावाधिकरणानन्त्यस्वरूभेद तावन्मात्रवि
षयकर्माद्यविनिगमनाविरहः इत्याहुः द्रव्यादिषट्कान्योन्याभावइति. इह च द्रव्यत्वादिकं न प्रतियो
गितावच्छेदकं अननुगमात्. किंतु तत्तद्रूतषट्कसंवंधिं प्रतियोगितावच्छेदिकाद्विप्रतियोगिकभेद ॥३०॥

ऊ वद्धि ना

स्याद्धत्वमिवेति ध्येयं. वस्तुतस्तु भावभिन्नत्वमेव तथा बोध्यं. अत्र केचित् भावभिन्नत्वस्य अभावत्वे भाव
त्वरूपविशेषणज्ञानं भूतान्यकाले घटो नास्तीति प्रतीत्यनापत्तिः एवं अन्योन्याभावत्वस्याऽभावत्वग
र्भस्याग्रेव[illegible]व्यतया अभावत्वस्य अन्योन्याभावत्वगर्भत्वे अन्योन्याश्रयापत्तिः एवमभावत्वस्याभा
वभिन्नत्वरूपत्वे अभावो न भाव इति वाक्याच्छाब्दबोधानुपपत्तिश्च उद्देश्यतावच्छेदकविधेययोरैक्यादि
ति तस्मादखंडोपाधिरनुयोगिताविशेषो वा अभावत्वमिति वदन्ति. अत्र नव्याः अभावत्वस्याखंडोपा
धित्वे प्रमाणाभावः किंतु भावभिन्नत्वं समवायसामानाधिकरण्यान्यतरसंबंधावच्छिन्नप्रतियोगिताक
सत्ताभावरूपं तच्च पूर्वानुपस्थितमपि प्रकारः एवं च घटाभावपटाभावप्रतीतीनामभावांशे अनुगतत्वम
प्युपपद्यते. न च विषयितानवस्था सत्तात्यन्ताभावव्यक्तेः स्वरूपत एव प्रकारत्वोपगमात्. अत एव सत्तारू
पप्रतियोगिज्ञानं विनापि घटो नास्तीति बुद्धौ सप्रकारः अभावत्वप्रकारकप्रत्यक्ष एव प्रतियोगिधिः

दि०क० योहेतुत्वात्. अन्यथारइदंतमइतिप्रतीत्यानापत्तिः नचसत्ताभावरूपस्याभावत्वस्यानुपस्थितस्य
प्रकारत्वे विशेषणाधियो हेतुत्वे व्यभिचार इति वाच्यं. विशेषणभेदेन हेतुतायाः भिन्नत्वेन तत्र तद्धेतु
त्वानुपगमात्. फलानुरोधित्वात्. कल्पनाया इति प्राहुः संसर्गान्योन्याभावभेदत इति मूलादे
कः संसर्गस्त्वोऽपरोन्याभावइति प्रतीयते. तच्चायुक्तं संसर्गस्याभावत्वांगीकारादित्यत आह
संसर्गाभावेति. तथाच द्वन्द्वान्ते श्रूयमाणस्याभावपदस्य प्रत्येकमभिसंबंधात्संसर्गाभावोन्यो
न्याभावश्चेति मूलार्थः क्रमेण द्वयोरभावयोर्लक्षणमाह. संसर्गाभावत्वमिति. अन्योन्याभावे
तिव्याप्तिवारणायान्योन्याभावभिन्नेति. घटादावतिव्याप्तिवारणायाभावपदं. एवमग्रेपि. तादा
त्म्येति तादात्म्यत्वेन तादात्म्यावच्छिन्नत्वं प्रतियोगितायां विवक्षितं तेन संयोगत्वावच्छिन्नप्रति ॥३१॥
योगिताके संयोगात्वंताभावे नातिव्याप्तिः प्रागभावस्य लक्षमाह. विनाश्यभावत्वमिति. अत्रध्वं

68

सेतिव्याप्तिवारणायविनाशीति। ननुप्रागभावसत्वेकिंमानमितिचेत्. अत्रोत्पन्नस्यपुनरुत्पादप्रि
यातत्सिद्धिरितिप्राचः केचित्तुजातोघटइत्युत्पन्नोघटध्वंसइतिप्रत्ययबलेननाशोतिरिच्यते. न
नुप्रागभावः इदानींघटप्रागभावइतिलोकानांप्रत्ययाभावात्. नचतद्घटोपधायकतत्कपाल
नत्संयोगादीनांतस्यघटोत्पत्तिकालेपिसत्वात्पुनरपिघटोत्पत्त्यापत्तिः प्रागभावानंगीकारेचतदभा
वादेवनपुनस्तदुत्पत्तिरितिवाच्यं. जन्यद्रव्यत्वावच्छिन्नंप्रतिजनकतयाक्लृप्तस्यसमवायसंबंधावच्छि
न्नप्रतियोगिताकद्रव्याभावस्यविरहेणैवतदापत्त्यसंभवात्. नचजन्यद्रव्याभावस्यजन्यद्रव्यो
त्पत्तिकालीनोत्पत्तिकध्वंसाभावस्यवाहेतुत्वमित्यत्रविनिगमनाविरहेणतादृशद्रव्याभावस्यतादृशा
त्पन्नाभावानांचकारणतामपेक्ष्यलाघवादेकःप्रागभावोहेतुःकल्पनइतिवाच्यं. प्रागभावकल्पनेपित
त्कालोत्पत्तिकानन्तपदार्थप्रतियोगिताकानामनन्तानांप्रागभावानांविनिगमनाविरहेहेतुतायाःदु

दि०क०

वीरत्वात्. तथा च प्रागभावस्य धर्मिकल्पनागौरवं परमतिरिच्यात इत्याहुः अत्र वदन्ति स्वानधिकरणेषु
तन्तुषु पटोत्पत्तिवारणाय सहस्रतन्तुकपटस्थलेवहूनां तन्तूनां तत्संयोगानां च तत्तद्व्यक्तित्वेन हेतुत्वक
ल्पनापेक्षया एकप्रागभावस्य हेतुताकल्पनालघीयसी. अथैवमपि द्वित्रिचतुर्थसंयुक्तेषु तन्तुषु सह
स्रतन्तुकपटोत्पत्त्यापत्तिः न च चरमसंयोगव्यक्तेस्तद्व्यक्तित्वेन हेतुत्वान्नापत्तिरिति वाच्यं. तथा सति स्वा
नधिकरणतन्तुष्वपि चरमसंयोगाभावादेव पटोत्पत्तिवारणाय संभवेन प्रागभावकल्पनानौचित्या 69
दिति चेन्न. चरमसंयोगस्य समवायघटितसामानाधिकरण्यप्रत्यासत्त्या हेतुत्वेन तन्त्वन्तरेपि समवे
येन घटोत्पत्त्यात्तत्र समवायेन चरमसंयोगाभावेन व्यभिचारापत्त्या कालिकसंबंधेन तस्य घटत्वाव
च्छिन्नं प्रति चरमस्य तन्तुसंयोगव्यक्तेः कालिकसंबंधेन हेतुता वाच्या तथा च स्वानधिकरणतन्तुष्वपि कालि
कतया चरमसंयोगसत्त्वादुत्पत्तिवारणाय प्रागभावहेतुत्वस्यावश्यकत्वादिति एवमप्यस्तु कस्मिन्नाति ॥३२॥

मोर पटो।

तत्पटोत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगिषु व्यभिचार इत्यर्थः अत्र हेतुतावच्छेदकतयावश्यकस्य तस्य कार्यतावच्छेदकत्वे व्यभिचार इत्यत्र तात्पर्यं.२

रितेः पदार्थत्वव्यापितस्य सप्रतियोगित्वे प्रमाणाभाव इति तु न शंकनीयं. ध्वंसस्य लक्षणमाह. जन्याभावत्वमिति प्रागभावेतिव्याप्तिवारणाय जन्येति. अत्यंताभावस्य लक्षणमाह नित्येति ध्वंसादिवारणाय नित्यपदं. नन्वत्यंताभावस्य नित्यत्वे घटानयनानंतरमपि भूतले घटो नास्तीति प्रतीत्यापत्तिरित्यत आह. यत्रेति. तथा च संबंधाभावादेव घटानयनानंतरं घटात्यंताभावबुद्धिर्नेति भावः. कालविशेषविशिष्टस्वरूपस्य संसर्गत्वोपगमादेव घटवति घटो नास्तीति प्रतीत्यभावोपपत्तौ चतुर्थसंसर्गाभावे मानाभाव इत्यस्वरसः केचिदित्यनेन सूचितः ननु मास्तु घटकाले घटात्यंताभावबुद्धिः घटोत्पत्तेः प्राक्काले तु स्यादित्याशंक्याह. अत्रेत्यादिना ननु तर्हि रक्तरूपप्रागभावाधिकरणे श्यामघटे श्यामरूपध्वंसाधिकरणे च रक्तघटे कथं रक्तो नास्ति श्यामो नास्तीति प्रतीतिः ध्वंसप्रागभावयोरधिकरणे अत्यंताभावस्यासत्वादित्यत आह. श्यामघट इति तत्रेति ध्वंसप्रागभावयोरित्यर्थः अन्यथा

दि०न्या०

भावेनसहेतिशेषः तथाचनव्यमतेपूर्वपक्षिकथितशंकायामिष्टापत्तिरेवेतिभावः युक्तंचैतन्नूक्त
चमन्यथापूर्वमग्रेपिरक्तेमध्येश्यामेघटेरक्तंरूपंनास्तीत्याकारप्रत्ययः तस्यसामान्याभावगा वा२
हित्वात्· नचैतादृशप्रत्यययोररक्तिमध्वंसावगाहीपूर्वापररक्तिमध्वंसप्रागभाववतिरक्तेपिः
तादृशाकारप्रत्ययप्रसंगादिति. नचरक्तत्वावच्छिन्नप्रत्ययप्रसंगादिति. नचरक्तत्वावच्छिन्न
प्रतियोगिताकत्वं ध्वंसप्रागभावयोरव्याप्यवृत्तित्वेनान्तराश्यामेरक्तंनास्तीतिप्रत्ययः तद्ध्वंसप्र 70
गभावयोः सामान्यावच्छिन्नप्रतियोगिकत्वस्वीकारात्. नतुपूर्वापररक्तिमध्वंसादिमतिरक्तेन
त्रतदानदनभ्युपगमादितिवाच्यं विनिगमनाविरहेणपदार्थान्तरध्वंसप्रागभावयोरपितत्स्वी
कारप्रसंगेनगौरवात्. तदपेक्षयाऽत्यन्ताभावस्यान्तराश्यामादौसंबंधकल्पनेलाघवादित्यन्य
त्रविस्तरः नन्वभावस्तुद्विधेत्यादिविभागोनुपपन्नः अभावएवमानाभावादित्यभिप्रायेणप्राभा ॥३२॥

करः शंकते। नन्विति। अभावस्याधिकरणात्मकत्वे गौरवं प्रदर्शयितुं नन्वित्युक्तं। अतिरिक्तेति। भावा
तिरिक्तेत्यर्थः। अभावस्याधिकरणात्मकत्वे अभेदे आधाराधेयभावानुपपत्तिरूपो यो दोषः सोप्यस्मन्म
ते नेत्याह। एवं चेति। अधिकरणापेक्षया अतिरिक्तत्वे इत्यर्थः। न च भावाधिकरणकाभावस्याधिकरणा
त्मकत्वे यथाधाराधेयभावोपपत्तिस्तथा सर्वत्राप्यस्त्वित्यतो दूषणान्तरमाह। एवं चेति। अन्यथा अभा
वस्याधिकरणात्मकत्वे एतेन वक्ष्यमाणा दूषणेन परस्परधर्म्मीपन्नानां सप्तपदार्थानामेव परस्प
रभेदकत्वं ज्ञापयितुमाह। इदानीमिति। पदार्थनिरूपणानन्तरमित्यर्थः। तदनिरूपणेन तत्पदार्थस्य त
त्पदार्थघटितसाधर्म्यनिरूपणासम्भवादिति भावः। समानो धर्मः सधर्मस्तस्य भावः साधर्म्यं एवं
वैधर्म्यमित्यत्रापीति भ्रमवारणाय बहुव्रीहिमाह। समाधर्मो येषामिति। केवलान्वयित्वादिति। विषय
भेदेन विषयतायाः भेदेपि ज्ञानविषयत्वेन केवलान्वयित्वमस्त्येवेति भावः। एवमग्रेपि ज्ञेयत्वादौ इत्य

गौर

दि०क०

त्यादिपदैर्थं दर्शयति. एवमभिधेयत्वेति. अभिधेयत्वमभिधाविषयत्वं. अभिधा च शक्तेनयालौकिक
पदार्थ इति मीमांसकाः. शक्तेभिन्नायामभिधायां मानाभावात्संकेत एवाभिधेयेति नैयायिकाः. प्र
मेयत्वादिकमित्यादिनाऽस्तित्वपरिग्रहः. अस्तित्वं च कालसंबंधित्वं द्रव्यादीनां षण्णां साधर्म्यं भावत्वे
स्पष्टमतस्तदुपेक्ष्य द्रव्यादिपंचानां साधर्म्यं मूले प्रपंचितं द्रव्यादय इत्यादिना अनेकत्वेकवैति भा स४
वत्वमिति. एवं मूले द्रव्यादयः पंचेत्युद्देश्यपदं भावत्वे सत्यनेक इति विधेयपदमिति बोध्यं. 71
अत एव भाष्ये पंचानामित्युक्तं ननु पंच भावानामिति. अनेकवृत्तीत्यादि. अत्र चानेकभाववृत्तित्वं स्व
प्रतियोगिवृत्तित्वस्वसमानाधिकरणोभयसंबंधेन भेदविशिष्टत्वे सति भाववृत्तित्वं तेन गुणादौ
संख्यारूपस्यानेकस्याभावेपि न क्षतिः भावरूपताद्दशधर्ममादाय समवायेतिव्याप्तिवारणाय पदा ॥३४॥
र्थविभाजकोपाधीति उपाधिमत्ता च समवायस्वरूपसंबंधेन तेन कालिकसंबंधेन ध्वंसस्य ताद्द
शरूपभेदस्य प्रतियोगिरूपं तद्वृत्तित्वं रूपभेदसमानाधिकरणं च गुणरूपभाव४ पताद्दशोपाधौ सत्वात्तमादाय गुणे लक्षणसंगतिः
संबंध्यान्तर१

अनयैव रीत्या सर्वत्र बोध्यं. प्रथमदलानिवेशे यद्यपि ह्रदसामानाधिकरण्यस्वसमवायत्वे सत्वान्नमाद्यन त्राति व्याप्तिरेवं द्वितीयदलानिवेशे समवायभेदप्रतियोगिवृत्तित्वस्वसमवायत्वेपि सत्वात् पुनस्तत्रैवातिव्याप्तिरिति द्वितीयदलनिवेशः ४

शोपाधिमत्वेपिनक्षतिःसमवायेनोपाधिमत्वविवरणेतुसामान्यादावव्याप्तिःस्यादतस्तत्रोक्तं अन्य

तरत्वघटकस्वरूपंतुकालिकसंबंधेपि ~~ध्ःसंसमरंसोपाधिमत्वेपिनक्षतिःसमवायेनोवं~~ वृत्तेः

ग्राह्यंतेनननध्वंसेतिव्याप्तिःअत्रचसमवेतवृत्तिपदार्थविभाजकोपाधिमत्वंद्रव्यादिचतुर्णांसाध

र्म्यंबोध्यं.उद्देश्यतावच्छेदकस्यचरममुपादानमयुक्तमतोयोजनयातदर्थंदर्शयतिअगुणकर्म

णमिति.निर्गुणाक्रियाइतिमूलंतदर्थस्यगुणक्रियात्यन्ताभाववत्वंतेनगुणक्रियान्योन्याभाववर्म

नि४ दायद्रव्येनाव्याप्तिःयद्यपिगुणोति।नचगुणगुणिनोर्वामदक्षिणगोविषाणवत्समानकालीनत्वात्

कथंगुणशून्यत्वमितिवाच्यंनिर्गुणोगुणोत्पत्तिस्वीकारेणतत्संभवात्.नचैवंघटादेराद्यक्षणेवा वच्छिन्नस्य इ

स्तुमत्वंनस्यादितिवाच्यंइष्टापत्तेःनव्यापीति.गुणवत्ताचसमवायेनगुणवत्त्ववद्गुणवन्नैर्गुण्यादेरसंग्रहे

पिनक्षतिःगुणवद्वृत्तित्वंचसमवायस्वरूपान्यतरसंबंधेनतेनसमवायेनगुणवद्वृत्तित्वाभि

तेनकालिके

धानेतादृशद्रव्यत्वप्रकारकप्रमाविशेष्यत्वस्य द्रव्ये सत्त्वादतिव्याप्तिः अथ तेनैव तद्वत्त्वं नाद्येन दासा
मान्यादावव्याप्तिरिति परास्तं पदार्थविभाजकपदस्य कृत्यमाह · आकाशत्वादिकं त्विति · कर्मवद्वृ
त्त्याकाशत्वरूपोपाधिमत्याकाशेऽतिव्याप्तिवारणायतत्पदमिति भावः जात्यादीनामप्येकार्थस
मवायसंबंधेन सामान्यत्वात्सामान्यपरिहानाय इति मूलमयुक्तमतो व्याचष्टे सामानाधिकरण न्याः
त्वमिति तथा च सामान्यनिरूपिताधिकरणतान सामान्यादावेकार्थसमवायस्याधिकरणतानि
यामकत्वाभावादिति भावः अप्रसिद्धत्वात्पारिमाण्डिल्यपदार्थं निर्वक्ति पारिमाण्डिल्यमिति तद्भिन्नाः
नां ननु द्व्यणुकपरिमानस्यापि कारणत्वाभावात्तत्रातिव्याप्तिरतः पारिमाण्डिल्यपदं द्व्यणुकादि
परिमानस्यापि लक्ष्यत्वपरमित्यभिप्रायेणाह · अणुपरिमाणं त्विति · परमाणुद्व्यणुकसाधारण
मणुपरिमाणं त्वित्यर्थः पारिमाण्डिल्यस्य कारणत्वे बाधकमाह तद्धीति · अणुपरिमाणं हीत्यर्थः ॥ ॥३५॥

उपलक्षकत्वेन तस्यापि २

तथेति च स्वार्थेन त्रेहेतुमाह परिमाणस्येति· स्वसमानजातीयेति स्वाजात्यमहत्त्वपरिमाणविश्रामकैः
रूपेणबोध्यं· अणुजन्यस्येति· उत्कृष्टं चाणोरणुतरमेवेति भावः· न चाणुजन्यस्याणुतरत्वमस्तु किं
बाधकमिति वाच्यं तथा सति त्रुटेरचाक्षुषत्वप्रसंगात्· ननु तर्हि द्व्यणुकादिपरिमाणस्य किं जन
कमिति चेत्· संख्यैवेत्यवेहि व्यक्तौ न विघ्नमिति चेदमुपरिष्टात् मूलस्य न्यूनतां परिहरतीति एवमि
ति बोध्या इत्यनेनान्वयः नकारणानीति बाध्यो इत्यर्थः· ऐन्द्रियकयोर्महत्त्वसामान्ययोः स्वविषयकलौ
किकप्रत्यक्षे हेतुत्वात् परममहत्त्वातीन्द्रियत्वे इह विशेषेणानुयोगिप्रत्यक्षे पारिमाण्डल्यस्यापि वि
षयविधया कारणत्वात् पारिमाण्डल्यभिन्नानामित्याशयमुक्त्वा मनस्याह· इदमपीति यथायोगमुध
र्मणीयविषयकं प्रत्यक्षं तर्यो विद्यमानविषयकमपीति भावः· ननु ज्ञायमानसामान्यस्य प्रत्या
सत्तित्वेन ज्ञायमानहेतोश्चानुमितिकरणत्वेन पारिमाण्डल्यस्य सामान्यलक्षणा ज्ञाना जन्यज्ञाने॰

३२

टि०प० नुमितौ च कारणत्वात्पारिमाण्डल्यभिन्नानामिति मूलमसंगतमतमाह. जायमानमिति. आत्ममानस
मितिविषयतयाऽप्यलौकिकप्रत्यक्षे समवायेन महत्त्वहेतुत्वादिति भावः यद्यपि स्वप्रत्यक्ष इत्येव वक्तु
मुचितं. तथापि टीकाकृन्मते आत्मैकत्वे महत्त्वयोरयोग्यत्वात्स्वप्रत्यक्षं न संभवतीत्यात्ममानस इत्युक्तं.
केचित्तु. कारणत्वमन्यत्र पारिमाण्डल्यादिभ्य इत्यादि भाष्ये आदिग्रहणात्परममहत्त्वं गृह्यत इति
वदतामाचार्याणामात्मपरिमाणमपि न क्वचित्कारणमित्याशयो लभ्यते न च परममहत्त्वपदमात्मः 73
परिमाणातिरिक्तपरममहत्त्वपरमिति वाच्यं. मानाभावादिति वदन्ति. तन्मतं दूषयितुमुपन्यस्यति नात्मी
वीति. आत्ममहत्परिमाणस्यापीत्यर्थः ज्ञानातिरिक्तप्रत्यक्षेति कारणत्वं च ज्ञानधर्मेतरकार्यापे
क्षया इत्याचार्यग्रंथः ज्ञानधर्मा ज्ञानादयः तदतिरिक्तभावकार्यं प्रति कारणत्वं पारिमाण्डल्यः ॥३६॥
भिन्नानां साधर्म्यमित्यर्थः एवं च पारिमाण्डल्यादीत्यादिपदेन परममहत्त्वं गृह्णतामाचार्याणामा

सयो१ स्पा१ घट१ नि४ द्वौ मो१

शायाँ पारिमाण्डिल्यपरममहत्वादीनां च ज्ञानातिरिक्तं प्रति न कारणत्वं नतु कारणं सामान्यांवस्तदनुम
न इति भावः॥ अत्राचार्यैः पारिमाण्डिल्यादीत्यादिपदार्थेषु सुखदुःखादेरजनितावयविरूपादेः प्राक्
जनकपरमाणुरूपादेश्चागणनात्तेषां लक्षणत्वमनुमतं एवं च तेषु ज्ञानातिरिक्तभावकार्यफलोपधा
यकत्वरूपस्याचार्यलक्षणस्याव्याप्तिं परिचिन्त्य सपक्षान्त्युक्ते ग्रंथकृतोध्येयं मूले अन्यथासि
द्धीति दंडत्वादेर्नियतपूर्ववर्तितायाः सत्वादिति व्याप्तिरनुक्तमन्यथासिद्धिशून्यस्येति तद्घटत्वा
वच्छिन्ने अन्यत्र क्लृप्तनियतेस्याद्यन्यथासिद्धिमत्त्वपि घटत्वावच्छिन्ने अनन्यथासिद्धस्तद्रासभेति
व्याप्तिवारणाय नियतेति नियतपूर्ववर्तिजातीयत्वेऽर्थः तेनारण्यस्थदंडादावपि स्वरूपयोग्यताः
संपत्तिः तज्जातीयत्वं च नियतपूर्ववर्तितावच्छेदकदंडत्वादिमत्त्वमेवेति यत्समवेतमिति. यदवच्छि
न्नेत्वकारणतावच्छेदकयद्धर्मावच्छिन्ने समवायसंबंधेनोपद्यते तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्न

दि०क० मित्यर्थःघटत्वावच्छिन्नंहिस्वकारणतावच्छेदककपालत्वाद्यवच्छिन्नेसमवायसंबंधेनोत्पद्यतइ
तिसमवतिघटत्वावच्छिन्नंप्रतिकपालत्वावच्छिन्नंसमवायिकारणंस्वकारणतावच्छेदकेसुक्त्वा
चनद्रव्यत्वादेर्घटादिसमवायिकारणतावच्छेदकत्वमितिनानासत्त्वमिति.इदंचसमवायिका
रणादावतिव्याप्तिवारणायपटासमवायिकारणतन्तुसमवेततन्तुत्वादावतिव्याप्तिवारणाय
जनकमिति.ननुत्वस्यचान्यथासिद्धत्वेनान्यथासिद्धिनियतपूर्ववर्त्तितायाअभावेनातिव्या 74
ति४ प्तिप्रसंगःमुक्तावल्यामत्रेयद्यपीतुरीतन्तुसंयोगस्यपटंप्रतिकुतोसमवायिकारणत्वमिति ना४
तुनाशंकनीयं.तुरीतन्तुसंयोगनाशेपटनाशापत्तेःअसमवायिकारणनाशस्यद्रव्यनाशजन
कत्वात्.नचासमवायिकारणनाशस्यद्रव्यनाशकत्वेप्रमानाभावइतिवाच्यं.द्व्यणुकनाशान्य ॥३१॥
यानुपपत्तिरेवमानमिति.नचतन्तुषुविनष्टेषुविनैवसमवायिकारणंक्षणद्वयंद्रव्यस्थितिः

चर धिर

स्यादितिवाच्यं. इष्टापत्तेः कारणान्तरकल्पने गौरवात्. अथऽव्यासमवायिनाशयोः कथं हेतुमद्भा
व इति चेत्. अत्राहुः प्रतियोगितयाऽनाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसमवायिसमवेतत्वकालि
कसंबंधेन विशेषणत्वोभयसंबंधेन नाशत्वेन हेतुतेति. इह कालिकसंबंधस्य कारणतावच्छेदक
संबंधत्वे घटादेः क्षणिकत्वापत्तेरतो स्वप्रतियोगिसमवायिसमवेतत्वनिवेशः स्वप्रतियोगिजन्यत्वसं
बंधश्च दंडनाशात्. घटनाशापत्तेरुपेक्षितः भाविनाशमादायातिप्रसंगवारणाय कालिकसंबंध
च४ प्रवेशः यदि कपालपवनसंयोगनाशात्. घटनाशापत्तिरेवमपि दुर्वारेति विभाव्यते तर्हि स्वप्रतियो
गिजन्यत्वस्वप्रतियोगिसमवायिसमवेतत्वकालिकविशेषणतैतत्त्रितयसंबंधेन नाशत्वेन हेतुता
वाच्या न चैवमपि तुरीतन्तुसंयोगनाशस्य पटनाशापत्तिरिति वाच्यं. तुरीतन्तुसंयोगस्य पटं प्रति कार
णत्वेन. किंतु तुर्य्यवसंयोगसंबंधेन तन्निष्ठा सती पटजनिकेति. तत्रातिप्रसंगाभावात्. एवं विशेषण

तु।

क्षणेषु तुरीतन्तुसंयोगादिभेदानामप्रवेशेन लाघवमपीति केचित्. वस्तुतस्तु स्वप्रतियोगिनिष्ठसम
वायिकारणतानिरूपितफलोपधायकजन्यत्वसंबंधेन नाशत्वेन हेतुता तुरीतन्तुसंयोगस्तु निमि
त्तं न तु समवायीति न तन्नाशेन पटनाश इत्यन्यत्र विस्तरः वेगादीनामित्यादिना स्पर्शपरिग्रहः
अभिघातादीत्यादिना नोदनपरिग्रहः ज्ञानादीत्यादिना इच्छापरिग्रहः इच्छादीत्यत्र प्रवृत्तेः परि
ग्रहः तन्तुसमवेतत्वे सति तुरीतन्तुसंयोगाद्यन्यत्वे सति पटकारणत्वं पटासमवायिकारणत्वमिति
विशिष्यैव लक्षणं वक्तव्यमित्याह तथापीति. वस्तुतस्तु तुरीतन्तुसंयोगत्वावच्छिन्नप्रतियोगिता
कभेदः पटासमवायिकारणलक्षणघटकतया ग्रंथकर्तुरभिप्रेतं किंतु तन्तुभिन्नसमवेत
त्वावच्छिन्नभेद एव अन्यथा हस्ततन्तुसंयोगादिभेदानां पृथक् निवेशापत्त्या भेदकूटनिवेशेन गौर
वादिति ध्येयं. एतेन तन्तुमात्रसमवेतनिवेशे नैवोपपत्तौ तुरीतन्तुसंयोगादिभेदानां पृथक् निवेशा ॥३८॥

तन्तुर

75

पत्याभेदकूटनिवेशेनगौरवादितिध्येयं॥एतेनतन्तुमात्रसमवेतेनतन्निवेशेनैवोपपन्नेतुरीतन्तुसंयोगा
न्यत्वनिवेशनमनुचितमित्यपास्तं.मात्रपदस्यास्मदुक्तार्थकत्वात्.एवमिच्छाद्यसमवायिकारणलक्षणे
आत्ममात्रसमवेतत्वावच्छिन्नप्रतियोगिताकभेदएवनिवेश्योनतुज्ञानत्वावच्छिन्नभेदइतिबोध्यं.नर्थ
चेति.द्विविधप्रत्यासत्तिविवक्षणेचेत्यर्थः.फलितार्थइति.द्विविधप्रत्यासत्त्योरितिशेषः.पर्यवसितम
समवायिकारणलक्षणमाह.इत्थंचेति.कार्यैकार्थप्रत्यासत्तिसमवायिसंबंधः.कारणैकार्थप्रत्या
सत्तिःस्वसमवायिसमवेतत्वसंबंधः.समवायस्वसमवायिसमवेतत्वान्यतरसंबंधेनकारणत्वे
सतिआत्मविशेषगुणान्यत्वेसामान्यतोसमवायिकारणमित्यर्थः.अत्रपटासमवायिकारणस्य
तन्तुसंयोगस्यपटरूपासमवायिकारणस्यतन्तुसंयोगस्यपटरूपासमवायिकारणस्यतन्तुरूप
स्यचसंग्रहायसमवायस्वसमवायिसमवेतत्वयोःप्रवेशः.घटरूपेप्रतिघटस्यासमवायिकार

तथाच ४

तथा च घटस्य तादात्म्येन तन्तुना नान्यथेति भावः २

दि०क० णानावारणायेतादृशान्यतरप्रत्यासत्त्यासमवायिकारणे प्रत्यासन्नत्वे सति कारणत्वं परित्यज्य तादृ
शान्यतरप्रत्यासत्त्या कारणत्वपर्यन्तानुधावनं आत्मविशेषगुणान्वारयितुं विशेष्यभागः अनुका
र्यनाशजनकनाशप्रतियोगित्वं तत्त्वमिति न च द्वित्वनाशप्रयोजकनाशप्रतियोगिन्यामपेक्षाबु
द्धावतिव्याप्तिरिति अवयवमात्रसंयोगत्वं द्व्यासमवायिकारणत्वमित्यादिविशिष्यैव लक्षणं नि
र्वाच्यं अखण्डोपाधिरेव वा तदित्यन्ये निमित्तं कारणमिति अत्रेदं बोध्यं समवायिकारणासम 76
वायिकारणत्वान्यकारणत्वमेव निमित्तकारणत्वं तेन तुरीपटसंयोगं प्रति तुरीतन्तुसंयोगस्या
समवायिकारणत्वेपि न तस्य पटं प्रति निमित्तकारणत्वक्षतिरिति यत्कार्यप्रतीतिः यद्धर्मावच्छि
न्नप्रतीत्यर्थः येन रूपेणेति यद्रूपावच्छेदेनेत्यर्थः इत्थं च तद्धर्मावच्छिन्ननियतपूर्ववृत्तिग्रहविशेष्य
तावच्छेदकत्वे सति तद्धर्मावच्छिन्नं प्रति स्वतन्त्रान्वयव्यतिरेकशून्यत्वं तद्धर्मावच्छिन्नं प्रत्यन्यथाः ॥३९॥

निरूपित २ त्व २

सिद्धत्वं प्रथममित्यर्थः द्वितीयान्यथासिद्धं दंडरूपादिवारणाय सत्यन्तं. कपालसंयोगो घटपूर्ववृत्ती
त्यादिग्रहे कपालस्यापि तादृशविशेष्यतावच्छेदकत्वात्तत्रातिव्याप्तिवारणाय विशेष्यं. किंतु कारणमि
ति कारणत्वं चात्र पृथगन्वयव्यतिरेकशालित्वं. तेन नात्माश्रयः। यथायथं योज्यं स्वातंत्र्येण तत्कार्य
निरूपितान्वयव्यतिरेकशून्यत्वे सति तत्कार्यकारणावच्छिन्नस्वनिष्ठतत्कार्यनिरूपितपूर्ववृत्तित्व
ग्रहविशेष्यताकं यत्तत्कार्यं प्रति अन्यथासिद्धमित्यर्थः कपालसंयोगो घटपूर्ववृत्तीत्यादिपूर्ववृत्ति
त्वग्रहविशेष्यतायाः कपालसंयोगनिष्ठायाः कपालावच्छिन्नत्वात्. कपालसंयोगे तिव्याप्तिवारणा
यसत्यंतं दंडत्वादिवारणाय विशेष्यमिति. अत्रेतरान्वयव्यतिरेकप्रयुक्तान्वयव्यतिरेकशालित्वमि
त्युक्तौ प्रथमद्वितीयान्यथासिद्धोः संग्रहेपि भेदेनान्यथासिद्धिप्रदर्शनं शिष्यबुद्धिवैशद्यार्थमिति ध्ये
यं. अन्यं प्रतीति फलाननुगुणमन्यं प्रतीत्यर्थः तेन न कुलालजनके चतुर्थान्यथासिद्धावतिव्याप्तिः शं

दि॰ का॰

कृतेशब्दाश्रयत्वेनेति॰ अन्यं प्रतीत्यादि तृतीयान्यथासिद्धभावादिति भावः पंचमीति अवश्यक्लृप्तनि
यतपूर्ववर्त्तिन इत्यस्यार्थः शब्दविशेषे उभयजन्यो जन्यगुणत्वादित्यनुमितेस्तात्मककार्यकारणभाव
ग्रहरूपानुकूलतर्कसहकृतेनैव शब्दे उभयव्याप्तिनो गुणत्वादित्यनुमानेन शब्दाश्रयत्वस्य गगनेग्र
हात्तत्वान्नैव शब्दशब्दरूपेण घटपूर्ववृत्तित्वं ग्राह्यं तथा च शब्दपूर्ववृत्तित्वं गृहीत्वैव गगनस्य घटपूर्ववृत्ति
त्वग्रहात्॰ तृतीयैवान्यथासिद्धिः संभवति॰ तथा च अन्यं प्रतीत्यस्य यथाश्रुतार्थकत्वे अपूर्वं प्रति यागस्या 77
न्यथासिद्धिः स्यात्॰ स्वर्गं प्रतिपूर्ववृत्तित्वं गृहीत्वैव गृहीतकारणत्वस्यान्यथानुपपत्त्या यागस्य व्यापारत्वेना
पूर्वकल्पनादतो अन्यं प्रति पूर्ववृत्तित्वघटितरूपेण यस्य ज्ञानं कल्पनस्य तेन रूपेण तं प्रत्यन्यथासिद्धत्वमिः
त्येतावत्पर्यन्तं विवक्षणमावश्यकं यागस्य स्वर्गपूर्ववृत्तित्वघटितस्वर्गजनकत्वेनापूर्वं प्रत्यन्यथासिद्धत्वेपि
यागत्वेन हेतुत्वे अन्यथासिद्ध्यभावात्॰ एवं च शब्दपूर्ववृत्तित्वघटितशब्दजनकत्वेन गगनस्यान्यथा। ॥८०॥
सिद्धत्वेपि तदघटितशब्दाश्रयत्वेन हेतुत्वे तृतीयान्यथासिद्धिः संभवत्यभिप्रायः शब्दाश्रयत्वाश्र

पृष्ट्यातिरिक्तत्वादिना वा गगनस्य घटं प्रति हेतुत्वेपि तृतीयेनान्यथासिद्धिः अन्यं प्रति पूर्ववृत्ति
त्वानुपपादकं यं प्रति यस्य पूर्ववृत्तित्वं गृह्यते तदित्यर्थात्. नापूर्वं प्रति यागस्यान्यथासिद्धिरित्यपि के
चित्. कत्वादिकमिति. विनिगमनाविरहेण बहूनां वर्णानां कारणतावच्छेदकत्वे गौरवात्. वर्ण
नामसार्वकालिकत्वाच्चाह विशेष्यपदार्थो वेति. यत्कार्यजनकं प्रतीति. अत्राप्यन्यं प्रतीत्यभिधा
नेन तृतीयचतुर्थान्यथासिद्ध्योः संग्रहे फलाननुगुणत्वानुगुणत्वयोर्विशेषणयोरुपादाने न तयोर्भे
देनाभिधाने प्रयोजनाभावः तथापि शिष्यबुद्धिवैशद्याय तयोरुक्तमिति. अवश्यक्लृप्तेति. गंधं प्रत्यव
श्यक्लृप्तेन गंधप्रागभावेनैव गंधोत्पत्तिसंभवे तत्सहभूतरूपप्रागभावादिकं पाकगंधरूपप्राग
भावेन च अन्यथासिद्धं. एवं घटजातीयं प्रति अवश्यक्लृप्तनियतपूर्ववृत्तिभिर्दंडादिभिरेव घ
टोत्पत्तिसंभवे रासभोन्यथासिद्ध इत्यर्थः. नन्ववश्यक्लृप्तनियतवृत्तिना पाकजरूपप्रागभावेन गं

तद ५ पूर्व

स्या२ द्य५ मिह२

दि०के० धसमवेरूपप्रागभावेन गंधप्रागभावस्यान्यथासिद्धिस्यात्. एतत्कारणत्वमवश्यक्लृप्तमित्युक्तौ
चात्माश्रयापादिति चेन्. अत्राहुः लघुनियतपूर्ववृत्तित्वरूपमवश्यक्लृप्तवृत्तित्वं बोध्यं लघुत्वं
चशरीरकृतमुपस्थितिकृतं संबंधकृतं. तत्र प्रथममनेकद्रव्यसमवेतत्वापेक्षया महत्वे द्विती
यं गंधं प्रतिरूपप्रागभावापेक्षया गंधप्रागभावे गंधात्मकप्रतियोँज्ञानसत्वेन. सांख्यं तदुप गि ४
स्थितेः तृतीयं दंडत्वं दंडरूपापेक्षया दंडस्याश्रयदंडसंयोगादिघटितपरंपरायागुरुत्वादिति
ननु निबध्यान्तरेष्वन्यत्रक्लृप्तेति दृश्यते तत्कथमत्रावश्यक्लृप्तेति कृतमतस्तस्य फलमाह अत 78
एवेति. अन्यथा महत्वस्यानेकद्रव्यत्वाद्यन्यत्रक्लृप्तनियतपूर्ववृत्तित्वाभावेन तस्यान्यथासिद्धि
र्महत्वेन न स्यादिति भावः. अत्रानेकद्रव्यत्वेनानेकद्रव्यसमवेतत्वं तस्य द्व्यणुकेपि सत्वेन द्व्यणु
रूपप्रत्यक्षापत्तेः किंत्वणुभिन्नद्रव्यत्वमिति बोध्यं. अन्येषां दंडत्वं दंडरूपाकाशकुलालपित् ॥४९॥

समवेतसमवेतद्रव्यत्वत्वादिरूपेणान्तिंस्याभावेनासप्रत्यक्षानुपपत्तेः:१
द्य

णामनेना पंचमान्यथासिद्धेन चरितार्थत्वात्संग्रहः अनियतरासभादेर्वारणाय नियतेत्यादिः न
चानियतरासभादेः पंचमान्यथासिद्धत्वात्तेनैव वारणान्नियतपदं व्यर्थमिति वाच्यं. अन्यथासि
द्धित्वस्यैकस्याभावेन यत्रः प्रामाणिकानां व्यवहारसिद्धेदस्य निवेशनीयतया नियतपदेनै
वरासभादेर्वारणेन तद्भेदस्याप्रवेशादित्यभिप्रायात्. पूर्ववृत्तित्वं चाव्यवहितपूर्ववृत्तित्वं तेन व्यवहि
तपूर्ववृत्तित्वव्युदासः अत एव च यागादेः स्वर्गकारणत्वानुपपत्त्या अपूर्वकल्पनम् अपूर्वसंबंधे
नाव्यवहितपूर्ववृत्तित्वोपपादनं ग्रंथकृतां संगच्छते. अन्यथा यागस्यापि नियतपूर्ववृत्तित्वाबा
धेनापूर्वकल्पनं न स्यादिति. नचैतादृशकारणत्वे व्यतिरेकव्यभिचारज्ञानस्य नियमांशग्राह
ग्राह्याभावावगाहितया विरोधित्वेप्यं व्यभिचारग्रहस्य कथं कारणताविरोधित्वमिति वाच्यं.
अवश्यक्लृप्तस्यान्यथासिद्धिज्ञानप्रयोजनंत्वात्. तदितरनिखिलतु नकार्य्यः कारणसत्वेनकै

वे।

न्वयर

व२ न३

य्यव्यतिरेकोयद्व्यतिरेकात्. तेनावश्यक्लृप्तेन नियतपूर्ववर्त्तिनानन्यथासिद्धत्वज्ञानात्. नव्यास्तु कारण
त्वस्यानन्यथासिद्धिनियतपूर्ववर्त्तितावच्छेदकधर्मत्वे प्रतिबन्धकाभावस्य तत्र घटकत्वे न हेतुतापत्तिः
यत्र न कारणत्वव्यहारस्तत्कूटकूटवत्त्वं तु सर्वज्ञे नैव ज्ञेयं तत्र घटादिभेदकूटवत्त्वसंबंधेन कार्यविशिष्टो
यो यस्तद्वत्त्वं तदित्यपि न युक्तं तस्य संबंधसंदेहात्. तस्मात्कारणत्वं पदार्थान्तरमेवेत्याहुः तदसत्का
रणत्वस्यातिरिक्तत्वे दंडादौ सर्वदा तत्प्रत्यक्षत्वापत्तेः न चान्यथासिद्धत्वे सतीत्यादिधर्मस्तद्व्यंजक
इति वाच्यं. तादृशधर्मज्ञानस्यावश्यक्लृप्तत्वेन तस्यैव कारणताग्राहकरूपत्वौचित्यात्. अस्तु वा दंडत्वा
दिकमेव कारणत्वं घटादिकार्यसंबंधितया तत्र हेतुत्वधर्मस्य व्यंजकत्वादिति परे तु कार्यान्वयव्य
तिरेककालपूर्वकालान्वयव्यतिरेकशालित्वमित्याहुः तदयुक्तं. आत्मादौ वीरणांसुरवादिकारणे
प्रागभावरूपव्यतिरेका संभवेनाव्याप्तेः मूले गुणकर्ममात्रवृत्त्यसमवायिकारणत्वमित्युक्तं ॥४२॥

7-9

ञ४

तच्चायुक्तं· आत्मविशेषगुणेष्वव्याप्तेरतो वैधर्म्यपर या१

तं मूले व्याचष्टे· समवायिकारणत्वमिति साधर्म्यप्रकारेण वैधर्म्यकथनमयुक्तमित्यात्मविशेष
गुणेष्वव्याप्तेरित्यतो वैधर्म्यपरं तच्चायुक्तमित्याशयादाह· अथवेति· सत्ताभिन्नद्रव्यत्वस्वरूपजातिमति द्र
य३ व्येति व्याप्तिवारणाँ हत्यन्तं तत्रैव सत्ताजातिमादायातिव्याप्तिवारणाय सत्ताभिन्नेति· तत्रैव द्रव्यगुणान्य व२
तरत्वस्वरूपधर्ममादायातिव्याप्तिवारणाय जातीति· वृत्तित्वं जातिमत्त्वं च समवाये विवक्षितं· तेन गु
णादौ द्रव्यत्वकालिकेन वृत्तित्वात्· द्रव्यस्य कालिकेन गुणत्वादिमत्त्वात्· द्रव्ये नातिव्याप्तिः ननु गगना
दिकं सर्वदैवास्तीति व्यवहारान्नित्यद्रव्येष्वपि कालिकसंबंधेनाश्रितत्वसत्त्वादन्यत्र नित्यद्रव्येभ्य इति
मूलमयुक्तमत आह· आश्रितत्वमिति· समवायादिसंबंधेन सर्वधारतानियामककालिकसंबंधाति क३
रिक्तसंबंधेन विशेषणतयेति कालिकविशेषणतयेत्यर्थः· अत्र नित्यद्रव्यातिरिक्तत्वं लक्ष्यतावच्छे
दकं च संयोगेन परमाणोरपि वृत्तेः परमाणावतिव्याप्तिः तत्संयोगस्य वृत्त्यनियामकत्वादिति दिया

न१ धर्मस्य समवायेन विवक्षणान्न द्रव्यगुणान्यतरत्वमादायातिव्याप्तिः तथापि तद्रूपगगनवृत्तित्वरूपधर्मस्य समवायेन वृत्तित्वाज्जातीति६ क४

दि०क० दीनांनवानांत्विति मूलस्थतुशब्देन सूचितमर्थं प्रकटयति इदानीमिति. ननु धात्वर्थः क्रियानत्रा
तिप्रसंग इत्यत आह. कर्मवत्वमिति. वेगवत्वं वेगसंबंधित्वं दिक्कृतयोः परत्वापरत्वयोर्हेतुः इद
मस्मात्संनिकृष्टमित्यपेक्षाबुद्धिः कालकृतपरत्वापरत्वयोर्हेतुः अयमस्मादल्पतरसंबंध इत्य
पेक्षाबुद्धिश्च यत्रोत्पन्ना तत्र परत्वापरत्वयोरनुत्पादाद्व्याप्तिमाशंक्य निरस्यति न चेत्यादिना. आ
त्मन्यतिव्याप्तिवारणाय समानाधिकरणान्तं. तत्रैव सत्तामादाय अतिव्याप्तिवारणाय द्रव्यत्वव्याप्ये 80
ति द्रव्यत्वाप[illegible]नापि जातिर्विशेषणीया तेन द्रव्यत्वव्याप्यद्रव्यत्वमादाय नातिव्याप्तिः अपकृष्टेति. अवि
नुवृत्तिपरिमाणवत्वमित्यर्थः निरुक्तं मूर्तत्वं वेत्यर्थः वस्त्वर्थः पूर्ववदिति. परत्वापरत्वसमाना
धिकरणेत्यादिकथितविवक्षितार्थवदित्यर्थः कालादौ स्पंदाभावेनासंभवमाशंक्याह सर्वमूर्ते ||४३||
ति. आह महतामिति प्रतीतिविषयपरममहत्वस्य गगनपरिमाणादिसाधारणस्य जातित्वसंभ
नेन परमाणौ नातिव्याप्तिः क्रियाजनकतावच्छेदकतया मूर्तत्वं जातिरित्यपि केचित्. तच्चेति.

वेप्यात्मपरिमाणमयोग्यमितिटीकाकृन्मतमनुसृत्याह॰ अपकर्षेति॰ यद्यप्यणुपरिमाणेषु द्व्यणुकप
रिमाणमेवापकर्षाश्रयो न परमाणुपरिमाणमिति परमाणावतिव्याप्तिः तथाँपकर्षानाश्रयमहत्प
ति२ रिमाणवत्त्वं न पावोध्यं। बहिरिंद्रियेति॰ आत्मन्यतिव्याप्तिवारणाय बहिःपदं बहिरिंद्रियग्राह्यसंयोगा
दिमतिकालादिवतिव्याप्तिवारणाय विशेषेति॰ विशेषगुणवत्त्वे च गुणनिरूपणे वक्ष्यते॰ उद्भूतत्वमा
दायातिव्याप्तिवारणाय गुणेति॰ लौकिकत्वनिवेशस्य फलमाह तेनेति॰ ज्ञानो घट इति ज्ञाने च प्रकारी
भूतज्ञानांशेन लौकिकविषयता चक्षुरादेस्तत्र लौकिकसन्निकर्षाभावादिति भावः स्वरूपयोग्यता
निवेशस्य फलमाह नवेति॰ ननु परमाणुरूपादेर्योग्यत्वे कुतो न तस्य प्रत्यक्षमत आह॰ महत्वेति॰ लौ
किकविषयताख्यसमवेतप्रत्यक्षे सामानाधिकरण्यसंबंधेन कारणस्य महत्त्वस्य परमाणुरूपा
दावभावान्न लौकिकप्रत्यक्षमिति भावः ननु चक्षुरिंद्रियादिगतरूपादिविशेषगुणानामनुद्भूत

दि०प०

त्वेन बहिरिन्द्रियग्रहणयोग्यत्वाच्चक्षुरादावव्याप्तिमाशंक्य लाघवाच्चाह. अथवेति. अत्र काले दैशिक-
परत्वापरत्वमादाय मनस्यतिव्याप्तिवारणाय विशेषेति स्पर्शवत्वं समवायेन द्रव्यसमवायिकार-
णत्वादिसत्तादिकमादाय गगनेऽतिव्याप्तिवारणाय द्रव्यत्वव्याप्येति. आकाशशरीरिणामित्यत्र मू-
ले शरीरपदमात्मपरमित्यभिप्रायेणाह. । आकाशात्मनामिति लक्ष्ये लक्षणं गमयितुं शब्दज्ञानादी-
नामव्याप्यवृत्तित्वं क्षणिकत्वं चोपपादयति. आकाशस्येत्यादिना क्षणिकस्य विशेषगुणस्यानभ्यु-
पगमादाह क्षणिकत्वं चेति घटादिव्यावृत्ततृतीयक्षणवृत्तित्वोत्तरक्षणवृत्तीति स्वपदं नाश्यत्वेना-
भिमतपरं तदुत्तरवर्त्तीति द्वितीयक्षणवृत्तिर्यो विशेषगुणस्तन्नाश्यत्वादित्यर्थः. अत्र च यत्र प्रति-
योगितासंबंधेन योग्यविभुविशेषगुणनाशस्तत्र स्वसामानाधिकरण्यस्याव्यवहितपूर्ववृत्तित्वो-
भयसंबंधेन योग्यविशेषगुण इति सामानाधिकरण्येन नाशकत्वं बोध्यं. कार्यतावच्छेदके योग्य- ॥४४॥

81

नु१

त्वोपादानेनप्रायश्चित्तादिजन्यादृष्टनाशेव्यभिचारःयोग्यत्वेचविषयेलौकिकसाक्षात्कारविषयर्वि
निकल्पकान्यतरत्वमतीन्द्रियजातिशून्यत्वंवारूपादिनाशेव्यभिचारवारणायविभ्वितिसंयोगाः
दिनाशेव्यभिचारवारणायविशेषेतिसामानाधिकरण्यसंबंधनिवेशान्नशब्दादिनाव्यधिकरणाना
मिच्छादीनांनाशःस्वाव्यवहितपूर्वप्रवृत्तित्वनिवेशाच्चज्ञानादीनामुत्पत्तिकालींलिकेच्छादिनाशःवेवि ना४
नुत्वत्वस्यतत्प्रत्यक्षपर्यवसायितयाततद्गुणस्यतत्तद्गुणोनाशकःअपेक्षाबुद्धेस्तुद्वित्वप्रत्यक्षमित्या
हुःएतत्क्षणोत्पत्तिकयोग्यविभुविशेषगुणनाश्यताएतत्क्षणोत्तरक्षणवृत्तित्वविशिष्टगुणत्वेनना
शकता।अपेक्षाबुद्धिनाशेद्वित्वप्रत्यक्षंविशेषसामग्रीचरमज्ञानादिकंतुउत्तरक्षणवृत्तित्वविशिष्टस्व
रूपमेवनाशकं।एतत्क्षणोत्पन्नसकलविशेषगुणसाधारणंचेदमित्यप्याहुःशब्दस्याप्यव्याप्यवृत्ति
त्वक्षणिकत्वमुपपाद्यज्ञानादीनामुपपादयति.एवमिति.क्षणिकपदस्यवैयर्थ्याल्लक्षणद्वयाभिप्रा
येणार्थमाहः इत्थंचेति।अव्याप्यवृत्तीत्युक्तेमिति।नचरूपादीनामपिकालिकाव्याप्यवृत्तित्वात्कथं

कारणतावच्छेदकेयोग्यविशेषत्वयोरुपादानान्ननद्वितीयक्षणोत्पन्नादृष्टसंयोगादिनाद्वितीयक्षणेऽपेक्षाबुद्धिनाशः६

दि०वृ० तत्कारणमिति भावः। अव्याप्यवृत्तिपदेन दैशिकाव्याप्यवृत्तित्वस्योक्तत्वाद्विशेषगुण इत्युक्तमिति वि
शेषगुणाश्च बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिकोद्रवः अदृष्टभावनाशब्दाश्चमी वैशेषिकागु
णा इति वक्ष्यमाणाः तल्लक्षणं तु गुणनिरूपणे वक्ष्यते। ननु अव्याप्यवृत्तिविशेषगुणवत्वमीश्व
कु५ रे अव्याप्तं. तेषां व्याप्यवृत्तित्वादिति नचै अव्याप्यवृत्तिपदेनाव्याप्यवृत्तिगुणत्वव्याप्यजातिम
त्वस्य विवक्षितत्वात् नतु. चतुःक्षणवृत्तीति यानि जन्यानि घटादीनि तद्वृत्तित्वं समवायेन विवक्षि 82
ते तेन जन्यमात्रे कालिकेन ज्ञानत्वस्य वृत्तित्वेपि न क्षतिः वृत्तित्वं च जाति ज्ञानत्वादिस्तद्वान्वि
शेषगुणो ज्ञानादिस्तद्वत्वस्यात्मादौ सत्वाल्लक्षणसमन्वयः। अत्र चावृत्तिज्ञानत्वादेर्जन्यवृत्तिः
त्वादसंभववारणाय तदर्थत्वादिति। क्षणिकविशेषगुणवत्वार्थत्वादित्यर्थः। ननु त्रिक्षणवृ ॥४५॥
त्तित्वमुपेक्ष्य चतुःक्षणवृत्तित्वपर्यन्तानुधावने प्रयोजनाभावः। न च त्रिचतुष्टयोर्लाघवगौर

तद्वृत्तिर्या जातिर्ज्ञानत्वादिस्तद्वान्विशेषगुणो ज्ञानादिस्तद्वत्वस्यात्मादौ सत्वाल्लक्षणसमन्वयः अत्र चा५

वविरहेन चतुष्टोपादानेरुच्छेवनियामकेतिनाचं. प्रथमोपस्थितत्वेरूपलाघवस्याभित्वेसंभवा
दत आह. अपेक्षाबुद्धिरिति. तथा च त्रिक्षणवृत्तिप्रवेशे ज्ञानत्वस्य संग्रहो न स्यादिति भावः चतुःक्ष
णवृत्तिजन्यावृत्तीत्यस्य फलमाह. रूपत्वादिकमिति तद्धुपदानः रूपत्वजातेर्व्युदासः तथा च रूपत्व
जातिविशेषगुणवृत्तिघटादौ चातिव्याप्तिः सा निरस्तेति भावः. जन्येत्यस्य फलमाह. ईश्वरेति शरी
रिणामित्यत्र मूले शरीरपदस्य यथाश्रुतार्थकत्वाभिप्रायेण यथाकाशजीवात्मनोरिति. ननु ज
न्यत्वाप्रवेशे ज्ञानत्वेच्छात्वप्रयत्नत्वजातीनां चतुःक्षणवृत्तित्वात्कथं लक्षणसमन्वय इत्यत आह. द्वे
षत्वादिकमिति. आदिना शब्दत्वपरिग्रहः. विशेषपदस्य कृत्यमाह. परममहत्त्वस्येति. तादृशगुण
त्वादिति चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणत्वादित्यर्थः. ननु परममहत्त्वं न जातिः किंत्व
पकर्षानाश्रयपरिमाणत्वमित्युक्तं. तथा च तमादायातिप्रसंग इत्यत आह. चतुर्थक्षणे द्वित्वादीना

दि०क०

मितियद्वानुजन्यपदादानेपरममहत्त्वस्यचतुःक्षणवृत्तित्वात्त्रपरममहत्त्वमादायकालादाव
तिव्याप्तिरतआह· चतुर्थक्षणद्वित्वादीनामितितथात्वादितितादृशजातिमद्गुणत्वादितिप्रथमो
पस्थितत्वेरूपलाघवमनुसंधायाह· त्रिक्षणेतिचक्षुरादीनामित्यादिनाघ्राणादीनांपरिग्रहः· तथा
पिचक्षुरादिष्वपिपृथिवीत्वादेरवत्त्ववद्वृत्तित्वमुपपादयतिघटजातित्यादिनायोगिप्रत्यक्षविषय
त्वसत्त्वादाह· अतिव्याप्तंचेति· घटोवायुमानितिवाय्वंशेउपनीतभानात्मकघटविशेष्यकचाक्षुष
विषयवायुवृत्तिद्रव्यत्वव्याप्यजातिमतिवायावतिव्याप्तिवारणायलौकिकेति· गुरुत्वमिति· गुरुत्वंर
त्तिकमाषकतोलकत्वादिति· इदमुपलक्षणं· पतनत्वमपिबोध्यं· गुरुत्वासमवायिकारणकर्मत्वंउत्क्षे व४
पतनीत्यादिप्रयोगोलाक्षणिकः· वस्तुतस्तुगुरुत्वासमवायिकारणकर्मवृत्तिपतनत्वंजातिविशेषए
व· ननुसप्तानांसाधर्म्यंज्ञेयत्वंतत्कथंतस्यवैधर्म्यमित्याशंक्याहज्ञेयत्वादिकमिति· वायोर्नवैकादश
तेजसोगुणाजलक्षितिप्राणभृतांचतुर्दशदिक्कालयोःपंचषडेवचांबरेमहेश्वऽष्टौमनसस्तथैवचे ॥४६॥

रे१ क०

83

श्री१

तिप्राचीनःक्रक्रमानुसाराद्वायोर्गुणानाह मूले स्पर्शादयोष्टाविति· स्पर्शसंख्यापरिमाणपृथक्त्वसंयोग
विभागपरत्वापरत्वान्यष्टौ वेगाख्यश्चेति वायोर्गुणा इत्यर्थः· तेजसो गुणानाह· स्पर्शादयोष्टाविति। अपां
गुणानाह· रूपमित्यादीति· पृथिव्या गुणानाह स्नेहहीना इति· अतोऽव्यवहितपूर्वोक्ताः· आत्मनो गुणाना
ह· बुद्ध्यादिषट्कमिति। बुद्धिःसुखदुःखेच्छाद्वेषप्रयत्नसंख्यादिपंचकसंख्यापरिमाणपृथक्त्वसंयोगः
विभागाः कालदिशोर्गुणानामैक्यादेकयोक्त्यैवाह· संख्यादिपंचकमिति· आकाशगुणानाह शब्दश्चेति
तथा चाकाशे शब्दः संख्यादयः पंचैवं षड्गुणा इत्यर्थः· ईश्वरस्य गुणानाह· संख्यादय इति अत्र च नवीनाः ई
श्वरस्य परिमाणवत्त्वे मानाभावः न च द्रव्यत्वेन तदनुमानमिति वाच्यं· अप्रयोजकत्वादीश्वरे द्रव्यत्वसत्त्वे मा
नाभावाच्च· अत एव तत्र संयोगविभागयोः सत्त्वेपि मानाभावः पृथक्त्वस्य च गुणत्वमेव निरस्तं तथा चेश्व
रे सुखसंभवस्तथाग्रे व्यक्तीभविष्यति· एवं संख्याबुद्धीच्छाप्रयत्नसुखादीनीति पंचैवेश्वरस्य गुणा इत्याहुः
॥इति श्रीमद्भारद्वाजबालकृष्णात्मजमहादेवभट्टकृतौ मुक्तावलीप्रकाशे प्रथमः परिच्छेदः॥ ॥

नवाजातिपदोपादानाज्जलत्वपृथिव्यन्यतरत्वमादाय १

दि०क० गंधहेतुत्वकालादौ यत्तमतो व्याचष्टे। गंधेति। गंधवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमित्यर्थः तेन सुरभ्यसुर
भिकपालारब्धनिर्गंधघटेनाव्याप्तिः वृत्त्यन्तेन न जलादावतिव्याप्तिः द्रव्यत्वव्याप्येत्यनेन तत्रैव सत्तामादा
य नातिव्याप्तिः। गंधवत्वं वृत्तित्वं च समवायेन तेन कालिकसंबंधेन गंधवति समवायसंबंधावच्छिन्नवृ
त्तिमज्जलत्वादिमति पृथिवीनिरूपितकालिकसंबंधावच्छिन्नवृत्तिमज्जलत्वादिमति जलादौ नातिव्या
प्तिः। प्रमाणोपन्यासायेति। यद्यपि पृथिवीत्वस्य प्रत्यक्षतया न प्रमाणान्तरापेक्षा तथाप्ययोग्यसाधार 84
णेन प्रसक्तासंभवात्साधारणेन पृथिवीत्वसिद्ध्यर्थं तदुपन्यास इति भावः। अन्यथा गंधत्वावच्छि
न्नं प्रति पृथिव्या हेतुत्वानंगीकारे आकस्मिकत्वापत्तेरिति। नियतकारणानियम्यत्वापत्तेरित्यर्थः। तथा
च कार्यमात्रवृत्ते गंधत्वस्य कार्यतावच्छेदकत्वानुरोधेन तदवच्छिन्ने पृथिवीत्वेन न हेतुत्वमावश्यकमि
ति भावः। उदनुपलक्षणं रूपादिनाशकतावच्छेदकतया पृथिवीत्वजातिसिद्धिरिष्टव्या प्रतियोगिता ३ ॥४२॥
संबंधेनाश्रयनाशाजन्यरूपनाशं प्रति स्वसमवायिपृथिवीसमवेतत्वे स्ववृत्तिरूपत्वोभयसंबंधेन वि

समवेतत्वेनस्य नाशकतावच्छेदकसंबंधप्रवेशः तेजोवृत्तिरूपप्रतियोगितासंबंधेन तादृशरूपनाशापत्तिवारणाय २

नाशक १ रूपत्व ४ रूप २

लक्षणे तेजःसंयोगत्वेन नै[illegible]त्वात्·पृथिवीत्वस्य तादृशनाशकतावच्छेदकसंबंधघटकत्वात्॥ अथ नाशजन्यरूपनाशे व्यभिचारवारणाय जन्यान्तं नाशविशेषणं घटाग्निसंयोगेन घटरूपनाशापत्तिवारणाय तेन स्वघटकतया पृथिवीत्वप्रवेशः स्वसमानाधिकरणरसगंधादौ प्रतियोगितासंबंधेन तादृशनाशोत्पत्तिवारणाय स्ववृत्तिरूपत्वस्य नाशकतावच्छेदकसंबंधे प्रवेशः स्ववृत्तित्वं च कालिकविशेषणतया बोध्यं स्वसमवायिपृथिवीसमवेतत्वविशिष्टरूपत्वस्य संबंधत्वे विशिष्टस्वसमवायिसमवेतत्वमादाय विनिगमनाविरहेण नाश्यनाशकभावद्वयापत्तेरिति परित्यागः एतेन पाकजगंधे तेजसः कारणत्वेन अपाकजे रसुरभ्यादिगंधांवयवगतसुरभ्यादेर्नियामकत्वेन गंधत्वेन पृथिवीत्वेन कार्यकारणभावे मानाभावात्पृथिवीत्वं न जातिरिति प्रयुक्तं ननु गंधवत्त्वस्य पृथिवीलक्षणत्वे पाषाणादौ गंधशून्ये ऽव्याप्तिरित्याशंकां निराकुरुते न चेत्यादिना तत्रापि पाषाणादावपि पृथिवीत्वेनेति शेषः गंधसत्त्वात् गंधानुमानात्· ननु पाषाणादौ गंधसत्त्वे अनुपलंभो न स्यादित्यत आह· अनुलब्धिस्त्विति· अनुत्कटत्वेन अनुद्भूतत्वेन ननु पाषाणस्य पृथिवी

: द्रव

सिद्धिः ततश्च पाषाणारंभकावयवेष्वपि पृथिवीत्व५

दि०क० त्वएवमानाभावोनितरांनदृष्टीनगंधवत्वंइत्यतस्तत्रपृथिवीत्वसाधनायमृत्तिकामारचयति·कथमन्यथे
त्यादिना·अन्यथापाषाणादौपृथिवीत्वानंगीकारे तद्भस्मनिपाषाणभस्मनि यद्यपि पाषाणे पृथिवीत्वाभावे
अलक्ष्यत्वादेवतत्रगंधवत्वंलक्षणंनाव्याप्तमितिव्यर्थस्तत्रगंधस्साधनायपरिश्रमस्तथापिवस्तुस्थितिः
मनुरुध्यतयोक्तमिति ध्येयंपाषाणभस्मनिगंधप्रत्यक्षसिद्धः तेन तत्रपृथिवीत्वमंगीकरणीयं·ततश्चभ
स्मारंभकावयवेष्वपिपृथिवीत्वमंगीकरणीयं·भस्मारंभकावयवयोरैक्यादेवपाषाणस्यापिपृथिवी
त्वसिद्धिरित्यभिप्रायः तदेन दूषयति भस्मनोपीति एतेनपाषाणइवतद्भस्मन्यप्यनुद्भूतगंधाभापत्तिवा 85
रणायपाषाणावयवेषुपाकांगीकारस्यावश्यकः एवंचपाकोत्पादितगंधवद्भिःपाषाणावयवैरेवतद्भ
स्मारंभः निर्गंधैस्तैरेवपाषाणारंभइति·अन्यथातद्भेनिर्गंधासंगतिरितिपरास्तं तथासत्युक्तप्रकारे
णपाषाणेपृथिवीत्वसिद्धातेनगंधानुमानसंभवान्दितियदुक्तमिति·अत्रघटध्वंसप्रत्यक्षेघटोपादाने
नुपादेयेव्यभिचारवारणायउक्तपदं·अथवाघटध्वंसजन्यरूपध्वंसेव्यभिचारवारणायतन्निष्ठाश्रा ॥४८॥

प्रथमं१

स्म३ वयवपाषाणां६

घ३

द्व्या२ स्वरूपदंदु१ जनकत्वं२

नध्वंसजन्यकार्यत्वे हि · नवीनमते दंडं प्रागभावध्वंसजन्ये घटे वा व्यभिचारवारणाय द्वितीयं स्वपदं प्रतिवंधकात्यन्ताभावजन्ये व्यभिचारवारणाय ध्वंसपदं · ध्वंसत्वेन चेह विवक्षितं तेन प्राचांमते प्रतिवंधकसंसर्गाभावत्वेन तस्य हेतुत्वेपि न क्षतिः · ध्वंसजन्यत्वं चात्र स्वाद्वारा विवक्षितं · तेन सालग्रामध्वंसजन्ये नारकीयशरीरे न व्यभिचारः · नच दुग्धध्वंसजन्ये दध्नि दुग्धावयवजन्यत्वस्वीकारे दध्नोपि दुग्धत्वापत्तिः दुग्धावयवैर्दधि नैजन्यत इत्यंगीकरणीयं नचात्र दध्नि व्यभिचार इति वाच्यं दध्नो द्व्यणुकादिरीत्या दुग्धध्वंसजन्यत्वास्वीकारात् · द्व्यणुकरूपदुग्धध्वंसजन्यत्वेपि तस्य न तत्र व्यभिचारः तदुपादानपरमाणुजन्यत्वस्य दध्नि सत्वात् · नच दुग्धपरमाणुजन्यत्वेन दध्नोपि दुग्धत्वापत्तिरिति वाच्यं · दुग्धपरमाणोर्दुग्धत्वाभावात् · द्रव्यत्वव्याप्यजातेः परमाणुवर्त्तित्वे मानाभावात् · अन्यथा परमाणुस्वरूपदुग्धजन्यत्वेन दुग्धत्वापत्तिवारणायासंभवात् · दधित्वदुग्धत्वयोः परमाणौ जातिसंकरप्रसंगादिति · मूले नानारूपवत्त्वे लक्षणान्तरमुक्तं तल्लक्ष्ये प्रतिपादयति · शुक्लेत्यादिना अलक्ष्येल

व्याप्तिबोधार्थं दृष्टान्तमाह · दृष्टं चैतदिति १

रूपधर्ममादाय ३

दिनेक० स्त्राणामत्वं प्रतिपादयति न चेति· रूपद्वयेति। रूपद्वयवृत्तिसत्तारूपजातिमतिगुणादावतिव्याप्तिवारणा
य द्रव्यत्वव्याप्येति द्रव्यत्वव्याप्यजलत्वादिमति जलादावतिव्याप्तिवारणाय रूपद्वयवद्वृत्तीति द्रव्यत्वव्या
प्यजलपृथिव्यन्यतरत्वादिमति जलादावतिव्याप्तिवारणाय जातीति· अपेक्षाबुद्धिविशेषविषयत्व
रूपद्वित्वादिघटितत्वेन गौरवेदाह रूपनाशेति· अत्रापि प्रतिपदव्यावृत्तिः पूर्ववद्बोध्या षड्विधस्तु
स्तुरसस्तत्रेति मूलोक्तं रसस्य षड्विधत्वं प्रकाशयति· मधुरेत्यादिना ननु यत्र नानारसानां सत्त्वात्त
त्राव्याप्तिरित्यत आह· अत्रापीति ननु मूले गंधस्तु द्विविधो मत इत्यनेन द्विविधगंधवत्त्वं पृथि
व्या लक्षणं प्रदर्शितं· तन्न युक्तं द्वैविध्यांशस्य वैयर्थ्यादित्यत आह वस्तुस्थितीति वस्तुगत्या गं
धो द्विविधस्तिष्ठतीति सूचयितुमुक्तं न तु लक्षणे द्वैविध्यस्यापि प्रवेश इत्यर्थः· गंधद्वैविध्यं प्रका
शयति द्वैविध्ये चेति· अनुष्णाशीतत्वस्य वैयर्थ्यादाह इत्थं चेति· पाकजस्पर्शवत्त्वमात्रोक्तौ चेत्यर्थः ॥४८॥
न्यायमते पाकजस्पर्शाभाववति पटे वैशेषिकमते पाकजस्पर्शस्य परमाणुष्वेव विद्यमानत्वादव
रे।

यविनि भागासिद्धिमाशंक्य निषेधति यद्यपीति । पाकजस्पर्शेति पटादावित्यादिपदेन वैशेषिकमते
ऽवयविमात्रपरिग्रहः सत्तारूपजातिमादाय गगणादावतिव्याप्तिवारणाय द्रव्यत्वव्याप्येति द्रव्यत्व
समानाधिकरणसत्तामादायातिव्याप्तिवारणाय व्याप्यभागः स्पर्शसमानाधिकरणजलत्वादिक
मादाय जलादावतिव्याप्तिवारणाय पाकजेति । पाकजद्रव्यत्वसमानाधिकरणतेजस्त्वमादाय तेज
स्यतिव्याप्तिवारणाय स्पर्शेति । जलपृथिव्यन्यतरत्वमादाय जलादावतिव्याप्तिवारणाय गन्धेति । अ
त्र पृथिवीत्वस्य लक्ष्यतावच्छेदकत्वाल्लक्षणत्वेन संभवतीति तत्परित्यागः वस्तुतस्तु पृथिवीत्वजाति
रपि पृथिव्या लक्षणं नच व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यत इत्याचार्यमते पक्षतावच्छेदकः
स्य न हेतुत्वमिति वाच्यं हेतुः साध्यसमानाधिकरण इति ज्ञानेपि हेतुमान्साध्यवानिति बोधस्यानिष्पन्न
त्वेन पक्षतावच्छेदकत्वेपि हेतुत्वाविरोधात् । व्यतिरेकव्याप्तेर्गमकतायां तु सुतरां । अणुत्वस्य घ्राणेपि
सत्वादाह परमाणुरूपेति बौद्धः शंकते । नचेति नन्वयं घट इत्यादिप्रतीतिरेव न तत्र प्रमाणं न विषयस्य तन्मे

ण१ योग५

दि०का० हपरमाणुपुंजेरेवेति विलक्षणसंस्थानविशिष्टैः परमाणुभिरेवेत्यर्थः उपपत्तेरिति अयं घट इत्यादि
प्रतीतेरुपपत्तेरित्यर्थः तत्समूहस्य परमाणुसमूहस्य नत्रदृश्यतामाहत्य चेति । तत्समूहस्य केशसमू
हस्य अनुपपत्तिरिति परमाणूनामनेकत्वादणुत्वाच्चेति भावः इतिवदुपपत्तेरिति । तत्र यथा धान्य
समूहस्यैकत्वादेक इति प्रतीतिरेवं संयोगविशेषस्यैव महत्त्वस्वरूपतया महानिति प्रतीतिस्तथा
परमाणुपुंजेषु प्रतीतिरिति भावः प्रत्यक्षत्वादिति तथा च स्वभावतोऽयोग्यानां परमाणूनां परस्परं 87
संयोगमात्रेण योग्यत्वं न संभवतीति भावः दूरस्थकेशस्तु स्वभावतो नातींद्रिय इति त्वदुक्तदृष्टान्तस्य वैष
म्यमित्याह दूरस्थकेशस्त्विति तन्नस्यैवेति दूरस्थकेशस्यैव एवकारस्तु प्राक्तनसन्निधानपदेनान्वेति ।
तथा च सन्निधानत एव तस्य प्रत्यक्षत्वादित्यर्थः तथा च दूरत्वस्य प्रतिबंधकत्वान्न दृश्यतामप्रत्यक्षत्वा:
मात्रे तस्य न तु स्वाभाविकाप्रत्यक्षत्वमिति भावः उत्पन्नत्वादिति लक्षणभंगवादिनां तेषां मते परमाणू ॥५०॥
नामुत्पत्तिस्वीकारादिति भावः अन्यथा अदृश्यस्यादृश्योत्पादकत्वे तत्र तादृक्देहनोत्पत्तिस्थले तद्वत्त

स्रो२ तद्द४

पातिभिः अतितस्य तैलान्तःपातिभिः स्वभावात्कारणैरपेक्ष्यात् उद्भूतरूपादीत्यादिनाः लोकपरिग्रहः तद
भावे महत्वोद्भूतस्पर्शाद्यभावे न तदभावादिति महत्वाभावादिस्पर्शः अत्र नास्तिकमतानुयायिनः परस्परविभ
क्तपरमाणूनां महत्वाभावाद् अप्रत्यक्षत्वेपि परस्परसंयुक्तानां पुंजात्मनां तेषां प्रत्यक्षत्वे बाधकाभावः न च मह
त्वाभाव एव बाधकः परस्परविलक्षणसंयोगस्यैव महत्वरूपस्य प्रत्यक्षजनकत्वात् न च परमाणूनां निः
त्यत्वात् घटादेः उत्पत्तिनाशयोः प्रतीत्यनुपपत्तिरितिवाच्यं तन्मते पदार्थमात्रस्यैव क्षणिकतया परमा
णूनामुत्पत्तिनाशयोः स्वीकारात् न च परमाणुपुंजेषु घटत्वांगीकारे कपालात् घट इति प्रतीत्यनुपपत्तिः
परमाणूनां कपालजन्यत्वाभावादितिवाच्यं तन्मते कपालस्यापि परमाणुपुंजरूपतया घटरूपपुंजेषु क
पालरूपपुंजजनकत्वस्वीकारात् पुंजासुंजोसत्तिरिति तेषां सिद्धान्तादित्याहुः तन्नत्यघट इत्यादि प्रतीतिविष
यतायाः अनेकपरमाणुषु कल्पने गौरवादतिरिक्तावयविसिद्धिरितिदिक् मेरुसर्षपयोरपीति अपिशब्दा
त्साम्यप्रसंग इत्युत्तरसंबध्यते तेन च द्व्यणुकस्य सावयववारब्धत्वे महत्वापत्तिः समुच्चीयते साम्यं पर

दि०क०

वे

रिमाणतारतम्याभावः परिमाणकारणीभूतायाः अवयवसंख्याया उभयत्र साम्यादिति भावः नच मेर्वय
वानां मेरुतुल्यपरिमाणवत्वं सर्षपावयवानां सर्षपतुल्यपरिमाणवत्वमित्यवयवपरिमाणविशेषाद्वि
शेष इति वाच्यं मेर्ववयवसर्षपावयवयोरप्यनन्तावयवत्वेन तत्परिमाणतारतम्याभावस्यापादनीय
त्वात् नच मेरुसर्षपयोरवयवयोरवयवगतप्रचयाख्यसंयोगविशेषात्तद्विशेष इति वाच्यं प्रचयविशेष
स्यापि संख्यावि[illegible]नियम्यत्वेन संख्याविशेषाभावे तद्विशेषानुपपत्तेरिति ननु तथापि विश्रामाश्र
यस्यानित्यत्वे मानाभाव इत्यत आह पर्याप्तीति असमवेतकार्योत्पत्तिप्रसंग इति असमवेतभावकार्योत्पत्ति
प्रसंग इत्यर्थः ननु तस्यानित्यत्वसिद्धावप्यणुत्वे किं मानमित्यत आह परममहत्परिमाणेति चाक्षुषद्रव्य
त्वादिति आत्मनि व्यभिचारवारणाय चाक्षुषपदं घटाभावे व्यभिचारवारणाय द्रव्यपदं तदवयवसि
द्धाविति त्रसरेणववयवसिद्धावित्यर्थः तदसिद्धेरिति अवयवधारायां असिद्धेरित्यर्थः अत्र नव्याः त्रस
रेणोरवयवाः सावयवा इत्याद्यनुमानयोरुक्तयोरप्रयोजकत्वेन न त्रुटिविश्रामः नच चाक्षुषं प्रतिमहत्त्वं कार ॥५१॥

टावेव।

४४

मुटी १

णं तथा च परममहत्वानावश्यकं तच्चावयवसंख्याजन्यमित्यवयवं विना नोत्पद्यते इत्यनुकूलतर्कसत्वान्ना
प्रयोजकत्वं द्व्यणुकसाधकानुमानस्येति वाच्यं त्रसरेणुमहत्वस्य नित्यत्वस्वीकारेणोक्ततर्कानवतारात् न चैवं
णुव्यवहारस्याणुपरिमाणनिबंधनतया तदाश्रयद्व्यणुसिद्धिरावश्यकीति वाच्यं. तस्यापकृष्टपरिमाणनिबंध
नात्. महत्स्वपि महतमादणुव्यवहारात्. न चैवं त्रसरेणुपुंज एवावयवीति वाच्यं. विशकलितेष्वपि तेषु
घट इत्यादिप्रसंगात्. न च तत्संयोगकृते घटत्वं घटोऽयमित्यादिप्रतीतौ च परंपरया तज्ज्ञानमिति वाच्यं सं
भवति साक्षात्संबंधविषयत्वे परंपरासंबंधविषयत्वकल्पने गौरवादित्याहुः ननु परमाणुत्रयेणाकुतो न द्र कै ४
व्यान्तरोत्पत्तिः परमाणुद्वयेन द्व्यणुकवत्. एवं द्व्यणुकद्वयेन द्रव्यान्तरोत्पत्तिस्त्रिभिर्द्व्यणुः त्र्यणुकवदिति चे
न्न प्रमाणाभावेन तादृशद्रव्यासिद्धेः परमाणुत्रये त्र्यणुकद्वये च द्रव्यारंभकसंयोगकल्पनेन. अत्रेदं चिंत्यं।
त्रिभिः परमाणुभिरेव त्र्यणुकमस्तु परमाणुभ्यामनारंभोऽस्तु. सिद्धान्तिनां द्व्यणुकाभ्यामनारंभ इव मानाभा
वात्. फलबलेन त्रयाणामेव युगपद्द्रव्यारंभकसंयोगकल्पनात्. वस्तुतो गवाक्षरंध्रे दृश्यमानानां द्व्यणुक
ना३

त्वमेव युक्तं॰ अणुइत्यारभ्यवेलाघवादिति॰ मूलेस्यस्य देह इन्द्रिय विषयस्तर्पैत्यस्य त्रैविध्ये हेतुपरत्वं
स्य च विवृतमर्थमाह॰ साकाचेत्यपेति योनिजं शुक्रशोणितानपरस्परमेलनजन्यं तद्भिन्नमयोनिजं जरायु
जमिति गर्भवेष्टनचर्मपुटकं जरायुः मानुषादीनामित्यादिना पशुमृगादीनां परिग्रहः सर्पादीनामित्या
दिना विहगपरिग्रहः स्वेदजमुदाहरति॰ कृमिदंशाद्या इति न स्वशरीराणामुत्पत्तेर धर्मविशेषसहितेभ्यो
ऽणुभ्य एव स्वीकारादिति भावः उद्भिज्जादिकमित्यादिना देवादिशरीरपरिग्रहः न स्वशरीराणामुत्पत्तेर्ध
र्मविशेषसहितेभ्योऽणुभ्य एव स्वीकारादिति भावः तेषामयोनिजत्वे चागम एवं ब्रह्मणो मानसमन्वा
दयः पुत्रा इत्यादि प्रमाणं योनिं विना न शरीरमित्येवविधागमे व योनिपदं वीर्यक्षरणमात्रपरं शरीरपदं च
मनुष्यपरं गंधादीत्यादिना शुक्लेतररूपपरिग्रहः क्लेदोष्मादेरित्यादिनावकाशपरिग्रहः क्लेदः स्र
रणं स्वेद इति यावत्॰ उष्मापाकः औष्ण्यमिति यावत्॰ न च शरीरसंबंधेन उष्मादौ रूपादिपराहत्या ॥५२॥
ऽनुमीयते अनुष्मानदनुद्भूते व्यूहः क्रियावकाशामुख्यादावत्रागत्यप्रतिबंधः ननु कथं तर्हि शरीरी

दि

कृ१

रे पांचभौतित्वव्यवहार इत्यत आह. तेनेति शरीरस्य पार्थिवत्वसाधनेनेत्यर्थः एवं च शरीरे पांचभौतिक
त्वव्यवहारो न पंचभूतोपादानकत्वनिबन्धनः किंतु तदन्यान्यत्वनिबंधनः तथाप्येकैकस्योपादानत्वं
चतुर्णां निमित्तत्वमिति विवेकः किंतु चेष्टात्वं जातिविशेषः चेष्टत इति प्रत्यक्षसिद्धः न च शरीरत्वमेव पृ
थिवीत्वादिव्याप्या जातिः चेष्टात्वं च तत्क्रियात्वमिति वाच्यं. पृथिवीत्वादिना शंकरेण पृथिवीत्वादिव्या
प्यानेकशरीरत्वकल्पने गौरवात्. आध्यात्मिकमिति आध्यात्मिकवायुं प्राणख्यः शंकते तन्नैवेति। भ
ग्नक्षतेति। भग्नक्षतयोर्विभागविशेषविशिष्टावयवयोः संरोहणं आदिना वृद्धिसंग्रहः वृद्धिश्चाव
यवोपचयः तदुन्नयनादिति आध्यात्मिकवायुसंबंधानुमितेः ननु भग्नक्षतसंरोहणादिहेतुना वायोः
प्राणत्वे मानाभाव इति चेन्न मर्मनीरसं जाता सरलोर्जुनपादपाः नर्मदातोयसंस्पर्शान्नेदान्निपरमां ग
तिं। गुरुं हुंकृत्य तुंकृत्य विप्रं निर्जित्य वादतः। श्मशाने जायते रक्षः कंकगृध्रोपसेवित इत्यागमस्यैव तत्र मा
नत्वात्. अन्त्यावयवित्वेनेति द्रव्यानारंभकद्रव्यत्वेनेत्यर्थः मृतशरीरे चेष्टाया अभावेनाव्याप्तेराह. अथ

ऊं२ दा३

घ।

दि०कृ० वेतिँ द्रव्यमादाय घटादावव्याप्तिवारणाय चेष्टावदिति हस्तादावतिव्याप्तिवारणायांत्यावयवी
ति. न च हस्तादिकं न जातिः पृथिवीत्वादिनाशंकरादिति वाच्यं. पृथिवीत्वादिव्याप्यनानाहस्तत्वांगी
कारात्. पृथिवीत्वरूपतादृशजातिमति घटादावतिव्याप्तेर्लक्षणान्तरमाह. अन्त्यावयविमात्रवृत्ती
त्यनेन द्रव्यत्वजातिव्युदासः चेष्टावद्वृत्तीत्यनेन घटत्वादिव्युदासः चेष्टा च हिताहितप्राप्तिपरिहारार्थक्रि रा४
या आद्यो न तु स्पन्दमात्रं घटादावपि सत्वात् ननु देवत्वादिरूपजातिमादाय लक्षणसमन्वय इत्यत आह
जलीयेति देवत्वस्यापीति अपिना नृसिंहत्वपरिग्रहः जातित्वाभावादिति जातिसांकर्यादिति भावः जा 90
तिसांकर्यस्यादोषत्वे देवत्वशरीरत्वादेर्नानाजातित्वांगीकारे वा देवत्वे शरीरत्वे शरीरत्वं जातिमादा
यैव लक्षणसमन्वय इति ध्येयं रूपादिमध्य इति रसगंधस्पर्शा आदिपदार्थाः न च शरीरावगंधव्यंजकत्वेन्द्रि यं२
ये मनसि च व्यभिचारवारणायैवकारः नह्देवसक्तुसरस्याप्यभिव्यंजकत्वान्न दोषः घ्राणेंद्रियेगंत्वादि घ२
भिव्यंजकत्वादेरप्रसिद्धेरप्रसिद्धिवारणाय हेतौ मध्यांतं न चासिन्नारकं विशेषणं निरर्थकमिति वाच्यं. ॥५३॥

द्धि।

ने।
व्यभिचारज्ञानस्वहेत्वेऽप्रसिद्धावपि व्याप्तिज्ञानाभावे व्याप्तिग्रहौपयिकाप्रसिद्धिवारकविशेषणोपादा
नस्य सर्वसिद्धत्वात्. तदर्थत्वात्. हेतुवाक्यघटकमध्यान्नस्यादभिव्याहृतैवकारार्थत्वात्. तथाचेदृष्टां
न्तेऽस्वीयरूपादिव्यंजके घटादावसिद्धिवारणाय परकीयत्वं रूपादौ विशेषणं देयमिति भावः नस्येति न
वशरावगंधव्यंजकजलस्येवेत्यर्थः नच नवशरावगंधव्यंजकजलेनप्रमैनसन्कुरसो नाभिव्यंजित रु५
स्तत्र जलविशेषे नैकान्त्यमिति वाच्यं. परकीयरूपादिविषयकसाक्षात्काररूपायोग्यत्वस्याविवक्षितत्वे
न्नवशरावगंधव्यंजकजलेपि रसव्यंजकत्वावच्छेदकजलत्वस्य सत्त्वादिति परकीयेति विशेषणाप्रवेशेन ते ४
लाघवादाह यद्वेति. तद्घटनेहेतुमाह वायूपनीतेति इदमत्र बोध्यं रूपाद्यव्यंजके सतीत्यस्य हेतुत्रयेपि तात्प
र्यशब्दाव्यंजकत्वे सति गंधव्यंजकत्वस्य नवशरावगंधस्तव्यंजकोदके व्यभिचारेण तत्र ग्रंथकर्तुस्तात्प
र्याभावात्. तत्र हेतुः [illegible] रूपरसगंधस्पर्शानां परकीयत्वे विशेषणं नच प्रथमहेतौ नवशरावगंधव्यंजक
जले व्यभिचारः लोक्षारसमशीनीलरूपाद्यव्यंजकत्वात्. नच तृतीयहेतौ तत्र व्यभिचारः एतदम्लरसेनापि

दाव
भोगसाधनत्वं द्व्यणुकाव्याप्तं साक्षा२

यद्देति विकल्पान्तरप्रत्यायनात्. तत्रापि परकीयविशेषणाघटितहेतुत्वमिति. न च घ्राणेन्द्रियसन्निक
र्षेन्द्रियत्वे न जातिस्तेन तस्त्वादिना शंकरात्. किं तु शब्देतरेत्यादिना वक्ष्यमाणं बोध्यं विषयत्वं न जातिः
सामान्यादौ सत्त्वात्. अतस्तल्लक्षणमाह. उपभोगेति यद्यपि साक्षात्परंपरासाधारणं भोगसाधन
त्वं परमाणावपीति द्व्यणुकादिव्याप्तं तमिति ग्रंथविरोधस्तथापि साक्षात्परंपरासाधारणभोगसा
धनत्वं विवक्षितं परमाणुरपि विषय एव कार्यरूपपृथिव्या एव त्रिप्रकारेण विभजनात्. कार्यपृथि
वीविषय एव द्व्यणुके साधनाय दर्शित इति न तद्ग्रंथविरोधः अत एवोक्तं तदुपभोगं साक्षात्परंप
रया वा जनयत्येवेति कार्यजातमित्यत्र जातपदं संपातायातं अदृष्टाधीनमिति अत्र च कार्यमात्रं प्रत्य
दृष्टस्य हेतुता न समवायसंबंधेन घटाद्यधिकरणे कपालादौ समवायेन तदभावात्. व्यभिचारात्. यत्तु
स्वसमवायिसंयोगेनादृष्टं कार्यमात्रे हेतुरिति तन्न शब्दरूपकार्याधिकरणे गगनेऽदृष्टसमवाय्यात्मसं
योगाभावेन व्यभिचारात्. परन्तु स्वसमवायिसंयुक्तसंयोगेन तस्य हेतुता बोध्या इदन्तु बोध्यं अदृष्टस्य ॥५४॥

वा१२

कार्यमात्रप्रतिहेतुतानसाक्षात्तद्धि सामग्रीसमवधानेःदृष्टविलंबेकार्यविलंबोदृष्टोयेनतस्यसाक्षाद्धेतु
तास्यात्. परन्तुसामग्रीसंपादकतयैवप्रायःपारंपर्येवतदुपयोगः क्वचित्तुमेघसंचारादौसाक्षादेव
तद्धेतुरन्यथासामग्रीसंपादकत्वस्यैवानुपपत्तेरिति एतदर्थमेवसाक्षात्पारंपरासाधारणजन्यत्वबोध
कमधीनपदमुपात्तं यददृष्टाधीनं यत्पुरुषीयादृष्टाधीनवत्तत्कार्यमित्यर्थः तदुपभोगं तत्पुरुषस्यो
पभोगंतेनघ्राणकादिकार्यस्यतत्पुरुषोपभोगसाधनत्वेन नन्वेवंसर्वस्यैवविषयत्वेशरीरेंद्रियविष
यभेदेनपृथिव्यादेर्वैविध्यंनसिद्धेत् तत्राह. शरीरेंद्रिययोरिति. जलत्वजातौप्रमाणमाह स्नेहेति. कार
णतावच्छेदकतयाधर्मसिद्धौबाधकाभावाच्च जलत्वस्यजातित्वमितिभावः नित्यवृत्तिधर्मस्यकार्य
तावच्छेदकत्वाभावेनस्नेहत्वस्यकार्यतावच्छेदकत्वंनसंभवतीतिशंकते यद्यपीति. तथाकार्यतावच्छेदकं
वस्तुतस्तु नित्यसाधारणस्यकार्यतावच्छेदकत्वेदोषाभावाद्अन्यपदंनदेयमेव. ननु यथाऽरण्यस्थदंडादौ
फलानुपधायकेकारणतावच्छेदकतयादंडत्वादिजातिस्तथात्रापिभविष्यतीत्यत आह. तस्येति दंडादेः

ण।२

वा२ अथजलग्रंथः।।

जलत्वजातेः जन्यजलत्वमात्रवृत्तिजातेः। तदवच्छिन्नेति. जन्यजलत्वजात्यवच्छिन्नेत्यर्थः नचैवं जलावयविनि
जा३ ना३पे३ जलसंयुक्तत्वेनापाद्येय
दि०कृ० स्वस्वरूपयोग्यतायां न कापि क्षतिः तस्यानित्यत्वेन फलोपधायकत्वाभावादिति भावः जन्यजलत्वेनस्यानें
सांदितिवाच्यं. जलस्याऽवयवित्वाभ्युपगमात्. ननु जलत्वावच्छिन्नत्वं प्रति समवायसंबंधेन स्नेहस्ये
व कारणत्वमस्त्वितिरिक्तांतिकल्पंक्षापालाघवादिति चेन्न. तत्र जलत्वावच्छिन्नं प्रति स्नेहत्वेन वा कारणत्वे
शीतस्पर्शत्वेन वेत्यत्र विनिगमनाविरहादतिरिक्तजातिसिद्धेस्संभवेनाकल्पनीयेन विनिगमनावि
हाभावादिति चेत् किंतु धूमादिकंप्रत्यार्द्रेंधनादेः कारणत्वं निर्विवादं आर्द्रत्वं च जलसंयुक्तेंधनत्वेनं 92
धनसंयुक्तजलत्वेन वा कारणतेत्यत्र विनिगमनाविरहाज्जलेंधनयोः पार्थक्येन कारणतावच्छेदक
तया जलत्वजातिसिद्धिरित्याहुः परे तु स्थूलजलवृत्तिप्रत्यक्षासिद्धजलत्वरूपजात्यवच्छिन्नसमवायि
कारणतावच्छेदकतया परमाणुसाधारणजातिसिद्धिः कार्यतावच्छेदककारणतावच्छेदकयोरैक्ये
क्षतिविरहान्नित्यसाधारणस्य कार्यतावच्छेदकत्वाभावाच्चेत्याहुः नचेति पृथिव्यादावतिव्याप्तेरिति ॥५५॥
शेषः शुक्लरूपवत्त्वस्य लक्षणत्वेपि न क्षतिरित्यभिप्रायेणाह अथवेति. उष्णत्ववाप्यवायुत्वजातिमादाय
केत्वे२

द्रव्यत्वव्याप्यव्याप्यत्वं चद्रव्यत्वाभाववद्वृत्तिरूपद्रव्यत्वव्याप्यसमानाधिकरणाभावप्रतियोगित्वे सति तत्समानाधिकरणरूपद्रव्यत्वव्याप्यन्यूनवृत्तित्वं २

व्याप्यत्व ३

व १

वायावतिप्रसंगाद्रूपवद्वृत्तीति यथा वायुत्वं जातिस्तथाग्रे वक्ष्यते पृथिवीत्वादिजातिमति पृथिव्यादाव
तिप्रसंगवारणाय नैमित्तिकद्रवत्ववद्वृत्तीति साक्षादिति घ[illegible]ादिवारणाय द्रव्यत्वसाक्षाद्व्याप्यत्वं चद्रव्यत्वव्याप्या
व्याप्यत्वमात्रेन न तु द्रव्यत्वस्यापि तत्रान्तर्भावः रूपवद्वृत्तिविशेषणेनैं रूपत्वादीनां वारणात् तन्निवेशे प्रयोजनं
भावात्. यद्यप्येवं श्योपस्थितिकद्रवत्वस्यैव रूपस्थाने प्रवेशो युक्तः तेनापि वायुत्वादेर्वारणात्. एवं च द्रवत्व
वद्वृत्तित्वाभावादेव घटत्वादीनां वारणसंभवात्. द्रव्यत्वसाक्षा[illegible]प्यस्यपि न देयमिति लाघवेन यापि मूले वः
णः शुक्लेत्यादिना रूपघटितलक्षणस्यैवोक्तत्वात्तद्घटितलक्षणस्यैवोक्तत्वोपरिष्कारे मूलविरोधस्यादिति
तथा न क्षतमिति ध्येयं मूलसामंजस्यानभ्युपगमे न चेदं तेन जलत्वस्य द्रव्यत्वव्याप्यत्वेपि न क्षतिः जलघटाद्य
न्यतरत्वमादाय घटादावतिव्याप्तिवारणाय जातीति केचित्तु शुक्लेरूपवद्वृत्तीति पाठं तत्र शुक्लपदं रूपपदं वा
संपायातं एवमेव च गतिरन्यास्वरशुक्लेतररूपेत्यत्र रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यपदयोर्वैयर्थ्या पृथिवीत्वमे
दाय पृथिव्यामतिव्याप्तिवारणायान्यास्वरशुक्लेतररूपासमाधिकरणेति। जलत्वशुक्लरूपसामानाधिकरः

मूर्त्तत्वजात्य ४

रूपाभावेकथनीलरूपप्रतीतिरताह.५

ण्यादसंभवात्.इति शुक्लेतरेति.तेजस्त्वमादायतेजस्यतिव्याप्तिवारणाय भास्वरेति.शीत एवेति.यद्यपि शी
तं गुण इति कोशात् क्लीवं तन्नाबोधितानथापि विशेष्यस्पर्शशब्दस्य पुल्लिंगत्वात् पुल्लिंगतया निर्देशः.शुक्ल
रूपमित्यादौ शुक्लपदस्य क्लीवंतं तयैवेति द्रव्यत्वव्याप्या या पृथिवीत्वरूपा जातिस्तामादाय पृथिव्याम
तिव्याप्तिवारणाय नित्यावृत्तीति तेजस्त्वादिजातिमादाय तेजआदावतिव्याप्तिवारणाय मधुरवद्वृत्तीति शेषं दः
र्शितं दिशावलेयेननु जले नीलं कालिन्दीति स्वसमवायिसंयोगसंबंधेन उपष्टंभकपार्थिवभागगतनी 93
लरूपप्रतीतिः कालिन्दीजलादाविति भावः.अत एवेति.उपदर्शितसंबंधस्य जले नीलमिति प्रतीतिनिया
मकत्वादेवेत्यर्थः.विपनीति.तदुपदर्शितसंबंधघटकसंयोगस्य नीलाद्विति भाव तन्न जले तस्य माधुर्यस्य.अ
न्यथा आश्रयोपाधिकत्वाभावे व्यंजकत्वादिस्तुल्यत्वं हरीतकीभक्षणोत्तरं प्रत्यक्षेण माधुर्योपलंभादिति
पूरणीयं.कस्य नागोरवादिति अवयवरसाजन्यस्य पृथिवीरसस्याग्निसंयोगसाध्यत्वदर्शनादेतदनु ॥५६॥
रोधमात्रेण जलसंयोगस्यापि पृथिवीरसोत्पादकत्वस्वीकारेतिरिक्तकार्यकारणभावस्य हरीतक्यां मधु

ररसस्य कल्पने गौरवादिति भावः. ननु जले मधुरो रसः. तथापि जंबीरजलादौ प्रत्यक्षसिद्धस्याम्लरसस्यापि
स्वीकारे बाधकाभाव इत्यत आह पृथिवीत्वस्येति. अम्लादिजनकतावच्छेदकत्वादिति. यद्यपि पृथिवीत्व
स्याम्लादिजनकतावच्छेदकत्ववन्मधुरजनकतावच्छेदकत्वमप्यस्तीति तुल्यं. तथापि हरीतकीभक्षणो
त्तरं जलेऽपि मधुरोपलब्धेस्तत्र मधुरस्वीकारस्यावश्यकत्वाज्जलत्वेनापि मधुरं प्रति हेतुत्वं कल्पने इति भा
वः. ननु जंबीरसलिलादौ अम्लादिप्रत्यक्षाज्जलत्वेनाम्लादिरसेऽपि तुल्यवद्धेतुत्वं स्यादत आह. जंबीररसादावि
तिस्वसमवायिसंयोगेन जंबीरगताम्लरसप्रतीतिस्तद्वन्न जल इत्यर्थः शुद्धेऽपि जंबीरेऽम्लप्रतीतेस्तत्राम्लरसाव आप
श्यकत्वेन तस्यैव तद्वन्न जलेऽपरंपरया प्रतीतिः. हरीतक्यां तु मधुरस्याभावान्न हरीतकीगतमाधुर्यस्य जले प्रतीति
रिति भावः. कर्कटीभक्षणोत्तरं जलपानेन तिक्तरसस्यानुभवात्तिक्तरसो जले स्यादिति. ननु जलपानात्पूर्वमपि क
र्कट्यां तिक्तरसोपलब्धेः कर्कटीभक्षणोत्तरं रसनाग्रवर्त्तितिक्तस्योद्भेनोदीयतिक्तोपलब्धेर्वैद्यकसिद्धत्वाच्च. व
स्तुतो निदाघपीतनिर्मलगंगाजलमाधुर्यस्यानुभवसिद्धस्यापलापासंभवान्मधुर एवेति युक्तं. एतेन हरीत

दि०क०

क्वाथे तज्जलसंयोगेन माधुर्यमुत्पत्तेयेन कल्पनागौरवं परन्तु हरीतक्यां कषायवन्मधुररसोपि स्वीक्रियते न तु
जनकश्च जलसंयोगः ननु तद्गतरसान्तरस्य फलबलात्· यदि च चित्ररूपवच्चित्ररसे मानाभावाद्गुणविरोधे
न नीरसे व हरीतकीरसप्रतीतिनीरसप्रतीतिस्तु अवयवेषु रसोत्पत्त्या परंपरयेत्युच्यते तदा तु जलसंयोगो
हरीतक्यवयवगतमाधुर्यस्यैव व्यंजक इत्यपास्तं· जलत्वजातावनुमानान्तरप्रमाणमाह· एवमिति· ननु
जलत्वाभावेपि घृष्टलै चंदनादौ शैत्यस्योत्पत्तेर्व्यभिचारेण कथं जन्यजलत्वेन तत्र हेतुत्वमत आह घृष्टेति· 94
पूर्वशीत एव स्पर्श इत्युक्तं तत्साधयति· तेजःसंयोगादिति तत्र जले विवेचयिष्यति· पाकासंभवमुपरिष्टाद्घृ न५
तादावित्यत्रादिपदेन तैलादिपरिग्रहः जलस्यैव स्नेहे स्फुटतरं स्वाश्रयसंयोगेन प्रतीयत इति शेषः तेन घृता
दौ समवायेन स्नेहनिरासेन· जल एवेति· स्नेहस्यावान्तरविशेषाभावात्तेनोत्कीर्तितः तदवच्छिन्नजनकताव
च्छेदकं तदेव· जन्यजलत्वमेव तदवच्छिन्नजनकतावच्छेदकं जलत्वमिति भावः अथैवं रीत्या परमाणुव्यावृत्तमा
द्व्यणुकं जलत्वमेकं परमाणुसाधारणं द्वितीयमिति जलत्वयोर्भेदाग्रहः कुत इति चेत्समनियतयोर्व्या
वृत्तित्वादिति· एवमग्रेपि तैलादावित्यत्रादिपदेन क्षीरपरिग्रहो न तु घृतस्य दहनानुकूल्यं न स्यात्· जलस्येदं ॥५७॥

जैदेर

स्य ३ ठ ४ ल ३

तत्र नैमित्तिकद्रवत्वस्य समवायेनैव सत्त्वात् . द्रवत्वमित्यनन्तरं स्वाश्रयसंयोगेन प्रतीयत इति शेषः ननु तैले जल
सत्वे तैलस्य दहनानुकूलत्वं न स्यात् . जलस्य दहनप्रतिकूलत्वादत आह . स्नेहप्रकर्षेणेति . प्रकृष्टस्नेहस्य जल
स्य दहनानुकूलत्वमेव अपकृष्टस्नेहस्यैव तस्य दहनप्रतिकूलत्वादिति भावः इति वक्ष्यतीति स्नेहनिरूपणावसर इ
ति शेषः प्रथमवदिति षष्ठीसमासार्थे वतिरित्यभिप्रायेणाह . पृथिव्या इवेत्यर्थ इति . एवमग्रेपि . जलीयं शरीरमि
व५ ति . तत्र पार्थिवायवैरूप्यं बोध्यं . तेन जलमात्रे हस्तपादादिव्यवस्थायाऽसंभवेपि न क्षतिः ननु तादृशश
रीरे मानाभावोऽनुपलंभादित्यत आह . वरुणलोक इति . तत्र च श्रुतिरेव प्रमाणमिति भावः गंधेति . रसव्यंजक
मनसि व्यभिचारवारणाय . गंधाव्यंजकत्वे इति . कासारः सरः करकादिरित्यत्रादिपदात् कूपादिपरिग्रहः कठिन
त्वादिति कठिनस्पर्शवत्वादित्यर्थः विलीनस्य तस्येति . सप्तम्यर्थे षष्ठी . क्वचिद्विलीनयोस्तयोरिति पाठः स तु ऋजु
रेव विलीनतायाः द्रवत्वरूपायाः जलत्वव्यंजकत्वादिति भावः ननु विलीनता नैमित्तिकद्रवत्वमेव तत्कुतो मूलाः
णोति . तच्च न जलत्वव्यंजकं . यदि च विलीने तस्मिन्नित्यस्य तस्मिन्नष्टे सती सुवर्णस्तदापि करकादिनाशो न रह

दि०क०

व्यान्तरोत्पादात्तत्रैव द्रवत्वजलत्वयोः प्रत्यक्षं न करकायां न स्यादत आह यद्व्यमिति. तथा च करकादिना
शोत्पन्नद्रव्यान्तरे जलत्वस्य प्रत्यक्षासिद्धत्वादुक्तव्याप्त्या करकादिषु जलत्वसिद्धिरिति भावः ननु हिमकर
कयोः पार्थिवत्वाभावे कथं काठिन्यमुपलभ्यत आह. आदृष्टविशेषादिति ॥ इति जलग्रंथः ॥ इत्थं चेति उ
ष्णत्वजातिसिद्धावित्यर्थः ननु कथं तर्हि जन्योष्णस्पर्शसमवायिकारणभिन्नेषु परमाणुषु तेजस्त्वजाति
सिद्धिरित्यत आह. तत्रापीति. तेजस्त्वस्यापीत्यर्थः जलत्वस्येवेति. यथा जन्यजलत्वावच्छिन्नजनकतावच्छे
दकतया जलपरमाणौ जलत्वजातिसिद्धिः तथा जन्यतेजस्त्वावच्छिन्नजनकतावच्छेदकतया तेजःपर 95
माणावपि. तेजस्त्वरूपजातिसिद्धिरित्यर्थः इदमुपलक्षणं. समवायेन विलक्षणनीलोत्पत्तित्वावच्छि
न्नं प्रति समवायेन तेजःसंयोगे न हेतुत्वात्तेजस्त्वजातिसिद्धिरित्यपि द्रष्टव्यं. चंद्रकिरणादावित्यादिनार
त्नकिरणादेः संग्रहः तत्रापि. चंद्रकिरणादावपि. ननु तत्रोष्णप्रतीतिः कुतो नेत्यत आह. किंत्विति. त
दंतःपातिजलस्पर्शेनेति. चंद्रकिरणान्तर्गतजलभागशीतस्पर्शेनेत्यर्थः ननु चक्षुरादिनिष्ठस्योष्णस्प ॥५८॥

रीस्य केनाप्यनभिभूतत्वात्तस्य व्याप्तिरित्यत आह। चन्द्रादौ चेति मरकतकिरणादावित्यादिना सुवर्णस्य
परिग्रहः स्याद्रूपं शुक्लं भास्वरमिति मूलं तत्र शुक्लेति स्वरूपकथनं भास्वररूपमात्रस्य लक्षणत्वेऽतिप्रसं
गाभावात्। भास्वरत्वं जातिविशेषः स च तेजोरूपमात्रवृत्तिः शुक्लत्वव्याप्यश्चेति ननु रूपविशेषकत्वाप्र
त्यक्षस्याभावात्। वैश्वानरादेश्चाक्षुषत्वाभावादित्यपि नासूचितं। अन्यदीयरूपेणेवेति पार्थिवरूपेणेवे
त्यर्थः मतान्तरमा[illegible]पत्तिरिति शंकते। तद्रूपाग्रह इति वैश्वानरादेरचाक्षुषत्वेन तु तत्संख्यादिगुणानामपि चाक्षु
षत्वं न स्यात्योग्यमात्रवृत्तित्वाभावादित्यपि नासूचितं अन्यदीयरूपेणेवेति पार्थिवरूपेणेवेत्यर्थः मता
न्तरमाह। वस्तुतस्त्विति सुवर्णादिरूपे तेजसि सत्त्वादिति तेन नासंभव इति भावः। पृथिव्यवृत्तीति। नैमित्तिक
द्रवत्ववद्वृत्तिद्रव्यत्वरूपजातिमादाय पृथिव्यादावतिव्याप्तिवारणाय पृथिव्यवृत्तीति पृथिव्यवृत्तिवायुत्वा
दिकमादाय वाय्वादावतिव्याप्तिवारणाय नैमित्तिकद्रवत्ववद्वृत्तीति। वायुतेजोऽन्यतरत्वमादाय वायावति
व्याप्तिवारणाय जातीति। परकीयस्पर्शादीति। गंधाव्यंजकत्वोपधिनहेत्वंतरस्य च योनोदिपदेन गंधा

व्यंजकत्वादसिद्धिवारणाय स्पर्शपदं. इत्यकेचिदाहुः चक्षुर्विषयालंबद्धमेव ग्राहकं यदि प्राप्यकारि स्यात्तदासन्नादि।

यात्२

दि०कं०

द्रियपरिग्रहः चक्षुषः परकीयरूपादिवत्तदधिष्ठानसंबद्धं गृह्णीयात्. न चैवं गोलकासंबद्धग्रहणात्. किं च
यदि चक्षुः प्राप्य गृह्णीयात्स्वतोऽधिकपरिमाणं न गृह्णीयात्. न खलु नखरंजिका परशुपृष्ठं छिनत्ति. शाखें
चंद्रमसोस्तुल्यकालग्रहणानापत्तिः गतिक्रमेण प्राप्यग्रहणे हि क्रमेण ग्रहणं स्यात्. ननु तुल्यकालमुपलं
भः अनुभवानि तून्मीलयन्नेव नयने शाखां शीतमयूखं च. एवं च प्राप्यकारित्वानुरोधेन गोलकातिरिक्तं च
क्षुः परैरंगीक्रियते. गोलकस्य चत्रादिप्राप्त्यसंभवात्. अप्राप्यकारित्वे च गोलकमेव चक्षुरस्तु न तैजसम्
मिति. तदसत्. अधिष्ठानसंबंधार्थं ग्राहिण्याः प्रदीपप्रभाया इव व[illegible]धिश्चक्षुषोऽपि प्राप्यकारित्वसंभ
वात्. पृथुतरग्रहणस्य च गोलकनिर्गतस्य महतश्चक्षुषः पृथक्त्वेन प्रदीपप्रभाया इवोपपत्तेः स्वाधिक
परिमाणमहद्द्रव्यग्राहिणा त्वगिंद्रियेण व्यभिचारात्तन्नियमाभावाच्च तुल्यकालग्रहणं चासिद्धमेव तद
न्निमानस्य कालकौलं संनिकर्षो वोपपत्ते. अचिंत्यो हि तेजसो लाघवातिशयेन वेगातिशयेन वेगातिश
शयो यस्य प्राचीनालं चेचूडावलंबिन्येव भगवति मयूखमालिनि भवनोदरे स्वालोकं करोत्यंपत्वाकुः शालि

चीर२

दृशा१ मे१ ना१

भिमानोलोका नो१

96

॥५८॥

काचार्यः चक्षुर्ग्राह्यो लोकाभ्यामारब्धेन चक्षुषा तावदर्थसंसृष्टेन युगपत्तावदर्थग्रहणमिति शाखाचंद्रमसोस्तुल्यकालग्रहणमुपपद्यते एवेति. नन्वशोभनं चक्षुर्ग्राह्यालोकाभ्यामारब्धस्य चक्षुषः पृष्ठभागेपि सत्वात्पृष्ठभागस्थितपदार्थ[illegible]ग्रहणापत्तेः पृष्ठदेशस्थबाह्यालोकैश्चक्षुःस्यादेर्मानाभावात् इति चेदग्रदेशस्थबाह्यालोकैरपि तद्रुस्यादेर्मानाभावात्. तदनभ्युपगमेपि चाक्षुषोपपादनस्यानुपदमुक्तत्वादिति. लाघवादाह. अथवेति तैजसत्वे किंमानमिति. सुवर्णं पार्थिवं नैमित्तिकद्रवत्वादित्यनुमानस्य पार्थिवत्वसाधकस्यैव सत्वादित्याशयः समाधत्तेनेति. सुवर्णमिति. न चात्र पीतरूपवद्द्रव्यात्मकस्य सुवर्णस्य पक्षत्वे बाधः तैजससुवर्णस्य चानुमानात्पूर्वमसिद्ध्या पक्षाप्रसिद्धिः धर्मशास्त्रेपीति. सद्रूप्येपि सुवर्णपदप्रयोगे तस्यापि सुवर्णपदवाच्यस्य पक्षतावच्छेदकत्वेपि बाधतादवस्थ्यादिति वाच्यं. अत्यन्तानलसंयोगानुच्छेद्यद्रवत्वाधिकरणत्वस्यैव पक्षतावच्छेदकत्वात्. अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वेन च पक्षतावच्छेदकहेत्वभेदप्रयुक्तस्य सामानाधिकरण्येन सिद्धसाधनस्यादोषत्वात्. असतिप्रतिबंधकेति. जलमध्यं क्षिप्यमाणघृतादे

तथा सुवर्णपदवाच्य २

स्य १

व्यभिचारवारणायासतिप्रतिबंधकइति. अग्निसंयोगनाश्यद्रवत्ववति घृतादौ व्यभिचारवारणाय संयो-
गेत्यंतं. तादृशद्रवत्वस्य समानाधिकरणाग्निसंयोगासमानकालीनत्वान्न व्यभिचारः अनुच्छिद्यमानद्रव-
त्वादित्यस्यानुच्छिद्यमानद्रवत्वाधिकरणत्वादित्यर्थो न तूच्छिद्यमानद्रवत्वानधिकरणत्वादिति गगनादौ
व्यभिचारात्. पूर्वपक्षिणां शंकितमप्रयोजकत्वं निरस्यति. न चेति. अग्निसंयोगनाश्यत्वादिति. एतच्चोप-
लक्षणं. अग्नेरपत्यं प्रथमं हिरण्यमित्याद्यागमान्यथानुपपत्तेरप्यनुकूलतर्कत्वादिति. एतेनाश्रयनाश-
जन्यद्रवत्वनाशे व्यभिचारवारणाय द्रवत्वे आश्रयनाशनाश्यद्रवत्वव्यावृत्तजातिविशेषं कल्पयित्वा वि- 97
जातीयद्रवत्वनाशं प्रत्यग्निसंयोगत्वेन हेतुतां स्वीकार्या तच्च वैजात्यं सुवर्णद्रवत्वव्यावृत्तमपीति दर्शितानु-
कूलतर्कासंगतेः सुवर्णस्य पृथिवीत्वेपि तदीयद्रवत्वस्याग्निसंयोगनाश्यतावच्छेदका[illegible]क्रान्ततयासंः
ताग्निसंयोगसत्वेपि नाशापत्तेरसंभवादित्यपास्तं. क्षोदः चूर्णः तस्य पीतिमगुरुत्वाश्रयस्य प्रकान्तरेणः ॥६०॥
सुवर्णस्य तैजसत्वसाधयतां मतमुपन्यस्यति. अपरे त्वित्यादिना तत्प्रतिबंधकं रूपपरावृत्तिप्रतिबंधकंच

ग्निसंयोगस्य तेजसः सुवर्णेपि सत्वादुक्तं. पीतिमेति. साध्ये विजातीयपदमुद्देश्यसि[illegible]र्थं हेतौ सत्वात्तमग्निसंयोगरहिते पूर्वरूपविजातीयरूपानाधारे घटे व्यभिचारवारणाय अत्र हेतौ [illegible]थिवीत्वं देयं तेन जलपरिमाणे न व्यभिचारः यथा कथंचिदग्निसंयुक्ते घटे तद्वारणायात्यंतेति. न चाप्रयोजकत्वं विरोधिद्रवद्रव्यसंबंधं विना पार्थिवाग्निसंयोगस्य पूर्वरूपविजातीयरूपजनकत्वादिति भावः न च द्रवद्रव्यादन्यदेव प्रतिबंधकं वाच्यं. अदृष्टकल्पनापत्तेरिति. तस्य चेति. तस्य द्रवद्रव्यस्य पृथिवीजलभिन्नस्येति. पृथिव्या पक्षीकृतपीतिमाश्रय[illegible]जातीयत्वाभावाज्जलस्य तत्रासंभवादिति भावः तेजोंधकारेंपीतेंस्त्वि नियमादिति. वाय्वादौ रूपाभावादिति भावः न चांधकारे पीतरूपाश्रयद्रव्यग्रहापत्तिः सुवर्णस्य रूपालोकसंयोगसत्वादिति वाच्यं. उद्भूतानभिभूतरूपालोकसंयोगस्यैव द्रव्यप्रत्यक्षे हेतुत्वात्सुवर्णरूपस्य त्वभिभूतत्वान्न. न च तदानीं पीतरूपस्याप्यग्रहात्सजातीयग्रहणकृतमग्रहणं न सुवर्णरूपस्येति न तस्यापि भूतत्वमिति वाच्यं. लघुतया सजातीयसंबंधस्यैवाभिभवपदार्थत्वात्. न च तथा

अंधकारे सुवर्णसाक्षात्कारापत्तेः तेजोभिन्नद्रव्यप्रत्यक्षं प्रत्येवालोकसंयोगस्य हेतुत्वादिति वाच्यं. सुवर्ण
भिन्नं यत्तेजस्तद्भिन्नद्रव्यप्रत्यक्षं प्रत्येव तस्य हेतुत्वादिति नवीनास्तु सुवर्णं पार्थिवमेव पीतंसुवर्णं द्रुत
मिति साक्षात्संबंधेन द्रवत्वप्रतीतेः प्रमात्वायोगात् उतं द्रुततरमिति प्रतीतेर्द्रुतत्वस्याप्यत्यन्तोच्छेदात्पृथिवी
त्वस्य पीतरूपसमवायिकारणतावच्छेदकत्वाद्रूपनाशे नाशात्तेन स्वर्णस्य विरोधित्वाच्च न पीतरूपनाश
इति वदन्ति॥ इति तेजोग्रंथः॥ ॥वायोः प्रमाणं दर्शयितुं मूले पाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतस्तुले·
तत्रापाकजादिपदानां क्रमेण व्यावृत्तिमाह. अनुष्णाशीतस्पर्शेति. उक्तमपाकजेति घटाद्यपाकजानुष्णा
शीतस्पर्शवत्त्वं घटादावतिव्याप्तं. तत्राप्यपाकजानुष्णाशीतस्पर्शवत्त्वव्याप्यद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं
पाकजानुष्णाशीतस्पर्शवद्दृश्यत्यनुष्णाशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थो नतेयाः
एतेन स्पर्शस्यानुष्णाशीतत्वकथनेन तज्जनकतावच्छेदकमिति. तथा च विजातीयस्पर्शजनकतावच्छे ॥६२॥
दकतया वायुत्वं जातिः सिद्ध्यतीत्यर्थः इदमुपलक्षणं शब्दविशेषस्य वह्नित्वावच्छिन्नस्य वानिमित्तका

रणेनावच्छेदकतया वायुत्वजातिसिद्धिरित्यपि ज्ञातव्यं. मूलस्पर्शादिलिंगके इति स्पर्शादीनि लिंगा
नि यस्य सः. तथा मुक्तावल्यां प्रतीतिः इति स्वगुरुणो द्रव्यस्यापतनं विजातीयस्पर्शेनेति. तृतीयान्तं च
तुष्कमनुमानादिस्वग्रन्थेन तेनान्वितं. अनुमितिप्रकारस्तु योयं रूपद्रव्यासमवेतस्पर्शः सः क्वचिदाः
श्रितः स्पार्शत्वात् पृथिवीस्पर्शवत्. अत्र पृथिव्यादिस्पर्शे सिद्धसाधनवारणाय रूपद्रव्यासमवेतस्पर्श
ति पक्षविशेषणं. एवमसति रूपवद्द्रव्याभिघाते योयं पर्णादिषु शब्दसंतानः स स्पर्शवद्वेगवद्द्रव्यसंयोग
जन्यः अविभज्यमानावयवद्रव्यसंबंधिशब्दसंतानत्वात् दंडाभिहतभेरीशब्दसंतानवत्. पृथिव्याद्य
भिघातजन्यत्वसिद्धसाधनवारणायासतीत्यादिपक्षविशेषणं. विभागजन्यशब्दे व्यभिचारवा
य रणाँहि तावद्विभज्यमानेत्यादि. एवं च नभसि तृणतूलस्यपि [illegible]मानादीनां धृतिः स्पर्शवद्द्रव्यसंयोगहेतु
का अस्मदाद्यनधिष्ठितद्रव्यधृतित्वात्. नौकादिधृतिवत्. जलादिगततृणादौ सिद्धसाधनवारणा
य नभसीति. प्रयत्नसंयोगहेतुकघटादौ व्यभिचारवारणायास्मदादीति. एवं तद्रूपद्रव्याभिघातसंत

रेण तृणे कर्म स्पर्शवद्वेगवद्द्रव्याभिघातजन्यं विशिष्टकर्मत्वात्. नदीपूराहतकाष्ठादिकर्मवदिति अ
त्रैवस्यन इति अग्रे आत्मनिरूपणावसरे इत्यर्थः मूले पूर्ववन्नित्यतायुक्तमिति पूर्ववत्. जलवदि
त्यर्थः नित्यतादीत्यादिनानित्यत्वपरिग्रहः उक्तं बोध्यमित्यर्थः एतदेव स्पष्टयति मुक्तावल्यां वायुर्द्वि
विधेति तत्र तेषु मध्ये अयोनिजमेवेत्यर्थः पिशाचादीनामिति मरुतां लोके प्रसिद्धमिति शेषः ननु२
वायोस्तात्वादिवाग्व्यापाराभावात्करणधमावेन वाहरणविहरणधमावात्कथं भोगाँन त्वमित्यत आ यथ
ह. परं त्विति जलीयतैजसशरीरयोर्बाधापेक्षया तुल्यत्वात्सुकरणलाघवमभिप्रेत्य स्वसाधारण्येन समा ९५
धानमाह. जलीयतैजसवायवीयेति ननु कथं न हि जलीयत्वादिव्यपदेशोत्यत आह गलादीनामि
ति अत्र त्वगिन्द्रिययोर्विशेषः अधिष्ठानादिशरीरव्यापकमिति चरमनखलोमकेशानां त्वगिन्द्रि
धा यानां रत्वादसंभव इति वाच्यं. तेषां संयोगिद्रव्यत्वेन शरीरत्वाभावात् मूलस्थस्य त्वगिन्द्रियमित्युत्वचि
स्थितमिंद्रियमित्यर्थः एतेन देहसहजावरणं त्वगित्युच्यते. तच्च पार्थिवं प्रत्यक्षसिद्धं चेति नेंद्रियं नव ॥६२॥

त२ स्य२

वायवीयमिति परात्वं त्वगिंद्रियस्य लक्षणमाह॰ स्पर्शेति कार्यमात्रजनककालादावतिव्याप्तिवारणा
येंद्रियमिति चक्षुरादावतिव्याप्तिव्यांप्तिं वारणाय स्पर्शग्राहकमिति॰ त्वगिंद्रियमित्यर्थः॰ तच्चेति त्वगिंद्रियंचे
त्यर्थः पक्षे स्पर्शवाभिव्यंजकत्वादसिद्धिवारणाय रूपादिषु मध्ये इति मनस्यतिव्याप्तिवारणायैवकारः इ
त्वक्संन्निकर्षे व्यभिचारवारणाय स्वप्नत्वे सतीत्यपि बोध्यं॰ अंगसंगिसलिलं स्वेदः॰ आकारे प्रसस्तपाद
भाष्यादौ प्राणस्त्वेक एवेति कथं तर्हि अपानादिव्यवहार इत्यत आह॰ स्थानवशादेति॰ हृदि प्राणो गुदेपा
नसमानो नाभिसंस्थितः॰ उदानः कंठदेशस्थो व्यानः सर्वशरीरग इति स्थानभेदादित्यर्थः॰ क्रियाभेदा
द्वेति मुखनासिकाभ्यां निष्क्रमणप्रवेशनात्प्राणः मलादीनामधोनयनादपानः आहारेषुकोपोर्थं वह्नेः स
मन्नयनात्समानः ऊर्द्ध्वनयनादुदानः नाडीमुखेषु वितननाद्व्यानः इति पंचसंज्ञां लभंते न तु संज्ञाभेदे
न संज्ञिभेदादित्यर्थः॥ वायुग्रंथः॥ ॥ आकाशेति॰ कालत्वं दिक्त्वं च न जातिरित्यत एवैक्यं न लाघवेना
दैवप्रसंगायुगपदभिग्रहीते न जातिरिति अनेकसमवेतत्वाभावादिति शेषः तेनैकव्यक्तित्वस्य जासमा

प३ पा३

दि०का० वेहेतुत्वे वैयधिकरण्यमिति प्रसक्तेः किंचिदिति आश्रयता चात्र समवायेन विवक्षिता तेन कालस्य जग
दाधारत्वेन शब्दाश्रयत्वेपि न क्षतिः मौलवैशेषिकपदवैयर्थ्यमाशंक्याह वैशेषिकेति. इत्थंच शब्द इति
मूले सा न धारणीयेयं एतेन विशेषगुणत्वकेनेन प्रमाणमित्यकाशे इत्यादिः तत्र शब्दः पृथिव्याद्यष्टद्रव्याति
रिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वादित्येवं रूपं बोध्यं दर्शितं सूचितं अत्रानुमाने स्व
रूपासिद्धिं परिहरन्नाह. नचात्मेति घटादौ व्यभिचारवारणाय चक्षुर्ग्रहणायोग्येति आत्मनि व्यभिचारवार
णायाह्नतये बहिरिंद्रियग्राह्येति रसत्वादौ व्यभिचारवारणाय जातिमदिति. एतच्चाप्यनुमानमप्रिमद्र 100
व्यसमवेतत्वसाधकानुमाने स्वरूपासिद्धिनिरासायेति बोध्यं. गुणत्वादिति. एतदनुमाने नोक्तपरिशेषा
नुमाने नोक्तपरिशेषानुमाने हेतौ विशेष्यासिद्धिनिरस्ता विशेषणासिद्धिमुद्धारयाह. शब्देन स्पर्शवद्विशे
षगुण इति न स्पर्शवतो द्रव्यस्य पृथिव्यादिचतुष्टयस्य विशेषगुण इत्यर्थः अकारणगुणपूर्वकप्रत्यक्ष
त्वादिति. अकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वादित्यर्थः हेतुमत्त्वं प्रतिपादयितुं पाकजेति. जलपरमा ॥६३॥

ण्वेति अनित्यानां पार्थिवरूपादीनां केषांचिदग्निसंयोगासमवायिकारणकत्वात्केषांचित्कारणगुणपूर्वकत्वादत्रोपेक्षा अदृष्टादीति. शब्दइत्यनुवर्त्तते बहिरिंद्रियेति मनसोन्यदिंद्रियं वहिरिंद्रियं तस्य ग्राह्यत्वादित्यर्थः एतेन नात्मगुणग्राहकेंद्रियत्वं वाह्येंद्रियत्वं. तत्र मनस्यपि अतिप्रशक्तेंने नापि रूपादिग्रहणादिति निरस्तं. इत्थं च अनेकप्रकारेण पृथिव्याद्यष्टद्रव्यानाश्रितत्वसिद्धौ च सिद्धानीति पूर्वोक्तपरिशेषानुमानेन सिद्धानीत्यर्थः तच्चैतत्सर्वं तदोपपद्येत यदि शब्दस्य विशेषगुणत्वे किंचित्प्रमाणं स्यात्तत्रैव
७५. वचमानं पश्याम इति चेत्तत्र शब्दो विशेषगुणः लौकिलप्रत्यासत्तेंद्रियग्राह्यत्वे सति लौकिकप्रत्यासत्यादीन्द्रियग्रहणयोग्यताराहित्ये व सति गुणत्वव्याप्यजातिमत्वादित्यनुमानस्यैव तत्र प्रमाणत्वात्तत्र भावमात्रस्य व्यभिचारवारणाय द्वितीयं सत्यंतं गुणत्वव्याप्येति गुरुत्वत्वमादाय व्यभिचारवारणाय प्रथमसत्यंतं संख्यात्वमादाय व्यभिचारवारणाय द्वितीयसत्यंतं सांसिद्धिकद्रवत्वस्नेहधर्माधर्मभावनासु प्रकृतहेतोरभावेपि तत्र हेत्वंतरेणैव विशेषगुणत्वं साधनीयमिति पूर्वोक्तानुमाने वाधं स्वरूपासिद्धिं चाशंकते.

स्यविभाजकतावच्छेदकधर्मव्याप्यगुणत्वात्.१

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

नै१

दि०क० न चेति वायाविति तथा च स्पर्शवद्वायुगुणत्वस्य तत्र सत्वात्तदभावसाधने र्वधेति भावः कारणगुणपूर्वक
पनं नु अकारणगुणपूर्वकसघटितहेतोरसिद्धिप्रदर्शनार्थं अयावद्रव्यभावित्वेनेति स्वाश्रयविनाशजन्य
नाशप्रतियोगियघं तद्भिन्नत्वेनेत्यर्थः ननु तथाप्याकाशे प्रत्यक्षमेव प्रमाणं किमिति नोपन्यस्तमिति चेन्न
चाक्षुषत्वे प्रयोजनस्य महत्वे सति उद्भूतरूपवत्वस्याकाशेऽसंभवेन चक्षुषः प्रमाजनकत्वासंभवात्. ननु
यदि आकाशो न चाक्षुषस्तदेह पक्षीति चाक्षुषाधिकरणत्वेन किं भासते इति चेदालोक एवेति कल्पन
त्वाकाशीयशरीरविषययोः प्रदर्शनमुक्तत्वेव कथमिन्द्रियप्रदर्शनमिन्द्रियन्तु मते श्रोत्रमित्यनेन ग्रंथेन 101
क्रियते स्याशंकाह. तत्र चेति. आकाशे चेत्यर्थः कर्णशष्कुलीभेदादिति चैत्रादिकर्णशष्कुल्यवछिन्नमा
काशचैत्रादिश्रोत्रमिति भावः तथास्तु शब्दनिमित्तकारणत्वेन क्लृप्तस्येश्वरस्यैव शब्दसमवायिकारणत्वं इ
न चेश्वरस्य शब्दसमवायित्वं वस्य वा इत्यत्र विनिगमनाविरहः जीवस्य शब्दसमवायित्वे ज्ञानवच्छब्दस्या
पि मानसत्वापत्तेः अदृष्टादिवत्प्रतिबंधकत्वकल्पने चातिगौरवं. न चैवं कर्णशष्कुलीविवरावछिन्नाका ॥६४॥

श्री क्रि५

शस्य कथं श्रोत्रत्वोपपत्तिरिति वाच्यं. तथाविधस्येश्वरस्यैव श्रोत्रत्वोपपत्तिरित्याहुः स्वतंत्रास्तु मृदंगादी-
नामेव गुणः शब्दः शब्दं प्रति मृदंगत्वादिना समवायिकारणतायाः स्वीकारात्. प्राचीनैपि मृदंगत्वादि-
नानिमित्तकारणतायाः स्वीकारात्. मृदंगे शब्द इति प्रतीतेश्च न च तत्रावच्छेदकत्वं विषयोमानाभावात्.
अन्यथात्रावच्छेदकताख्यस्वरूपसंबंधस्यान्यत्र समवायस्य कल्पने गौरवादिति वदंति ॥ इत्याकाश-
ग्रंथः॥ ॥ मूले जन्यानां जनक इति. कार्यत्वावच्छिन्नं प्रति निमित्तकारणमित्यर्थः अत्र च कालिकसं-
बंधावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपितमधिकरणतया निमित्तत्वं काललक्षणं। कालिकसंबंधा-
वच्छिन्नेति करणादिश्वधिकरणांतिकरणादृष्टेश्वरयोर्नातिव्याप्तिरिति ध्येयं ननु कार्योत्पत्त्यधिक-
रणत्वेन कालो विषयीक्रियते तदुत्पत्त्यधिकरणत्वेन व्यवहारविषयस्य च तदुत्पत्तिहेतुत्वनियमात्. तदु-
त्पत्तिहेतुत्वस्य तदन्वयित्वेप्यत्वात्. एवं च तत्तत्कार्यविशेषं प्रति तत्तत्कालविशेषस्य हेतुत्वे सिद्धे यद्विशेष-
योरिति न्यायात् कार्यमात्रे कालस्य हेतुतासिद्धिरिति सा च हेतुता निमित्तकारणतैव न च कालस्य कार्यमात्रे

दि०का०

निमित्तहेतुत्वेन संभवति. स्वसमवेतद्विपृथक्त्वसंयोगविभागपरत्वापरत्वं प्रति कालस्य समवायिकारणत्वे
ऽपि तद्भिन्नत्वघटितस्य निमित्तकारणत्वस्य तत्राभावादित्याचार्यो न शंक्यं समवायसंबंधेन द्वित्वादिकं प्रति
तस्य समवायिकारणत्वे ऽपि कालिकसंबंधेन द्वित्वादिकार्यं प्रति निमित्तकारणत्वस्यानपायात्. एवमेव का
र्यमात्रे दिशो ऽपि निमित्तकारणं बोध्यं. मुक्तावल्यां तत्रेति. तत्र काले जगतामाश्रय इतीति कालः सर्वबानिः
ति. प्रतीत्या सर्वाधिकरणत्वेन कालसिद्धिरिति भावः. न त्वेतादृशप्रतीतिर्दिग्विषयिण्येवास्त्वतिरिक्त
कालकल्पने गौरवादतो न केवलमनया प्रतीत्या कालः साध्यते ऽपि तु प्रमाणान्तरेण सिद्धे काले प्रकृतप्रती
तिबलात्सर्वाधारत्वं कल्प्यत इत्याह. इदानीमित्यादिना सूर्यपरिस्पन्दादिकमिति इदानीं तदानीमिति प्र
तीतिर्महाकालं विषयीकरोतीति तु न वाच्यं. तथा सति इदानीं घटो न तदानीमिति प्रत्ययानुपपत्तेः न च तत्त
त्क्रियाविशिष्टे महाकाल एव तदानीमित्यादिप्रत्ययविषयः तथा चेदानीं घटो न तैदानीं तदानीमित्यस्यैत ॥६५॥
त्क्रियाविशिष्टमहाकाले घटो न तत्क्रियाविशिष्टमहाकाले इत्यर्थ इति वाच्यं. तथा सति तत्तत्क्रियावि

102

ति३

५२

शिष्टमहाकालापेक्षयालाघवेन तत्तत्क्रियाया एव तादृशप्रतीतिविषयत्वस्योचितत्वादिति इतीत्यानन्तरं
स्वाश्रयतपनसंयोगसंयोग एव संबंधो वा वाच्यस्तत्रेति शेषः नन्वाकाश एव संबंधघटक आस्तामिति वा
च्यं. आकाशदिगात्मनां विनिगमनाविरहेणातिरिक्तकालस्यैव न्यायत्वात्. इत्थं चेति अतिरिक्तका
लसिद्धौ चेत्यर्थः सम्यगिति कालः सर्ववानिति प्रतीतेरतिरिक्तकालविषयकत्वस्यैवोचितत्वादिति भावः
परत्वापरत्वबुद्धेरिति ज्येष्ठे परत्वप्रत्ययः कनिष्ठे चापरत्वप्रत्ययः स च परत्वापरत्वगुणविशेषाधीनः प
रत्वापरत्वे चासमवायिकारणकभावकार्यत्वादसमवायिकारणं च तयोः कालपिंडसंयोग एवेति परत्वा
परत्वयोरसमवायिकारणसंयोगाश्रयतया कालसिद्धिरिति भावः परत्वापरत्वयोरित्यस्यैव वक्तुमुचित
त्वेपि तद्बुद्धिपर्यंतानुधावनं कालिकपरत्वापरत्वयोः प्रमाणदर्शयितुं न च पिंडगतरूपादेरेव परत्वाप
रत्वासमवायिकारणत्वमस्तीति वाच्यं. कालिकपरत्वापरत्वयोर्यावद्युत्स्या स्याव्यभिचारात्. अत एव
पृथिवीपिंडसंयोगस्य न तत्र कारणत्वं. पृथिव्यसंयुक्तपदार्थेपि तादृशपरत्वापरत्वयोरुत्पादेन व्यभिचार

२।२

दि० वारात्. ननु तथाप्याकाशाद्यात्ममनोभिः पिंडसंयोगस्य तथात्वं स्यात् किं कालकल्पनयेत्यत आह. ला
घवादिति. आकाशादिस्पंदो पिंडसंयोगस्य तथात्वे जीवात्मपिंडस्यैकं विनिगमनाविरहात्ममनसोर
नन्तत्वात्तन्न तथात्वं किंतु लाघवादतिरिक्तकाल एव तथात्वेन कल्पनेति भावः. ननु यदि काल एक एव त
दा क्षणलवकाष्ठादिनानाव्यवहारस्तत्र न स्यात्. न चैकस्मिन्नेव घटे घटः कलशः कुंभ इति व्यवहार
८५ वंत्रापि क्षणादिनानाव्यवहारे बाधकाभावादिति वाच्यं. एकस्मिन्विरुद्धनानाव्यवहारायोगात्. न हि घ
टत्वकलशत्वादिकं मिथो विरुद्धं क्षणत्वदिनत्वादिकं तु विरुद्धमेव न हि दिनं क्षण इति प्रतीतिरस्तीति शंक 103
ते नन्वेकस्येति समयभेदः समयभेदव्यवहारः विभिन्नव्यवहारविषयत्वमितियावत्. एकस्मिन्नविर
रुद्धनानाव्यवहारविषयत्वाभावादिति भावः. उपाधिभेदादिति तथा चैकस्यैव कालस्य किंचिद्धर्मविशि
ष्टस्य क्षणत्वं किंचिद्धर्मविशिष्टस्य दिनत्वं. ननु केवलाः कालस्येति भावः. इदमुपलक्षणं तादृशोपाधिभि ॥६६॥
मेव क्षणत्वादिव्यवहारविषयत्वं न तु महाकालस्येत्यपि द्रष्टव्यं जन्येति स्वंक्रियाघटगतैकक्रियानाद्

पं१

शोत्तरोत्पन्नतदुनक्रियान्तरजन्यविभागप्रागभावविशिष्टस्य प्रथमकर्मणः क्षणचतुष्टयावस्थायितेः क्षणत्वायोगाच्च यदि च न स्यात् प्रामाण्येप्याग्रहस्तदा पूर्वसंयोगनाशस्यैव विभागनाशकत्वाभिप्रायेण योजनीयः चतुर्थक्षणे तमाह - उत्तरसंयोगेति स्वनाशोत्तरसंयोगेत्यर्थः तेन सर्वस्यैव संयोगस्योत्तरसंयोगतया तद्विशिष्टकर्मणः क्षणचतुष्टयावस्थायिनः क्षणत्वापत्तिर्निरस्ता न चैतादृशक्षणलक्षणं महाप्रलयात्मकक्षणेऽव्याप्तं तत्र तादृशकर्माभावात् - न च महाप्रलयस्य क्षणत्वाभाव इष्ट एवेति वाच्यं - तत्रापि क्षणत्वव्यवहारसत्त्वादन्यथा महाप्रलयोत्पत्तौ उत्पत्तिलक्षणस्य तदधिकालक्षणवृत्तित्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वरूपस्याव्याप्त्यापत्तेः तत्र महाप्रलयाधिकरणक्षणप्रसिद्धेः रंतंत्रांहं. मंहां वृत्तित्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वरूपस्याव्याप्त्यापत्तेः तत्र महाप्रलयाधिकरणक्षणप्रसिद्धेः तत्राह. महाप्रलयइति. महाप्रलये क्षणव्यवहारो नास्त्येव उत्पत्तिक्षणस्य क्षणघटितस्यैव स्ववृत्तिध्वंसप्रतियोगिकालावृत्तित्वविशिष्टस्ववृत्तित्वरूपस्य तदुत्पत्तौ संभवादित्यभिप्रायो नं यदीति ध्वंसेनैव

श्रोगि१

दि०क० ति. स्ववृत्तिध्वंसप्रतियोगिक्रियावध्वंसविशिष्टसमयस्यैव तत्तत्क्षणत्वव्यवहारविषयत्वादिति भावः॥ इति कालग्रं
थः॥ ॥बीजं प्रयोजकं दिशस्तत्र प्रयोजकत्वं तद्दर्शयति दैशिकपरत्वापरत्वयोरिति तथा च परत्वापर
त्वबुद्धिं प्रति परत्वापरत्वे निमित्ते. तत्र दिक्कृपिंडसंयोगस्तत्र दिगिति क्रमेण परंपरया दिशस्तद्धेतुत्वौ निमि
त्तँत्वमवादिति प्रतीच्यादौत्यादिना उदीच्यादिसंग्रहः उपाधीनीति. वस्तुतो दिश एकत्वेन तदुपाधिभेदेन
प्राच्यादिसंज्ञाभेद इति भावः प्राच्यादिसंज्ञासु निमित्तभूतानुपाधीनाह. पत्युरुषस्येति. पुरुषस्येति प 104
दार्थमात्रोपलक्षणं चम्पर्य्येषष्ठादिकमूर्त्तमेवमग्रेपि. तथा च. यदपेक्षयोदयगिरिसन्निहितं यन्मू
र्तं सा ततः प्राचीत्यर्थः यदपेक्षयोदयगिरिसन्निहितत्वं च. तन्निष्ठोदयगिरिसंयुक्तसंयोगापेक्षयाल्प
तरोदयगिरिसंयुक्तसंयोगवत्त्वं. इत्थं च. मथुरातः प्राच्यां प्रयाग इत्यत्र मथुरानिष्ठोदयगिरिसंयुक्त
संयोगपर्याप्तसंख्याव्या[illegible]संख्यापर्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्त्तवृत्तिः प्रयाग इत्यन्व ॥६२॥
यबोधः एवं काशीतः प्रतीच्यां प्रयाग इत्यत्र काशीनिष्ठोदयगिरिसंयुक्तसंयोगपर्याप्तसंख्याव्यापकसंख्या
त्वं बोध्यं. अत्रापि बुद्धिपर्य्यंतानुधावनं दैशिकपरत्वापरत्वयोः प्रमाणं दर्शयितुमेतादृशपरत्वापरत्वमेव तदनुमितेः० व्या१

क्षणत्वापत्तिरतः स्वजन्येति. नन्वेवं प्रथमक्षणे क्षणत्वव्यवहारोपपादनेपि द्वितीयक्षणे
तदुपपादनं. तत्र क्रियाजन्यविभागोत्स्यसाविभागप्रागभावाभावात्. न च द्वितीयक्षणे य
त्पन्नक्रियान्तरस्यैव निरुक्तविशिष्टस्य तत्रक्षणत्वमिति वाच्यं. प्रतिक्षणं क्रियोत्प
त्तौ मानाभावादतस्तत्रापि क्षणव्यवहारोपपादकमुपाधिमाह. पूर्वसंयोगेति. स्वज
न्यविभागनाश्यपूर्वसंयोगविशिष्ट स्वजन्यविभाग इर्थः. तेन स्वजन्यविभागस्य
यत्किंचित्पूर्वसंयोगविशिष्टस्य द्वित्रिक्षणवृत्तित्वेपि यत्किंचिद्विभागस्य स्वजन्य
विभागनाश्यपूर्वसंयोगविशिष्टस्य तथात्वेपि च न क्षतिः. तृतीयक्षणे तदुपपाद

कमुपाधिमाहः पूर्वसंयोगनाशावच्छिन्नउत्तरसंयोगप्रागभावो वेति॰ स्वजन्यवि
भागजन्यपूर्वसंयोगनाशावच्छिन्नस्वजन्योत्तरसंयोगप्रागभाववत्त्वमर्थान्नातिप्र
संगः क्वचित्पुस्तके पूर्वसंयोगनाशावच्छिन्नविभागो वेति॰ पाठः स च प्रामादिकः 105
प्रथमद्वितीयचतुर्थलक्षणेष्वेकैकोपाधेरेवाभिमततया तृतीयलक्षणे उपाधिद्वया ६०
भिधाने संदर्भविरोधापत्तेः उत्तरसंयोगस्यैव विभागनाशकतायाः सिद्धान्तसि
द्धतया निरुक्तोपाधेः क्षणद्वयावस्थायिनः = = = = = = = = = = = = = = ५८

प ३ ६० प्रथमप॰
७ पंक्तौ
मूले त्रुटिः

७॥

पर्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्त्तिः प्रयागइत्यन्वयबोधः एवमन्यत्रापि बोध्य तुहनी
याः तन्निष्ठादयाचलसंयुक्तसंयोगपरंपराघटकमूर्त्तं तत्प्राचीत्यपि वदन्ति। दीधितिकृतस्तु दिक्कालौ
नेश्वरादतिरिच्येते मानाभावात्। तत्तत्कालोपाधिदिगुपाधिविशिष्टादीश्वरादेव क्षणादिनप्राचीप्रती
च्यादिव्यवहारोपपत्तेरित्याहुः। तत्र नव्याः ईश्वरस्य दिक्कालरूपत्वं तज्जीवस्यावेति विनिगमनाविर
हेणातिरिक्तयोस्तयोः स्वीकारः। न च तत्तज्जीवस्य जगज्जनकत्वं परत्वापरत्वजनकत्वं च कल्प्यमीश्व
रस्य तु क्लृप्तमिति लाघवमिति वाच्यं। संबंधघटकयोर्दिक्कालयोर्जगज्जनकत्वाकल्पनादिक्कालोपा
धीनामेव जगज्जनकत्वकल्पनात्। परत्वापरत्वयोस्तु गुणत्वएवमानाभावः सन्निकृष्टत्वविप्रकृष्टत्वा
भ्यामेव परापरव्यवहारोपपत्तेरिति वदन्ति॥ ॥इति दिक्निरूपणं॥ ॥सुखदुःखादीति। आदिना ज्ञानेच्छा
द्वेषकृतिधर्माधर्मभावनापरिग्रहः। यद्यप्यात्मत्वस्यान्यात्मप्रत्यक्षत्वेपि स्वात्मनि स्वरूपतो मानस
प्रत्यक्षविषयत्वमस्त्येव तथापि सकलात्मसाधारणानुगतप्रत्यक्षासंभवेन जातिरूपं तन्न सिध्यति

तु

अनेकसमवेतत्वघटितजातित्वग्रहे अनेकव्यक्तिग्रहे हेतुत्वस्य सर्वसिद्धत्वादित्यनुमानमेव तत्र प्रमाण
मित्यभिप्रायेण सुखादिकारणतावच्छेदकतत्सिद्धिः प्रदर्शिता. अथ सुखत्वाद्यवच्छिन्नं प्रत्यात्मत्वेन कार
णत्वे मानाभावः सुखदुःखद्वेषभावनाधर्माधर्मा. अतियथाक्रमधर्माधर्मे निष्ठसाधनत्वादिज्ञानानुभ
वविहितनिषिद्धकर्मणां समवायसंबंधेन निमित्तकारणत्वावश्यकतयातिप्रसंगभंगात्. भावकार्याणां
समवायिकारणत्वनियमस्यनुद्रव्यत्वेन तत्तद्व्यक्तिसमवेतं प्रति तत्तद्व्यक्तित्वेन वा समवायिकारणत्वमाश्र
येणोपपत्तित्वादिति चेदत्र प्राचः. कार्यमात्रवृत्तिजातेः समवायिकारणकार्यतावच्छेदकत्वनियमेन ता
दृशकार्यकारणभावस्यावश्यकत्वात्. न चैतावता सुखत्वाद्यवच्छिन्नं प्रतिसत्वेन द्रव्यत्वेन कारणत्वे
मस्तु. अदृष्टादेर्निमित्तकारणत्वादेवातिप्रसंगनिरहादिति वाच्यं. व्याप्यलघुभूतधर्मे कारणतावच्छे
दके संभवति व्यापकधर्मेण कारणत्वकल्पनायाः अनुदयादित्याहुः. वस्तुतस्तु. मनसि ज्ञानोत्पत्तिवारण ॥६८॥
य ज्ञानत्वावच्छिन्नं प्रत्यात्मत्वेन हेतुत्वमावश्यकमिति. ननु तथाप्यात्मत्वजाते भगवदात्मसाधारण्यमाना

भावः इत्यत आह· ईश्वर इति· आत्मा वारे द्रष्टव्य इत्यादिश्रुत्या वात्मपदव्यवहारादिति भावः· ननु तर्हीश्वरे सु
खाद्युत्पत्तिः कुतो न भवतीत्यत आह· अदृष्टाभावादिति· आदिना शरीरपरिग्रहः· ननु नित्यस्य स्वरूपयोग्यत्वे फ
लावश्यंभाव इति नियमेश्वेनेरस्य स्वरूपयोग्यत्वे फलोपधानापत्तिरित्यत आह· नित्यस्येति· न· चेश्वरे दुः
खं कुतो नोत्पद्यत इति चेन्न· मिथ्याज्ञानरूपकारणाभावात्· मिथ्याज्ञानस्याहेतुत्वे च मुक्तात्मन्यप्यदृष्टो
त्पत्तिप्रसंगः· वेदस्यात्मपदादेर्ज्ञानादिमति लक्षणापत्तिरित्यस्वरस आहुरित्यनेन सूचितः· इन्द्रियाद्य
धिष्ठातेति मूलमात्मप्रमाणपरतया व्याचष्टे· इन्द्रियाणामिति· आदिपदसंग्राह्यमाह· शरीरस्येति· प
रंपरया जनकतासंबंधेन चेचैतन्यं· ज्ञानवत्त्वं· एतेनात्मनि प्रमाणमुपदर्शितं· अचेतनन चेतनाधिष्ठि
तया करोतीति व्याप्तेः· अहं सुखी इत्यादिनाहं जानामि करोमीत्यादिपरिग्रहः· न चात्मा तावन्न प्रत्यक्ष इति:
सूत्रभाष्यविरोध इति वाच्यं· आत्मानत्वविवेकपरात्माभिप्रायेण भाष्यव्याख्यानस्य पुनर्दर्शितत्वात्· वि
प्रतिपन्नं प्रतीति· अहमिति प्रतीतेः शरीराद्यतिरिक्तविषयत्वे विप्रतिपन्नं प्रतीत्यर्थः· नैयायिकमते यथासु

क्षात्मनां ज्ञानाभावेन न ज्ञानाधिकरणत्वरूपं चैतन्यं. तथा ममापि मते मृतशरीरस्य न चैतन्यमिति. श
रीरमेवात्मेति. वादी चार्वाकः. शंकते. चैतन्यमिति तदभावे ज्ञानाभावेन तुल्यम् मते मृतशरीरे चैतन्याभा
वः. इति निबंधनः. मन्मते तु प्राणविशिष्टस्यात्मनो विरह एव तत्र हेतुरित्यत आह. प्राणाभावेनेति. तथा
च लाघवात्प्राणाभाव एव चैतन्यविरहे प्रयोजक इति भावः. चार्वाकमतं परिहरति नेति. स्मरणानु
पपत्तेरिति. अनुभवो यस्य बाल्यशरीरस्य तदानीमभावादिति भावः. ननु बाल्यशरीरं तदास्त्येवे
त्यत आह. शरीराणामिति. संस्कार उत्पद्यत इति. तथा च. स्वप्रयोज्यसंस्कारसंबंधेन बाल्यशरीरसमवेता
नुभवस्य स्थविरशरीरे सत्त्वान्न स्मरणानुपपत्तिरिति भावः. [illegible] गौरवस्य फलमुखत्वाद्दूषणान्तरमाह. ए
वमिति. तस्मादित्यत्र हेतुमाह. इहेति. तद्धेतुत्वात्. प्रवृत्तिहेतुत्वात्. तदानीं स्तनपानप्रवृत्त्या व्यवहितपूर्वकाले
ननु प्रवृत्त्यन्यथानुपपत्तिस्तव मतेऽपि समानेत्याशंक्य स्वमते प्रवृत्त्यन्यथानुपपत्तिं परिहरति. मन्मते त्विति ||१८||
अन्यदपीति. इष्टसाधनत्वादन्यदपीत्यर्थः. अत्र तु स्तनपानवृत्त्यनुकूलेष्टसाधनतास्मरणानु. आत्मनो नि

त्पत्वंसाधयति.इत्थंचेति.प्रागभावस्यनाशासंभवादाह:भावेति.नाशासंभवादिति.नाशंप्रतिजन्यभावे
त्वेनहेतुत्वादात्मनोऽनादित्वेनजन्यभावत्वरूपहेतोरभावेननाशासंभवादित्यर्थः.ननुचक्षुरादीनामे
वज्ञानादिकंप्रतिकरणत्वेकर्तृत्वंवास्त्विति करणत्वंहि व्यापारवत्वे सतिकारणत्वं.भवतिहिचक्षुरादे
श्चक्षुःसंयोगादिरूपव्यापारवति चाक्षुषज्ञानाव्यवहितपूर्वकालेवृत्तित्वं.ननुफलोपहितत्वराजसूयेन
स्वाराज्यकामोयजेतेत्यादौयागादिनिष्ठकरणत्वादावप्रसंगात्.करणत्वकारणत्वयोरविशेषप्रसंगा
च्च.कर्तृत्वंचप्रयत्नादिक्रियानुकूलकृतिमत्वं.नसंभवत्यचेतनेचक्षुरादौतथापिपूर्वपक्षिणोतिरिक्तस्या
त्मनःकृत्यादीनामात्मसमवेतत्वस्यानंगीकरणात्कृत्याश्रयत्वमपिचक्षुरादीनामस्तीत्यर्थः.नचैकस्यै
वकर्तृत्वेकरणत्वेकर्तृकरणादिव्यवहारेभेदोनुपपन्नइत्यतोविरोधइति.विरोधे.भिन्नाधिकरणवृत्ति
त्वेनतथाच.कर्तृत्वकरणत्वादिलक्षणोपाधिभेदात्कर्तृत्वेकरणादिव्यवहारभेदोपपत्तिरित्याशयः.नचेत
न्यमित्यत्रविशेषणतयोपस्थितस्याभावस्यतच्छब्देनपरामर्शसंभवाद्व्याचष्टे तथात्वेचैतन्यमिति.उपघात

दि॰क॰ पदस्य लोके वयवनाश एव प्रयोगादाह· नाशालिमूले उपघाते कथं स्मृतिरित्युक्तं· तत्रोपघातः केषामित्या
कांक्षायाः सत्वादाह· अर्थादिति· तथा चैकमेवेन्द्रियाणामतिरिक्तेमूले नेन्द्रियाणां चैतन्यपक्षे स्मृत्यभावः
आपादितस्तत्र हेतोरनुक्तेः स्वयं हेतुं पूरयन्नर्थमाह· पूर्वं चक्षुषेति न चेन्द्रियान्तरेणैव स्मृतिमविषयी
त्वानेआह· अन्येनानुभूतस्येति· तत्र हेतुमाह· अनुभवेति· यद्यपि व्यधिकरणयोः कार्यकारणभावविर
हात्सामानाधिकरण्येनेत्युक्तिर्विफला तथापि यत्र विषयतासंबंधेन स्मृतिस्तत्र विषयतासंबंधेना
नुभव इतीदृशविषयत्वघटितसामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभाव आवश्यकः आत्मनि 108
ष्ठसामानाधिकरण्यघटितकार्यकारणभावेन घटाद्यनुभवोत्तरं पटादेर्विषयतासंबंधेन स्मृत्यापत्तेः
रवारणादिति· चक्षुः कर्तृकानुभवस्य घटे सत्वादिन्द्रियान्तरकर्तृकं स्मरणं तत्र नानुपपन्नमित्याशंकाङ्
निराकरणायतथोक्तिः समवायघटितसामानाधिकरण्यप्रत्यासत्त्येति तदर्थः चैत्रस्य घटानुभवका ॥१०॥
ले मैत्रस्य घटस्मरणावारणात्तत्पुरुषीयत्वनिवेशे पुरुषभेदेनानन्तकार्यकारणभावकल्पने गौरवात्स्व

विषयनिवेशेनेनुगौरवमिति भावः २

मवायघटितसामानाधिकरण्यप्रत्यासत्त्यानयोर्हेतुमद्भावेस्वीकारादितिभावइतिध्येयं॥इन्द्रियाणांचेतन्य
पक्षेयोदोषःसोत्रकेस्येनास्तीनिरस्चिकीर्षुर्निरस्यति·ननुतथेस्यत्रमूलेनछेदेनपूर्वापरस्थितेनचैतन्यस्यैवप
रामर्शःस्यात्तथाचासंगतिरतआह·नतथानचेतनमिति·अनध्यक्षेनदोयमनेदितिमूलेनमनसेसम्बन्धेनान्यैर्ज्ञा
नादेरप्रत्यक्षत्वमुक्तंतत्रहेतुंप्रदर्शयन्नर्थमाह·मनत्वइति·नत्वप्रत्यत्वेति·ज्ञानादिप्रत्यक्षानुपपत्तेरित्या
र्थः·ननुमनसोणुत्वमेवासिद्धमतआह·यथाचेति·अग्रेवक्ष्यइति·अयौगपद्याज्ज्ञानानांतस्याणुत्वमिहेः
यनइतिग्रन्थेनमनसोणुत्वंसाधयिष्यतइत्यर्थः·विज्ञानवादीशंकते·नत्विति·विज्ञानमेवेति·आत्मः
निरूपणस्यवस्तुतत्वादात्मेत्युक्तंवस्तुमात्रस्यतन्मतेविज्ञानरूपत्वादितिबोध्यं·अत्रज्ञानत्वेप्रमेयत्वस्य
सत्वस्यव्यापकंनवेतिविप्रतिपत्तिःतत्रविधिकोटिर्योगाचारस्यनिषेधकोटिर्नैयायिकस्येतिध्येयं·यद्वि
विधंविज्ञानंप्रवृत्तिविज्ञानमालयविज्ञानंचेति·तत्रघटइतिप्रवृत्तिज्ञानं·अहंज्ञानमित्यालयज्ञानं·तदेवं
ज्ञानस्यविज्ञानस्यननुसुषुप्तावात्मानसिध्येत्पूर्वोत्पन्नस्यविज्ञानस्यक्षणिकत्वेननाशाद्विज्ञानान्तरस्य

दि० कु० च तदानीमुत्पादकाभावादत आह. पूर्वपूर्वेति. ननु विज्ञानस्य क्षणिकत्वेन तदाश्रितसंस्कारस्यापि क्षणि
कत्वात्कालांतरे स्मरणं न स्यादित्याशंकां परिहरति. मृगमदेति. विज्ञानस्य जगद्विषयत्वं यत्किंचिद्विषय
त्वं वाभिप्रेतमिति विकल्पाद्ये दूषणमाह. तस्येति. द्वितीये त्वाह. यत्किंचिदिति. आँ स्वरूपविज्ञानस्य सवि रा २
षयकत्वे दूषणमाह. सुषुप्ताविति शंकते. तदानीमिति. निराकारा निर्विषयिणी चित्संततिः विज्ञानसंततिः
प्रकाशत्वे ज्ञानत्वे ज्ञानत्वस्य विषयिताव्याप्यत्वादिति भावः. अन्यथाप्रमाणाभावेपि तत्र ज्ञानत्वस्वीकारे:
आकारस्य विज्ञानातिरिक्तत्वमनतिरिक्तत्वं चेति. विकल्पाद्ये दूषणमाह. तर्हि स्वमेति. द्वितीये त्वाह. समू 109
हालंबना इति. नीलपीत इति. समूहालंबन इत्यर्थः स्यादिति तदभिन्नाभिन्नस्य जगदभिन्नत्वनियमा
दिति भावः. एतदेवोपपादयति. स्वरूपतो विज्ञानस्येति. विज्ञानस्वरूपस्येत्यर्थः. अविशेषादेकत्वात्. ननु
नीलाकारः पीताकारश्चाभिन्न एव भेदप्रतीतिस्तु तद्धर्मयोर्नीलत्वपीतत्वयोर्भेदात्. न च तयोरपि विज्ञान
स्वरूपत्वादभेदः नीलत्वादेरपारमार्थिकपारमार्थिकविज्ञानेनाभेदासंभवादित्यभिप्रायवानाशंकते. अ ॥७१॥

बोधरूपमिति. अनीलव्यावृत्तिरूप इत्यर्थः. इतरथा विरुद्धनीलत्वादीनामेकत्रसमावेशेन ननु समूहालंब
ने न नीलाकारः न वा पीताकारोऽनुपपत्तेः परन्तु चित्राकार एवेति नोक्तदोष इति पूर्वोक्तं वासनासंक्रमे मुख्य
तया दूषयति नवेति. मातृपुत्रयोरिति. मात्रानुभूतस्य गर्भस्थेन तनयेन स्मरणप्रसंगादिति भावः. उपादा
नेनानुभूतं उपादेयेन स्मर्यत इत्यपि निरस्यति. नचेति शंकते. उत्तरस्मिन्निति. तदुत्पादकेति. वासनो
त्पादकेत्यर्थः. चित्तामेवेति. ज्ञानानामेव संस्कारोत्पादकत्वे तेषामानन्त्यात् संस्कारानन्त्यापत्तिरित्यर्थः. शंकते क्ष
णिकेति. अतिशयविशेषः शक्तिविशेषः उत्तरोत्तरज्ञानानुकूलतयेति शेषः. गौरवादिति स एवायमित्यपा
मरप्रत्यभिज्ञानात्क्षणिकानन्तशक्तितत्प्रागभावध्वंसकल्पने गौरवादित्यर्थः. ननु क्षेत्रस्थबीजादंकुरोत्पत्ति
र्न कुसूलस्थबीजादेर्नांकुरत्वावच्छिन्नं प्रति कुर्वद्रूपत्वेन हेतुत्वमंगीक्रियते. कुर्वद्रूपत्वं चांकुरजनकतावच्छे
दकतया सिद्धो जातिविशेषः स च फलोपधायकक्षणिकसमर्थबीजमात्रवृत्ति बीजत्वव्याप्यः कल्प्यते. एव
मन्यत्रापि कुर्वद्रूपत्वेनैव क्षणिकशरीरेषूत्तरोत्तरशरीरनिष्ठवासनोत्पादकत्वं वाच्यमत आह. बीजादा

दि॰के॰

वदीति. उपपत्तेः कस्माच्चिद्बीजादंकुरोत्पत्तिः कस्माच्चिन्नेति नियमोपपत्तेः कुर्वद्रूपत्वाकल्पनादिति. कुसूलबी-
जादिषु धरणिसलिलसंयोगादिरूपसहकार्यभावादेवांकुरानुत्पत्तेः कुर्वद्रूपत्वं तद्रूपेण जनकत्वं च नक-
ल्पने प्रमाणाभावादिति भावः अत्र वदन्ति. यत्ने क्षणिकमिति व्याप्त्यंगीकारे कुसूलस्थबीजादंकुरोत्पत्ति-
जगतः क्षणिकत्वात्तदनुरोधेन च कुर्वद्रूपत्वं तद्रूपेण कार्यप्रतिहेतुत्वं चावश्यकं. न च तादृशव्याप्तेर्माना-
भावः तादृशव्याप्त्यंगीकारे कुसूलस्थबीजादंकुरोत्पत्तिवारणाय धरणिसलिलसंयोगादीनां सहका-
रित्वकल्पने गौरवात्. तादृशव्याप्तिस्वीकारे तु कुर्वद्रूपत्वेन हेतुत्वकल्पनात्कुसूलस्थबीजे कुर्वद्रूपत्वाभावाद- 110
वांकुरानुत्पत्तेर्[illegible]कारणान्तराणामिति लाघवात्. न च क्षणिकत्वमतेपि बीजस्य धरणिसलिलसंयोगा-
देर्वा कुर्वद्रूपत्वेन हेतुत्वमित्यत्र विनिगमनाविरहेण सर्वेषां सहकारिणां कारणत्वकल्पनमावश्यकमि-
ति वाच्यं. मन्मतेंकुरं प्रति बीजानां धरणिसलिलसंयोगादिसहकारिणां च कुर्वद्रूपत्वेनैव हेतुत्वकल्पनात्.
कुर्वद्रूपत्वानंगीकारे तु बीजत्वधरणिसलिलसंयोगत्वादिना नानाहेतुत्वकल्पने गौरवादिति नव्यमत्. शेष ॥७२॥

सहकारिता ४

ना१

शगौरवापेक्षया क्षणिकानंतपदार्थकल्पनेऽपि गौरवात्. न च लाघवात्क्लृप्तत्वे न तेषामेव हेतुतासिद्धेरी
दृशं गौरवं न दोषाय फलमुखत्वादिति वाच्यं. फलमुखगौरवस्याप्यदोषत्वात्. किंच जगतः क्षणिकत्वे स
एवायं घट इति प्रत्यभिज्ञानुपपत्तिः पूर्वकालीनघटाभेदस्य तत्कालीनघटेऽभावात्. न च तज्जातीया
भेद एव तादृशप्रतीतेर्विषयः तन्मते जातेरपि क्षणिकत्वेन पूर्वकालीनघटवृत्तिघटत्वस्य तत्कालीनघ म५
टेऽभावात्. एतेन जगतः क्षणिकत्वे नाशत्वावच्छिन्नं प्रति सत्वेनैकमेव हेतुत्वमिति लाघवमप्यपास्तं. यदपि
म५ स्थिरपदार्थांगीकारे एकस्मिन्पदार्थे सामर्थ्यमसामर्थ्यं च विरुद्धं. ततस्तद्भेद इति. तदपि न एकस्मिन्नेक
कालावच्छेदे सामर्थ्यतदभावयोरेव विरुद्धतया कालभेदेन तत्स्वीकारे बाधकाभावात्. यत्तु पूर्वापरकालीन
धर्मिणोरभेदे तद्धर्मयोः सामर्थ्यासामर्थ्ययोर्भेदोऽनुपपन्नस्तन्मते धर्मिणोरभेदादिति तन्न घटत्वादिप्रती
तीनामप्रामाण्यापत्त्या धर्मधर्मिणोरभेदस्य वक्तुमशक्यत्वादिति दिक्. वेदान्ती शंकते. अस्तु तर्हीति. क्षणि
कविज्ञानमिति. आत्मनः क्षणिकविज्ञानस्वरूपत्वपक्ष इत्यर्थः आत्ममात्रस्य नित्यविज्ञानरूपत्वमीश्वर

धर्म१ त्वन्नघट२

दि०कं० स्यैव वेति विकल्पाद्ये दूषणमाह. तस्येत्यादिना दर्शितत्वादिति. तस्य जगद्विषयकत्व इत्यादिग्रंथेन
दर्शितत्वादित्यर्थः॥ तथा च वीजस्य तथात्वासंभवान्नात्ममात्रस्य नित्यज्ञानरूपत्वमिति भावः ननु जीव
स्य न जगद्विषयकत्वं. न वा नियतयत्किंचिद्विषयकत्वं ब्रूमः परं तु. यद्विषयकत्वं. यत्र जीवानुभवसि
द्धं. तत्र तद्विषयकत्वमत आह. सविषयकत्वस्येति. ननु सत्यं ज्ञानमिति श्रुतिरेव जीवस्य ज्ञानस्वरूप
त्वे प्रमाणमत आह. सत्यमिति. ननु जीवब्रह्मणोरैक्यान्नित्यविज्ञानरूपत्वं जीवस्य निराबाधमित्यतो
जीवब्रह्मणोर्भेदं साधयति. ज्ञानाज्ञानेति. सुखित्वादीत्यादिना दुःखित्वपरिग्रहः सुतरामिति जीवात्मना 111
नानात्वसिद्धावीश्वरस्यैकस्यानेकजीवात्मैकत्वासंभवादेकत्वानेकत्वयोर्विरोधादिति भावः ईश्वरभे
दः ईश्वरजीवात्मनोर्भेदः सिद्ध्यतीति शेषः अन्यथा ईश्वरस्य जीवात्मकत्वे बंधमोक्षेति कश्चित्संसा
री बद्धः कश्चिन्मुक्त इति व्यवस्थानुपपन्ना स्यादित्यर्थः चैत्रमैत्रात्मनोरीश्वरस्वरूपयोरैक्यादिति भा
वः ननु कथं तर्हि तत्वमसीत्यादितच्छब्दप्रतिपाद्यब्रह्मणि युष्मच्छब्दप्रतिपाद्यजीवस्याभेदबोधको वे ॥१३॥

दुःप्रमाणमित्यत आह॰ योपीति॰ मोक्षकाले जीवात्मना ब्रह्मणा सहाभेदस्तूत्पद्यत इति मतं निरस्यति॰
मोक्षेपीति॰ भेदस्यानित्यत्वमभ्युपेत्यापि मोक्षकाले जीवब्रह्मणोर्भेदं व्यवस्थापयति भेदनाशेपीति॰ भेदसत्वे
व्याप्तिद्वयं निर्विवादमेवेत्यपि नासूचितं न वेदान्तिनः निर्द्धर्मक इति॰ इदं च॰ ससत्वाभावेपीत्यत्र हेतुत
योक्तं॰ ननु निर्द्धर्मकत्वं स्वधर्माभिन्नाश्रयजन्यत्वं॰ मिथ्याभावरूपसत्यत्वस्य ब्रह्मरूपत्वाद्भावस्य चाधि
करणात्मकत्वान्नानुपपत्तिरित्यभिप्रायेणाशंकते॰ मिथ्यात्वाभाव इति॰ ननु कथमेकत्वाधिकरणेन द्भा
वरूपे द्वित्वमत आह॰ प्रत्येकमिति॰ ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः मोक्षदशायामभेद उत्पद्यत इत्यर्थिकायाः
कागतिरत आह॰ नेपि तदानीमिति॰ अतएव ब्रह्मैव भवतीति श्रुतेः साम्यप्रतिपादकत्वादेव निरंजनः निर्दुः
खद्वितीये दोषमाह॰ उत्तरोपीति॰ विज्ञानपदेन नित्यमित्यादिश्रुत्यन्तर्गतविज्ञानपदेन अधिकरणल्युडंत
विज्ञानपदेन विज्ञानाश्रयबोधनादिति भावः आनंदवदित्यर्थ इति॰ अस्यार्थश्च प्रत्ययान्तेनानन्दशब्देनानंद
वतो बोधनादन्यथानन्दमिति नपुंसकत्वानुपपत्तेरिति भावः नन्वानंदवदित्यर्थो न संगच्छते त्वन्मते इ।

थरे आनन्दाभावादत आह· आनन्देपीति· लक्षणाकृत्यनमेवनवद्दोष इत्यत आह· असुवेति· असुखमिती
ति· असुखमित्यत्र नञा ब्रह्मणो सुखभेदबोधनादिति भावः· हूरकल्पनापत्तेरिति· बहुव्रीह्यन्यपदार्थ
लाभार्थं नञस्तत्र लक्षणापत्तेरित्यर्थः· न च तत्र तत्पुरुषेपि नञो लक्षणा आवश्यकी· अन्यथा नञर्थ
स्य नामार्थेन याभेदेनान्वयासंभवादिति वाच्यं नस्य नामत्वेपि निपातत्वादिति न तु तत्र तत्पुरुषेपि असु त४
खपदब्रह्मपदयोरेकधर्मिबोधकत्वलक्षणं सामानाधिकरण्यमनुभवसिद्धमन्यथा तयोः समानवच
नत्वानुपपत्तेरतस्तन्निर्वाहार्थं नञो भाववृत्तिलक्षणा न वाप्यावश्यकीत्यत आह· प्रकरणेति· प्रत्ययविरोधा 112
दिति· आनन्दशब्दस्य पुंल्लिंगत्वनियमेनानन्दमिति च यस्य मत्वर्थीयाच् प्रत्ययं विनानुपपत्तेरिति भावः
सांख्यमतं दूषयितुमुपन्यस्यति एतेनेति· पूर्वोक्तयुक्त्या आत्मनो ज्ञानवत्वसाधनेन वक्ष्यमाणयुक्त्या चेत्य
र्थः· प्रकृतिरिति मूलप्रकृतिरित्यर्थः· कर्त्रीति· कर्तृत्वं चात्र कर्तृभूतान्तःकरणप्रकृतित्वं· अनुकूलकृतिमत्त्वल
क्षणकर्तृत्वस्य तन्मते अन्तःकरणधर्मत्वादिति ध्येयं· पुष्करपलाशवदिति प[illegible]पत्रवदित्यर्थः ॥७४॥

स१

तथा च यथा पद्मपत्रमंभसा लिप्तन्न भवति तथा पुरुषः कर्तृत्वाद्याश्रयो न भवतीति भावः तस्माच्च पुरुषः क
र्तृत्वाभाववानकारणत्वाभावादित्यनुमानं तत्र प्रमाणं बोध्यं· ननु तत्र कारणत्वसत्वाद्वित्वसिद्धिरत आ
ह· कार्यकारणयोरिति न स्यादिति मा भव[illegible]त्वित्यर्थः तस्य पुरुषस्य न चेतादृशपुरुषसत्वे किंमानमत आह·
बुद्धिगतेति· बुद्धिविषयसिद्धिस्यैव चैतन्यस्य बुद्धावारोपसंभवादिति भावः प्रकृतेरिति· मूलप्रकृतेरित्यर्थः न
नु पुरुषस्य कर्तृत्वाभावेन तत्र धर्माधर्मयोः सत्वाभावात्तदधीनसुखदुःखयोस्तत्रानुत्पत्तौ दुःखध्वंसरूप
मोक्षः पुरुषस्य न स्यादत आह· तत्सत्वासत्वाभ्यामिति बुद्धिसत्वासत्वाभ्यामित्यर्थः बुद्धिसत्वे इन्द्रियप्रणालिक
या तत्परिणामेनायं घट इत्यादिज्ञानेन संबद्धो घटादिविषयः स्वाकारज्ञानपरिणामिबुद्ध्याग्रहीतासंसर्गक
त्वसंबंधेन पुरुषनिष्ठः पुरुषस्वरूपतिरोधानेन पुरुषस्य संसारसंपादकः· बुद्धिनाशे तु तत्परिणामस्या
यं घट इत्यादिज्ञानरूपस्याभावाद्विषयतावच्छेदकाभावात्कैवल्यावस्थायां पुंसो मोक्षः दुःखसंबंधनत्पुंसो सं
सारमोक्षौ तु न पुंसः किन्तु बुद्धेरेवेति भावः ननु पुरुषे साक्षात्संबंध एव विषयस्यास्तु स एव च तस्मिन् सं

दि॰के॰ सारव्यवहारनियामकास्तुकिमुक्तेबुद्धिघटितपरंपरासंवंधेनेत्यतआह.तस्याएवेति.तथाचविषयप्रका
शार्थंसाक्षात्संवंधएवस्वीकार्य्यःकिमुक्तपरंपरयेतिवाच्यं.तस्यपुरुषस्वभावनिवंधनत्वेपुरुषस्यनित्य
त्वेनतत्स्वभावाधीनविषयसंवंधस्यसर्वदासत्वान्मोक्षाभावप्रसंगात्घटप्रकारकालेघटादिरूपवि
षयस्वभावाधीनस्यपटादिरूपचैतन्यसंवंधस्यसत्वात्पटादेरपिप्रकाशापत्तेरितियद्वाबुद्धितोज्ञानं
स्यभेदमाह.तस्याएवेति.तथाचबुद्धेःपरिणतिर्ज्ञानंनतुबुद्धिरेवेतिभावः.भेदाग्रहादिति.बुद्धिपुरुषयो
र्भेदाग्रहादित्यर्थःइदानींबुद्धितदुपलब्ध्योर्भेदप्रदर्शनायबुद्धेरंसत्रयंप्रदर्शयति.ममेदमित्यादिनापु 113
रुषोपरागःपुरुषसंवंधःदर्प्पणस्ययथामुखसंवंधःप्रतिविंवमात्रान्नतुतात्विकस्तथाबुद्धिपुरुषयोर्भेदा
ग्रहादिकत्वाभिमानःपुरुषोपरागइत्यर्थःइन्द्रियप्रणालिकया.इन्द्रियद्वारापरिणतिर्भेदःअयंघटइत्या
दिज्ञानरूपःपरिणामएवविषयेणघटादिनाबुद्धेःसंवंधइत्यर्थःतस्यपारमार्थिकत्वेनिस्वासाभिहत ॥१५॥
दर्प्पणस्यमलिनिमादृष्टान्तः.कर्तव्यमितीति.पूर्वोक्तपुरुषोपरागविषयोपरागाभ्यांकर्तव्यस्यघटादेरव

भासस्तेन कर्त्तव्यमित्यध्यवसायो व्यापारावेश इत्यर्थः ज्ञानेन पुरुषस्यानात्विकः संबंध इति अत्र ज्ञानेन पुरुषस्य यो अतात्विकः संबंधस्स उपलब्धिरुच्यत इत्यन्वयः अतात्विके दृष्टान्तो दर्पणमलिम्नेव मुखस्य संबंध इतिनयाच. ज्ञानेन सह चेतनोहमिदं जानामीत्याकारो बुद्ध्यावारोपितस्य यः संबंधो नात्विकः सा उपलब्धिर्न तु बुद्धेरेवोपलब्धिरिति भावः इति सामानाधिकरण्येनेति अदृष्टस्यानीन्द्रियत्वेपि धार्मिकोहं करोमीति तदंशे उपनीतभानरूपं तत्प्रत्यक्षं बोध्यं परिणामित्वादिति. अनित्यधर्माश्रयत्वादित्यर्थः इत्यदृष्टभोगानामिवेति इतिः स्वसमानाधिकरणमेवादृष्टं जनयति. नह्यदृष्टं स्वसमानाधिकरमेव भोगं जनयतीति इत्यदृष्टभोगानां परस्परसामानाधिकरण्यप्रतिबिंबाच्चेतनोहं करोमीति सामानाधिकरण्यप्रतीतेरित्यर्थः न क्रियेत कर्त्तेति ने. मानाभावादित्यस्य चेतन इत्यादिवचः पूर्वोक्तदूषणसमुच्चायकः कर्त्तृत्वाश्रयेन चेतनः जन्यधर्माश्रयत्वात् घटवदिति बाधकसत्वाच्चेतनोहं करोमीति प्रतीतिश्चेतनांशे भ्रम इत्याशंकते चेतनोहमिति इत्यंशेपीति. बुद्धिः कर्त्तृत्वाभाववती जन्यधर्माश्रयत्वादिति बाधकस्य तत्रापि सत्वादिति भावः अन्यथेति क

त्वं १

दि०क० र्तृचेतनयोर्भेदांगीकार इत्यर्थः वुद्धेर्नित्यंइति·कर्तृभिन्नस्य चेतनस्यांगीकारे तस्मिन् सुखदुःखाभावात्संसार
मोक्षयोरनुपपत्त्या पूर्वोक्तरीत्या वुद्धिसत्त्वासत्त्वाभ्यामेव संसारापवर्गौ वाच्यौ·तथा च वुद्धेर्नित्यत्वे तत्सत्त्वनि
वंधनस्य संसारस्य सर्वदा आपत्त्या मोक्षाभाव एव स्यात्·वुद्धेरनित्यत्वे तु जन्यत्वं स्वीकरणीयम जन्यस्यनै
शासंभवात्तथा च तदुत्पत्तेः पूर्वं तत्सत्त्वनिवंधनः संसारो न स्यादित्यर्थः वस्तुतस्तु·तदुत्पत्तेः पूर्वं तदाश्रि
तादृष्टादेरभावाद्बुद्धेरनुत्पत्त्या संसारः कदापि न स्यादित्यवधेयं·असिद्धेरिति वुद्धौ प्रकृतिकार्यत्वाभावादि
त्यर्थः ननु कर्तृत्वेन जन्यत्वानुमितिः परिशेषात्प्रकृतिजन्यत्वविषयिणी स्यादत आह·कर्तुरिति·कर्तृत्वस्य ज
न्यत्वव्याप्यत्वे अनुकूलतर्काभावादित्यर्थः प्रत्युत तद्विपरीतानादित्वग्राहकतर्कसत्त्वादनादित्वमेव कर्तुरित्या
ह·वीतरागेति·वीतरागजन्मादर्शनादिति न्यायसूत्रं सरागजन्मदर्शनादिति तदर्थः अनादित्वमिति·स्तनपा
ने वालस्य प्रवृत्तिर्नेष्टसाधनताज्ञानमन्तरेण न च·नानुभवस्वरूपं वाधात्·स्मरणस्य स्वसामानाधिकरणपूर्वा
नुभवसापेक्षया पूर्वजन्मसत्त्वे पूर्वजन्मन्यपि प्रथमप्रवृत्त्यनुरोधेन तत्पूर्वस्य एवं तत्तत्पूर्वस्य जन्मनः सिद्धौ अनं ॥७६॥

114

ेर

दित्वमात्मनः इति भावः अनादेरित्यस्य भावस्येति शेषः जन्यभावत्वेन नाशहेतुत्वादिति भावः न च प्रकृतेरिति·
प्रकृतिमायातस्या गुणास्सत्वरजस्तमोलक्षणाः क्रियमाणानि कर्माणि भवन्ति· अहंकारोहमिति प्रत्ययस्तेन
विमूढः आत्मा अन्तःकरणं यस्य तथाविधः पुरुषः कर्ताहमिति मन्यत इत्यर्थः भगवद्वचनेनेत्यर्थः तेनात्मनः
कर्तृत्वाभावः प्रतिपादनादिति भावः अहमेवेति· तथा च· तेन स्वतंत्रकर्तृत्वाभाव एवात्मनि प्रतिपाद्यते न
तु कर्तृत्वसामान्याभाव इति भावः प्रकटीकृतोयमिति अधिष्ठानं तथा कर्ता करणं च पृथग्विधं विविधाश्च
पृथक्चेष्टा दैवं चैवात्र पंचममित्यनेन पंचानामपि कर्तृत्वं प्रतिपाद्यते तत्रैवं सतीत्यादिना स्वतंत्रकर्तृत्वस्यै
वात्मनो निषिद्धत्वादिति भावः एवं पुरुषस्यैव कर्तृत्वमस्तु न च कारणत्वाभावेन कर्तृत्वाभावस्तत्र साधनी
य इति वाच्यं· स्वरूपासिद्धेः कार्यकारणयोरभेदात् कार्यनाशे कार्यरूपतया नाशस्यादित्यकारणत्वं पुरुषस्य
स्यापि न सत्· कार्यकारणयोरभेदस्यैवासिद्धत्वादित्यादि विस्तरभियानोक्तमित्यभिप्रायवानाह· संक्षेप
इति· तदाश्रयत्वे धर्माधर्माश्रयत्वे अन्यथा विशेषगुणसंबंधादन इत्यादिप्रतीतेरिति· इत्यादौ ज्ञानादिसंबं

ल४

दि॰क॰ धप्रकारेणैवात्मनः प्रत्यक्षस्यानुभवादित्यर्थः परकीयप्रवृत्त्यादेरतीन्द्रियत्वेन हेतुज्ञानासंभवात्स्वरूपा
सिद्धिमाह. प्रवृत्तिरत्रेति. उक्तप्रायत्वादिसंबंधप्रकारेणैवात्मनः प्रत्यक्षस्यानुभवादित्यर्थः उक्तप्रायत्वा
दिति. शरीरस्य न चैतन्यमित्यनेनोक्तत्वादित्यर्थः इच्छादीनामभावस्य कंठरवेणानुक्तेः प्रायःपदं चेष्टायां
अप्रवृत्तिज्ञापकत्वे अनुक्तं तर्कमाह. चेष्टया चेति चेष्टयेति परशरीरे समवायेन चेष्टानुमितस्यावच्छे
ल५ दकतया प्रयत्नं यस्य समवायेनाश्रय आत्मैवेति भावः आत्मनो मनोमात्रजन्यज्ञानविषयत्वे हेतुमाह. रूपा
द्यभावेनेति. विभुत्वमिति. कालखात्मदिशां सर्वगतत्वं परमं महत्. इत्यनेनात्मनि परममहत्त्वस्योक्तेः पौ
नरुक्त्यमाशंक्याह. नत्वेति. पूर्वमुक्तमिति. बुद्ध्यादिषट्कं संख्यादिपंचकं भावना तथा। धर्माधर्मौ गुणा एते
आत्मनः स्युश्चतुर्दश इत्यनेन साधर्म्यप्रकरणे कथिता इत्यर्थः॥ ॥इति श्रीमद्भारद्वाजकुलोद्भववालकृ
ष्णभट्टतनुजमहादेवभट्टकृतो मुक्तावलीप्रकाशे द्वितीयः परिच्छेदः॥ ॥मूले बुद्धिस्तु द्विविधा मता अनु
भूतिः स्मृतिश्च स्यादिति. तत्रानुभूतिः प्रत्यक्षमित्येकैवेति चार्वाकाः अनुमितिरपीति कणादसुगतौ. ॥७१॥

अनुभूतिश्चतुर्विधेति·अनुमिनोम्युपमिनोमि शब्दयामीति प्रतीतिसिद्धानामनुमित्यादीनां दुर्वारतया चार्वाकोदितमयुक्तं अर्थापत्तेस्तु·२

उपमितिरपीति·केचिन्नैयायिकैकदेशिनः अर्थापत्तिरपीति प्राभाकराः अनुपलब्धिरपीति भाट्टा वेदान्तिनः। असंभवैतिह्यरूपीति पौराणिकाः तत्सर्वमयुक्तमिति सूचयितुमनुभूतेश्चातुर्विध्यमाह· अनुमितावन्तर्भावो व्यतिरेकिग्रंथे व्यक्तीभविष्यति·अनुपलब्धेरभाव एवान्तर्भावः अन्यासां च यथायथमनुमित्यादावन्तर्भाव इति भावः उद्दिष्टास्वप्रमासु प्रथमोपस्थितत्वात्प्रत्यक्षं लक्षयति·मुक्तावल्यामिंद्रियजन्यमिति इन्द्रियजन्यत्वं इन्द्रियरूपादावप्यस्त्यतो ज्ञानमिति·अनुमित्यादावतिव्याप्तिवारणायेन्द्रियजन्यमिति·इन्द्रियजन्यविशेषणदानेऽप्यनुमित्यादावतिव्याप्तितदवस्थेत्याशंकते·यद्यपीति·ननु इन्द्रियजन्यत्वाभावादीश्वरप्रत्यक्षेऽतिव्याप्तिरत आह·ईश्वरप्रत्यक्षं त्विति·तथा च जन्यप्रत्यक्षमेव लक्ष्यमिति भावः ननु तस्यैव लक्ष्यत्वे किं मानमत आह·इन्द्रियार्थेति·इन्द्रियार्थसन्निकर्षोत्पन्नमित्यनेनेश्वरज्ञानमनुमित्यादिश्च व्यावर्त्यते·भ्रमवारणायाह·अव्यभिचारीति·भ्रमभिन्नमित्यर्थः एतावता प्रत्यक्षप्रमाया लक्षणमुक्तं·तद्विभागमाह·अव्यपदेश्यमिति·निर्विकल्पकमित्यर्थः न चाव्यपदेश्यपदेन कथं निर्विकल्पकलाभ इति वाच्यं·व्यपदेशः प

दवाच्यत्वमेतद्विषयकमित्यर्थोद्विशिष्टज्ञानेतत्तत्पदवाच्यत्वमुपनीतंभासतेतिप्राचीनमतानुसारित्वात्·अ
दि०क० तएवकणादंकणादनामानंमनुमित्यादितत्रतत्रोक्तंसंगच्छते. यद्वाव्यपदेशःशब्दप्रयोगःसचविशिष्टज्ञा
नादेवेत्यव्यपदेश्यत्वेनव्यपदेशानर्हत्वंननिर्विकल्पकलाभःव्यवसायात्मकमिति. विशिष्टव्यवसायात्मक
मित्यर्थःविशिष्टज्ञानात्मकमितियावत्. एवंचसूत्रेइन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचारि. अव्यपदेश्यव्यव
सायात्मकमितियोजनाबोध्या· अन्यथालक्षणवाक्येविज्ञानबोधकपदेनव्यवधानादसंगतेरिति·
अर्थेवोक्तत्वादिति. ईश्वरप्रत्यक्षस्यलक्षणत्वमभिप्रेत्याह· अथवेति· ज्ञानाकरणकमिति. ज्ञानाजन्यमि 116
त्युक्तौवाव्याप्तिःविशिष्टज्ञानमात्रेविशेषणज्ञानजन्यत्वादतोज्ञानाकरणकमिति. अनुमित्यादौव्याप्त्या
दिज्ञानस्यकरणत्वंअत्यएवेतिनानुमित्यादावतिव्याप्तिःअकरणकत्वादेवचेश्वरज्ञानसंग्रहः·अथे
तिद्विधात्मनद्वारामनादिज्ञानेकेयोगिप्रत्यक्षेलक्षणमिदमव्यापकमितिचेन्नज्ञानाकरणकपदेन ॥९८॥
ज्ञानत्वगर्भधर्मावच्छिन्नकरणकत्वाभावस्यविवक्षितत्वात्. नचेदंयोगिप्रत्यक्षेऽव्यापकंआवरणादिप्र

स्या४

तिपत्तीनांशाब्दत्वादिनैव जनकत्वे न विशिष्टाभावसत्वादिति. अथ वा ज्ञानकरणकत्वाव्यभिचारिजाति
रन्यज्ञानत्वमिह विवक्षितं. तादृशी च जातिरनुमितित्वादिरेवेति. एतेन अनुमित्यादौ व्याप्तिज्ञानादेर्ज्ञा
नत्वेन करणतानये ज्ञानत्वघटितकरणतावच्छेदकधर्माप्रसिद्ध्यासंभवोपि प्रत्युक्त इति. व्याप्तिज्ञानस्येति. प
श्चात्तच्चतुष्टयस्य करणत्वादित्यनेनान्वयः. न च स्मरणात्मकपरामर्शस्थले व्याप्तिज्ञानस्य करणत्वासंभवा
दिति वाच्यं. तत्र व्याप्तिज्ञानस्य संस्कारद्वारा हेतुत्वात्. न च ज्ञानपदस्य सविषयकपरत्वमेव अस्तां किं व्याप्ति
ज्ञानस्य संस्कारद्वारा तत्र हेतुत्वकल्पनेनेति वाच्यं. उद्बुद्धादिनः संस्काराद्ध्यनुमितेरनुदयात्सविषयकत्व
स्यातिप्रसक्तत्वात्. सादृश्यज्ञानस्य सादृश्यप्रकारकज्ञानस्य. तत्र अनुमित्यादौ अनुमितिं लक्षयति. परामर्शे
ति. परामर्शत्वंत्वव्याप्तिविषयकपक्षधर्मताज्ञानत्वं. तथा च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमि
तिरिति फलितं. भवति हि वह्निव्याप्यधूमवान्पर्वत इति ज्ञाने व्याप्तिविशिष्टपक्षधर्मताज्ञानेन जन्यं पर्वतो वह्निमा
निति ज्ञानमिति लक्षणसमन्वयः. यद्यपीत्यादिं नाविशेषणतावच्छेदकप्रकारकनिश्चयविधया परामर्शजन्य

तिर प्रत्यक्षादिकमित्यादि।

स्यविशिष्टवैशिष्ट्यबोधस्यपरिग्रहः परामर्शाजन्यमिति. विषयविधया तत्र परामर्शस्य हेतुत्वादिति भावः कदाचि
त्केति. धूमवान्पर्वतो वह्निमानित्यनुमितौ पक्षतावच्छेदकविधया धूमस्य भानादिति भावः तादृशेति कथितनि
श्चयजन्यहेतुत्वविषयकेत्यर्थः सत्तामादायातिव्याप्तिरतो अनुभवत्वव्याप्येति. अनुभवत्वन्यूनवृत्तित्वं तद
र्थः तेनानुभवत्वजातिमादाय प्रत्यक्षादावतिव्याप्तिः जातिमत्वं च समवासंमवायेन विवक्षितं तेन कालि
कसंबंधेन जातिमति कालेनातिव्याप्तिः पक्षधर्मतायाः अप्रवेशेन लाघवात् लक्षणान्तरमाह. अथवेति.
अत्रापि साध्यतावच्छेदकधर्मसाध्यतावच्छेदकसंबंधहेतुतावच्छेदकधर्महेतुतावच्छेदकसंबंधानां अ
ननुगमादेकव्याप्त्युपादानेऽन्यानुमितावव्याप्तेरेकां व्याप्तिमुपादायतज्ज्ञानकरणवृत्त्यनुभवत्वव्याप्यजाति
मत्वं विवक्षणीयं ननु अनुमितिं प्रत्यपि व्याप्तिज्ञानत्वेन न करणत्वं. किंतु ज्ञानत्वेन मनस्त्वेनैव वा. एवमुप
मित्यादावपि मनस्त्वेनैव करणत्वं. न च कार्यवैजात्यं न स्यादिति वाच्यं. सामग्रीवैलक्षण्यादेव तदुत्पत्तेः न च प्र
माणैर्विभागानुपपत्तिः क्रियाविशेषात्तदुपपत्तेरतः पूर्वोक्तानुमितिलक्षणानामसंभव इत्यत आह. वस्तुतेति

घटेति व्याप्तिवारणाय सत्यंतं. वृत्तित्वं समवायेन विवक्षितं. तेनानुमितौ कालिकेन घटत्वस्य वृत्तित्वेपि
नाव्याप्तिः ज्ञानत्वानुभवत्वमादाय प्रत्यक्षादावतिव्याप्तिवारणाय विशेष्यदलं. ननु मनसः करणतापक्षेः
ज्ञानाकरणकत्वं प्रत्यक्षलक्षणमनुमित्यादावतिव्याप्तं. मतः प्रत्यक्षस्य लक्षणांतरमाह. एवमिति. प्रत्यक्ष
त्वादिकमिति. यत्किंचिदुपमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षासमवेतजातिमत्त्वमुपमितित्वं. य
५ बोध त्किंचिच्छाब्दं व्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षासमवेतजातिमत्त्वं शाब्दबोधत्वं निर्वाच्यमित्यर्थः.
शब्दभेदेनानुमित्यादीनां लक्षणकथनमनुभवत्वजात्यंगीकारेण तदनंगीकारे तद्व्यक्तिसमवेतस्म
रणासमवेतद्धर्मसमवायित्वरूपस्य लक्षणचतुष्टयस्यैकशब्देन वक्तुं शक्यत्वादिति ध्येयं. उक्तसूत्रेति
इंद्रियार्थसन्निकर्षोत्पन्नमित्याद्युपदर्शितसूत्रानुसारादित्यर्थः. घ्राणस्य निर्विषयकत्वादाह. घ्राणे
ति. सुरभित्वादिनासुरभित्वपरिग्रहः. तद्वतीति. गंधवतीत्यर्थः. उद्भूतपदस्य कृत्यमाह. उष्णेति उष्णा
द्यावित्यादिना चूर्णप्रविष्टतेजःपरिग्रहः. न तत्प्रत्यक्षं नोष्मादिगतरूपप्रत्यक्षं न्यूनतां परिहर्तुमाह. प

दि॰ कु॰ घटादिकमपीति॰ आलोकसंयोगेति॰ एतस्य कारणत्वंधकारे चाक्षुषापत्तिवारणायोद्भूतरूपस्य तु पिशाचादी
नां प्रत्यक्षवारणायेत्यवधेयं॰ तयोः उद्भूतरूपालोकसंयोगयोः रूपभिन्नस्य रूपत्वादेस्त्वगिंद्रियेणाग्रहणादु
दाह॰ रूपत्वादिभिन्नमिति॰ आदिना नीलत्वादीनां परिग्रहः॰ उव्याप्यस्येति॰ पूर्वोक्तयिननूतेरात्वपि इति बोध
यितुं रूपमत्रापि कारणं॰ उथाप्यक्षेत्यत्रं प्रतीं धारणं शंकते॰ बहिरिंद्रियेति॰ ननु कार्याभावे कारणाभावस्य
प्रयोजकतया गगनादौ बहिरिंद्रियजन्यप्रत्यक्षाभावे रूपाभावस्पर्शाभावयोः प्रयोजकत्वकल्पने गौर
रात्॰ तादृशप्रत्यक्षे रूपत्वेन हेतूनां कल्पयित्वा तदवच्छिन्नाभावत्वेनैव तादृशप्रत्यक्षाभावे प्रयोजकत्वमु 118
चितमित्यत आह॰ आत्मनीति॰ आत्मनो बहिरिंद्रियजन्यप्रत्यक्षवारणार्थं शब्दभिन्नेति॰ कालादेस्तद्वा
रणाय विशेषेति॰ शंकते॰ रूपस्येति॰ पुनरशंकते॰ इष्टेति प्रतिबंधोच्चारयति॰ उद्भूतेति॰ उपसंहरति॰ तस्मादि
ति॰ ननु त्रुटेः स्पार्शनानंगीकारात्तत्स्पार्शनवारणाय स्पर्शजन्यद्रव्यसमवेतस्पार्शनं प्रति त्वक्संयुक्तस्पा ॥६०॥
र्शनवत्समवायत्वेन हेतुत्वस्य वाच्यतया वायोः स्पार्शनेंगीकारो नोचितः॰ अन्यथा वायुगतसंख्यापरिमा

नी२

णयोस्त्वचाग्रहणप्रसंगादित्यत आह॰ वायुप्रभयोरिति॰ प्रभोपादाने दृष्टान्तार्थं ग्रहणमत एवेति॰ तथाच॰ वायु
गतसंख्यादिग्रहे दृष्टापत्त्या वायोः स्पार्शनांगीकारे बाधकाभावेतिभावः॰ क्वचिदिति॰ सजातीयसंबलनाभावेस
र्थः आदिपदात्परिमाणपरिग्रहः नन्विह च भूयोऽवयवावच्छेदेन त्वगिन्द्रियसन्निकर्षस्थले बाधः ननु सजा
तीयसंवलनदशायां भूयोऽवयवावच्छेदेन त्वगिन्द्रियसन्निकर्षाभावे च कथं न वायुगतद्वित्वपरिमाण
योर्ग्रहस्तत आह॰ केचित्संख्यापरिमाणेति॰ दोषादिति॰ सजातीयसंवलनादिरूपादोषादित्यर्थः आह नी५
रित्यनेनास्वरसस्तु ढीआन्नु वायोः प्रत्यक्षतासंदेहेन लाघवान्मूर्त्तत्वप्रत्यक्षत्वावच्छिन्नं प्रतिरूपत्वेने
वकारणत्वमुचितं॰ न च वायुप्रत्यक्षतासंदेहाधीनव्यभिचारसंदेहस्य प्रतिबंधकस्य सत्वे कथं कारणताग्र
हेतिवाच्यं॰ लाघवतर्काभावविशिष्टस्यैव व्यभिचारसंदेहस्य प्रतिबंधकतया प्रकृते च पूर्वोक्तलाघवत
र्कस्य सत्वेन तदभावविशिष्टव्यभिचारसंदेहाभावस्य सत्वात्॰ यच्चोक्तं॰ प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिः
रित्येवं किं न स्यादिति नहापिन उपरिदेशे विहंगमेऽत्र प्रभामंडलस्यैवोपरिदेशतया न तस्य प्रत्यक्षं विनोप

ह्र४

त्वा४

दि०कं० रिदेशे विहंगम इति प्रत्यक्षानुपपत्तेरित्यादिकमिति. ज्ञानसामान्ये जन्यज्ञानसामान्ये ज्ञानाजननमिति प्रमा
णमित्यनुषज्यते चक्षुरादिनेत्यादिना त्वगादिपरिग्रहः तदभावादेव चक्षुरादिना मनोयोगाभावादेव ज्ञाना
देरभावादेव नमानसमिति. अत्र ज्ञानादेर्नमानसमित्यन्वयः अभावादित्यत्रापि ज्ञानादेरित्यस्यान्वयबोः
ध्यः नप्रत्यक्षमिति. योग्यगुणं संबंधेनैवात्मनः प्रत्यक्षीकारायोग्यविशेषगुणप्रत्यक्षसामग्र्यंतर्गतज्ञा
नादेरभावादेव नात्मप्रत्यक्षमित्यर्थः उद्बोधकाभावादिति. उद्बोधकस्य फलबलकल्प्यत्वादिति भावः इ
च्छादिव्यक्तेरिति. इच्छाया आदिरिति व्युत्पत्त्या ज्ञानमत्र विवक्षितं. तदतींद्रियत्वे. ज्ञानातींद्रियत्वेननु सु 119
षुप्तिप्राक्कालीनज्ञानस्य निर्विकल्पकरूपत्वात्तदतींद्रियत्वमुभयवादिसिद्धमेवेत्यत आह. सुषुप्तिप्राक्का
लेति. त्वङ्मनःसंयोगस्येति. तदस्वीकारे चाक्षुषमपि न स्यादिति भावः ननु चाक्षुषादिसामग्र्याः स्पार्शने
प्रतिप्रतिबंधकत्वादेव न स्यान्नत्वेत्यत आह. परस्परेति. अनुभवानुरोधादिति. अनुभवस्य त्वचापि स्वह
हस्तिनत्वादन्यथा इष्टापत्त्यादिना त्वदुक्तापत्तेरसंगतत्वा[illegible]पादिति भावः मिश्रमतमाह. अन्येत्वित् ॥८१॥
त्यादिना. सुषुप्त्यनुरोधेन सुषुप्तौ ज्ञानानुत्पादानुरोधेन. इत्थं च चाक्षुषादिकाले पूर्वोक्तस्पार्शनापत्तिर

रीं तीर

ण

पिन भवतीत्याह चाक्षुषादीति· अत्र नव्याः सुषुप्त्यव्यवहितप्राक्काले ज्ञानोत्पत्तिर्यदि स्यादपि न तत्प्रत्यक्षापत्ति
भियात्वङ्मनोयोगस्य चर्ममनोयोगस्य वा हेतुत्वं सैव न युक्तिसिद्धान्तयाहि· सुषुप्त्यनुकूलमनक्रियया मन प्ति २
सा आत्मना विभागस्तेन आत्ममनःसंयोगनाशस्ततः पुरीतति रूपान्तरदेशेन मनसा संयोगरूपा सुषुप्तिरुत्प
द्यते एवं च सुषुप्त्यव्यवहितपूर्वक्षणे आत्ममनःसंयोगरूपासमवायिकारणनाशात्तत्क्षणे ज्ञानोत्पत्तेरभा
वात्· असमवायिकारणस्य कार्यसहभावेन हेतुत्वात्· यद्वा कार्यनाशजनकनाशप्रतियोगिन एवास
मवायिकारणस्य कार्यसहभावेन हेतुत्वमिति मन्यन्ते· तथापि न सुषुप्त्यव्यवहितप्राक्कालोत्पन्नज्ञानव्यक्तेः सुषु
प्तिकाले प्रत्यक्षापत्तिर्भियात्वङ्मनःसंयोगादेर्हेतुत्वं विजातीयात्ममनःसंयोगहेतुत्वेनैव तत्प्रत्यक्षवारणात् न
चैवं जात्येनात्ममनःसंयोगस्य नत्वे त्वङ्मनःसंयोगस्य वा हेतुत्वमित्यत्र विनिगमकाभावः त्वङ्मनःसंयो
गादेरवच्छेदकतासंबंधेन हेतुत्वापेक्षया समवायेनात्ममनःसंयोगस्य तत्त्वे लाघवात्· त्वङ्मनःसंयोगहेतु
त्वे चाक्षुषादिसामग्र्याः स्पार्शनप्रतिबंधकत्वकल्पनागौरवाच्च· एतेन यत्र मनःक्रियया पुरीतति संयोगरू

नु१

टि· दि·के· पासुषुप्तिः किंतु पुरीतति तत्क्रियैवात्मसंयुक्तेन मनसा पुरीतति संयोगरूपा सुषुप्तिस्तत्र पूर्वोक्तापत्तिवारणा
यात्वङ्मनःसंयोगादेर्हेतुत्वमित्यपास्तं· पुरीतति क्रियाजन्यमनःपुरीततिसंयोगस्य सुषुप्तित्वाभावाच्च·
अत एव यदा त्वचं त्यक्त्वा मनः पुरीततिमनुविशतीति ग्रंथकाराणां लेखः संगच्छतेति वदन्ति मनोग्रा
ह्यत्वस्य सार्वत्रिकत्वादाह· मनोजन्येति मनोमात्रजन्येत्यर्थः· न्यूनतां परिहरति· एवमिति निर्विकल्प
के प्रमाणं दर्शयति चक्षुःसंयोगादीति· विशेषणज्ञानस्य कारणत्वादिति कदाचित्· घटेत्याद्याकारकं
स्वरूपतो घटत्वप्रकारकं कदाचित्तु जातिमानिं जातित्वेन घटत्वप्रकारकं ज्ञानं जायतेत्यनुभवसाक्षिकं 120
तन्निर्वाय घटत्वांशेऽन्याप्रकारकघटत्वप्रकारकबुद्धौ तादृशघटत्वज्ञानत्वेन घटत्वांशे जातित्वप्रकारकघ
टत्वविशिष्टबुद्धौ च तादृशघटत्वज्ञानत्वेन हेतुत्वस्यावश्यकत्वादिति भावः वैशिष्ट्यानवगाहीवेति· वैशि
ष्ट्यनिष्ठसांसर्गिकविषयतानिरासेनैव घटघटत्वयोर्विशेष्यताप्रकारताशून्यत्वं लब्धं· तयोर्वैशिष्ट्यसां
सर्गिकविषयतानियतत्वात्· न चैवं निर्विकल्पकस्य निर्विषयत्वापत्तिस्तुरीयविषयताया एव तत्रांगी ॥८२॥

ता४ ति५ वैशिष्ट्यनिष्ठसांसर्गिकविषयतारूपमेवेत्यर्थः ३

कारात्. एतेन निर्विकल्पकस्य घटघटत्वावगाहित्ववद्वैशिष्ट्यावगाहित्वमपि दुर्वारं घटेन्द्रियसन्निकर्ष
कालेइन्द्रियसंवैविशेषणतायास्तद्वैशिष्ट्येसत्वादिति. वैशिष्ट्यानवगाहित्वोक्तिरसंगतेत्यपास्तं. वैशि
ष्ट्यानवगाहित्वेवस्तेवकारेणकल्पनीयविशेषणज्ञानस्यवैशिष्ट्यावगाहित्वेतस्यापिविशिष्टबुद्धित्वेनयं
विशेषणज्ञानान्तरसापेक्षतास्यादेवंतस्यापिवैशिष्ट्यावगाहित्वेत्यनवस्थाभियाप्राथमिकविशेषण
ज्ञानंवैशिष्ट्यानवगाह्येवस्वीकार्यमितिसूचितं. तदेवतादृशविषयताद्वयशून्यमेवानिर्विकल्पकं
निर्विकल्पकस्वरूपंलक्षणंतुप्रकारताशून्यत्वादिकं. प्रत्येकमेवंध्येयं निर्विकल्पकेमूलोक्तमतीन्द्रिय
त्वंसाधयति. तथाहीत्यादिनाज्ञानस्यप्रत्यक्षविषयानवगाहिनभवतीत्यन्वयः इतिप्रत्ययादिति. इति इ
घटाद्यवगाहित्वेनैवज्ञानप्रत्यक्षस्यानुभवसिद्धत्वादित्यर्थः. तत्रघटमहंजानामीतिप्रत्ययेविशिष्टवैशि
ष्ट्यज्ञानंज्ञानेनसंभवतीतिनचविशेष्यविशेषणमितिरीत्यैवनिर्विकल्पकानुव्यवसायोस्त्वितिवाच्यं.
रक्तःपटोघटोद्रव्यमितिसमूहालंबनोत्तरंरक्तघटंजानामीतिप्रतीत्यापत्ताविशिष्टवैशिष्ट्यविषय

दि०कृ० तादृशज्ञानानुव्यवसायानभ्युपगमादिति॰ महत्त्वं षड्विधेनीति॰ यद्यपि श्रावणादौ महत्त्वस्य हेतुत्वस्य हेतुत्वे
प्रयोजनाभावस्तथापि द्रव्यसमवेतप्रत्यक्षत्वादेस्तु अन्यतावच्छेदकस्य श्रावणादिसाधारण्यात् श्रावण-
भिन्नत्वनिवेशे गौरवात्॰ प्रयोजनाभावाच्चे षड्विधेत्युक्तमिति ध्येयं॰ आत्मादिवारणायेति॰ आत्मादावति-
व्याप्तिरूपो दोषस्तद्वारणायेत्यर्थः॰ सत्संतदात्मने चेश्वरादितरे ये उद्भूतविशेषगुणाः सुखादयः तदात्म-
यत्वस्यैवात्मनि सत्त्वान्नातिव्याप्तिरिति भावः॰ श्रोत्रे सत्त्वादिति त[illegible]च तत्राव्याप्तिरिति भावः॰ विशेषपदद्दु-
स्य प्रयोजनं वक्तुं भूमिकामाह॰ उद्भूतत्वमिति जनकतानुपपत्तेरिति॰ एकैकस्य कारणतावच्छेदकत्वे व्यभि- 123
चारात् कूटस्यैकत्राप्रवृत्तितया कारणतानवच्छेदकत्वादिति भावः तदभावकूटस्योद्भूतत्वमिति॰ तथा चैता-
दृशकूटस्य कारणतावच्छेदकत्वमिति नोक्तदोष इति भावः॰ इन्द्रियावयववारणायेति मनःपदमित्यने-
नान्वितं॰ नवीनमते मनःपदप्रयोजनमाह॰ कालादाविति॰ समवायेन घटाद्यभावादौ नोसत्त्वेपि न तत्र ॥८३॥
प्रत्यक्षं योग्यानुपलब्धेरभावात्॰ अतो रूपाभावपर्यन्तानुधावनेन तद्वारणायेति कालादेर्वारणायेत्यस्य

र्थः जन्यत्वघटितस्य व्यापारत्वस्य श्रोत्रशब्दसंवंधे समवायरूपेऽभावादाह व्यापारः सन्निकर्ष इति. द्रव्यप्रत्यक्ष
इति द्रव्यप्रत्यक्षे वृत्तिलौकिकविषयतासंवंधेन प्रत्यक्षमित्यर्थः द्रव्यसमवेतेति. द्रव्यसमवेतवृत्तिलौ
किकविषयतासंवंधेन प्रत्यक्षमित्यर्थः एवमग्रेऽपीति. द्रव्यसमवेतसमवेतवृत्तिलौकिकविषयतासंवं
धेन प्रत्यक्षमिंद्रियसंयुक्तसमवेतसमवायजन्यमित्यर्थः ननु द्रव्यप्रत्यक्षे इन्द्रियसन्निकर्षत्वेन हेतुत्वे
त्वक्त्रमासंयोगाच्चाक्षुषापत्तिरेवमंधकारे घटचक्षुःसंयोगात्स्पार्शनापत्तिश्चेत्यत आह. वस्तुतस्त्विति. न
चेत्थमात्मप्रत्यक्षानुरोधेन मनःसंयोगस्य ज्ञानादिप्रत्यक्षानुरोधेन मनःसंयुक्तसमवायस्य प्रत्यासत्तित्वे
पि चक्षुरादिसंयोगतत्संयुक्तसमवाययोः प्रमाणाभावः चक्षुरादिसंयुक्तसमवेतसमवायेनैव द्रव्यगुणका
दे श्चाक्षुषाद्युपपत्तेरत आह. परंत्विति. परंपरया स्वाश्रयसमवेतसमवेतत्वादिसंवंधेन उद्भूतरूपावच्छि
न्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवाये इति. अत्र चक्षुर्घटितचक्षुःसन्निकर्षाच्छुक्लत्वादीनां प्रत्यक्षवारणा
योद्भूतेति. तथा च महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य त्रसरेणावभावाच्चाक्षुषाद्यनुपपत्तिरतः संयोगस्य

दि०कृ० प्रत्यासत्तित्वमावश्यकमिति भावः संयुक्तसमवेतसंयुक्तसमवायस्य नान्यथासिद्धिरित्याह द्रव्यसमवेते
ति. ताद्दशेति. महत्त्वावच्छिन्नेत्यर्थः तथा च महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य त्रसरेणावभावाच्चाक्षुषा
ऽनुपपत्तिरतः संयोगस्य प्रत्यासत्तित्वमावश्यकमिति भावः संयुक्तसमवेतसमवायेन संयुक्तसमवाय
स्य नान्यथासिद्धिरित्याह. द्रव्यसमवेतेति. ताद्दशेति. महत्त्वावच्छिन्नेत्यर्थः तथा च महत्त्वावच्छिन्नचक्षुःसं
युक्तसमवेतसमवायस्य त्रसरेणुरूपे भावान्न चाक्षुषानुपपत्त्या संयुक्तसमवायस्य प्रत्यासत्तित्वमि
ति भावः एतत्प्रसंगेन पूर्वरूपावच्छिन्नत्वमग्ने चालोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगे तत्प्रयोजनं चाभिहत 122
मिति बोध्यं. स्पार्शनप्रत्यक्षे त्वक्संनिकर्षस्य कारणत्वं प्रपंचयति. एवमित्यादिना. पूर्ववदेवेति. परमाणु
घटितत्वसन्निकर्षेण स्पर्शत्वस्पार्शनवारणाय महत्त्वावच्छिन्नत्वं प्रमाघटितसन्निकर्षे त्वगादिस्पार्श
नवारणाय स्पर्शावच्छिन्नत्वादिविशेषणं बोध्यमित्यर्थः श्रोत्रावच्छिन्नेति. सकलपुरुषाणां सर्वशब्दप्रत्यक्ष
त्वापत्तिरतः श्रोत्रावच्छिन्नेति. इन्द्रियसंबद्धेति. यद्यपि इन्द्रियसंयुक्तविशेषणतेन्द्रियसंयुक्तसमवेत ॥८४॥
विशेषणतेत्यादिक्रमेण बाहुल्यमेव तथापि विशेषणतात्वेनैकरूपेण विभागः न चैवं समवायत्वेन च

तुणामनुगमप्रसंगः परिभाषाया अपर्यनुयोज्यत्वात्. समवायो न प्रत्यक्ष इति. संबंधप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वादिति भावः ननु विशेषणतया तद्बुद्धित्वाद्यसंगतं. विशेषणताप्रत्यासत्तेरभावात्. न च तस्य प्रत्यासत्तेरनभ्युपगमेऽभावप्रत्यक्षानुपपत्तिरिति वाच्यं. इष्टापत्तेरनुपलंभस्यैव तत्प्रत्ययस्योपगमान्न च समवायप्रत्यक्षानुरोधाद्विशेषणताप्रत्यासत्तिस्वीकारस्समवायानंगीकारादत एवाभावप्रत्यक्षे इन्द्रियं न करणं. किंतु योग्यानुपलब्धिरेवेति मन्दानामाक्षेपं दूषयितुं मूले यदि स्यादिति. तथा चेन्द्रियेणाभावप्रत्यक्षे जननीये योग्यानुपलब्धेः सहकारिणामात्रेण निर्वाहेऽतिरिक्तप्रमाणकल्पनमनुचितमिति भावः तत्र योग्यानुपलब्धेरभावप्रत्यक्षहेतुत्वे युक्तिमाह. तथाहीति. घटादिज्ञाने घटादिभ्रमे न च घटभ्रमहेतुदोष एव तत्प्रतिबंधकः अन्यथा भ्रमोत्पत्तिकाले तदभावप्रत्यक्षापत्तेरिति वाच्यं. विनश्यदवस्थादोषा यत्र भ्रमस्तत्र भ्रमोत्पत्तिकाले प्रतिबंधकीभूतदोषाभावस्य सत्त्वादभावप्रत्यक्षापत्तेः अभावोपलंभे तदीन्द्रियत्वं तदीन्द्रियं जन्यतत्संबंधावच्छिन्नतदभावलौकिकप्रत्यक्षे प्रतियोग्युपलंभाभावेति. तदिन्द्रियजन्यानाहार्यतत्संसर्गकतत्प्रकारकोपलंभाभावेत्यर्थः इन्द्रियान्तरजन्ये आनुमानिके च तदुपलंभे सत्यपि तदभावप्रत्यक्षात्तदिंद्रि

भा॰

दि०क० यज्जन्येति अभावप्रत्यक्षहेतुप्रतियोग्यारोपासत्त्वेप्यभावप्रत्यक्षादनाहार्येति. तत्र प्रतियोग्युपलंभाभावेऽपेक्षितेति. तेन न जलपरमाण्वादौ पृथिवीत्वाभावादेः प्रत्यक्षमिति भावः मणिकृन्मतानुसारेण योग्यतां निर्वक्ति. सा चेति. प्रसंजितेत्यापादितः स उपलंभाभावो भावप्रत्यक्षे हेतुरिति. अत्र तदधिकरणविषयकाभावप्रत्यक्षे तदधिकरणकतदापादकापत्तियोग्यतदुपलंभस्य विषयतासंबंधावच्छिन्नप्रतियोगिताकाभावो हेतुरित्यर्थः उपलंभे तदधिकरणकतदापत्तियोग्यत्वं च तत्प्रतिसत्त्वनिरुक्तव्याप्तिनिरूपकत्वं. अत्र च तदापादकापत्तिर्यत्र तोत्पन्ना तत्र तद्भावप्रत्यक्षानुपपत्तिरिति योग्यत्वनिवेशः न च प्रतिसत्त्वस्योपलंभव्याप्यत्वेन निविशेच्छितस्योपलंभव्याप्यत्वं सामग्र्यन्तरविरहे प्रतियोगिसत्त्वेप्युपलंभाभावात् किंतु महत्त्वोद्भूतरूपाद्यवच्छिन्नस्यैव एवं च महत्त्वादिविशिष्टपृथिवीत्वस्योपलंभव्याप्यत्वाज्जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षापत्तिरिति वाच्यं. तदधिकरणवृत्तिधर्मानवच्छिन्नत्वस्य योग्यताघटकीभूतव्याप्त्यंशे निवेशात्. महत्त्वस्य जलपरमाणुवृत्तित्वेन तादृशव्याप्तौ तादृशधर्मानवच्छिन्नत्वाभावात्. न चैवं गंधवदणुभिन्नत्वविशिष्टस्यापि पृथिवीत्वस्याप्युपलंभव्याप्यत्वाद्गंधवदणुभिन्नत्वस्य जलपरमाणु ॥८५॥

योगि६
न६

123

न्नित्वाख्यनदोषनादवस्थं मितिवाच्यं. योग्यताघटकव्याप्तौ प्रतियोगिताग्राहकातिरिक्तधर्मानवच्छिन्न
त्वस्यापि निवेशात्. गंधवद्भिन्नत्वादेः प्रतियोगिग्राहकातिरिक्तत्वेन तादृशधर्मानवच्छिन्नत्वस्यो
क्तव्याप्त्यभावात्. न च प्रतियोगिग्राहकत्वं प्रतियोगिग्रहजनकत्वं. न च गंधवद्भिन्नत्वपृथिवीत्वोभ
यसमूहालंबनात्मकलौकिकप्रत्यक्षे विषयविधया हेतुत्वाद्गंधवद्भिन्नत्वस्याप्यक्षतमितिवाच्यं. प्र
तियोगिप्रकारतानिरूपितलौकिकविशेष्यताविरहप्रयोजकीभूताभावप्रतियोगित्वस्यैव प्रतियोगिग्रा
हकत्वपदार्थत्वात्. अथैवंपि शाब्दत्वप्रकारतानिरूपितलौकिकविशेष्यत्वाप्रसिद्ध्यानस्यादितनिरुक्त
योग्यानुपलंभविरहान्नेदृगभावप्रत्यक्षं नस्यादितिचेन्न. नहि वयं सर्वत्राभावप्रत्यक्षे निरुक्तयोग्यानुपलं
भस्य हेतुत्वं ब्रूमः किंतु योग्यस्याभावप्रत्यक्षे योग्यपिशाचत्वाद्यभावस्य तदधिकरणप्रत्यक्षे तु तदधि
करणीयत्वप्रसंजनप्रसंजितप्रतियोगिकस्य तदधिकरणीयत्वोपलंभस्य विषयतासंबंधावच्छिन्नाभावप्र
वप्रतियोगिनिष्ठो हेतुः अत्राप्यापादनस्य सर्वत्रासंभवेन तदधिकरणीयत्वप्रसंजनप्रसंजितत्वं तद

चे२ त्व२

दी०का० धिकरणीयत्वेन निविष्टव्याप्तिनिरूपितत्वं जातित्वादिविशिष्टस्य स्तंभेऽवृत्तित्वस्योपलंभव्याप्यत्वात्स्तंभे
पिशाचत्वाभावप्रत्यक्षं जातिविशिष्टस्य पिशाचवृत्तित्वस्योपलंभाव्याप्यत्वान्न पिशाचे स्तंभत्वाभावप्र
त्यक्षं. एवं तादात्म्येन स्तंभवृत्तित्वयोरुपलंभव्याप्यत्वाव्याप्यत्वाभ्यां स्तंभपिशाचयोः पिशाचभेदस्तंभभेः
भेदयोः प्रत्यक्षत्वाप्रत्यक्षत्वे उपपादनीये इति. न चाक्षुषप्रत्यक्षमिति. अनुपलंभे विद्यमानेऽपि निरुक्त
योग्यताविशिष्टस्य तस्य तत्राभावादिति भावः. आपादयितुं शक्यत्वादिति. तथा च समानेन्द्रियजन्योप
लंभव्याप्यत्वस्य योग्यताघटकत्वान्न तत्र चाक्षुषमिति भावः. ननु जातित्वादिविशिष्टस्य तेजोवृत्तित्वस्यो 124
पलंभव्याप्यत्वात्तेजसि गुरुत्वाभावप्रत्यक्षापत्तिरेवं स्तंभे पिशाचत्वाभावप्रत्यक्षवत्पिशाचाभाव।
स्यापि प्रत्यक्षापत्तिरत आह. गुरुत्वादिकमिति. आदिपदेन पिशाचादिपरिग्रहः. अयोग्यस्य पिशाचत्वा
दिजातेरभावस्य प्रत्यक्षत्वाद्गुरुत्वादिकमित्युक्तं. न योग्यः न प्रत्यक्षाविषयः. अशक्यत्वादिति. निरुक्तयोग्य
ताघटकव्याप्तौ प्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वस्य निवेशात्प्रकृते च जातित्वविशिष्टे तेजोवृत्तित्वस्योप ॥८६॥

लंभव्याप्यत्वेपि जातित्वस्य गुरुत्वादिवृत्तित्वेन तादृशव्याप्यत्वे प्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वाभावादिति भावः
न च तदधिकरणीयत्वप्रसंजनप्रसंजितप्रतियोगिकस्तदधिकरणीयत्वोपलंभस्याभावएवेंद्रियघटाभा
वादिप्रत्यक्षेहेतुरास्तां किं पूर्वोक्तयोग्यानुपलंभहेतुतयेति वाच्यं. तथासति परमाण्वादौ महत्त्वाद्यभावप्रत्यक्षा
नुपपत्तेरिति. वायावुद्भूतरूपाभावेति. रूपत्वावच्छिन्नाभावस्यातींद्रियानुभूतरूपप्रतियोगिकत्वेन प्रत्यक्षा
संभवादुद्भूतेति. एवमादायेत्यादिना प्रभायां उद्भूतस्पर्शाभावपरिग्रहः प्रत्यक्षे विषयत्वेन कारणत्वस्य क्लृप्तत्वे
तेनैव गुरुत्वाद्यतींद्रियाभावप्रत्यक्षवारणे तदनुरोधेन तदधिकरणीयत्वस्यादिद्वितीययोग्यानुपलंभस्य
हेतुतानस्वीकार्येत्यभिप्रायवान् संसर्गाभावे योग्यतामाह. संसर्गेति. प्रतियोगिनो योग्यत्वेति. योग्यमात्रप्र
तियोगिकत्वे सति योग्यधर्ममात्रावच्छिन्नप्रतियोगिताकत्वमित्यर्थः अत्र द्रव्यसामान्याभाववारणाय मात्रे
ति. गुरुत्वव प्रत्यक्षाभाववारणाय विशेष्यदलं. रूपागुरुत्वान्यतरावच्छिन्नाभाववारणाय विशेष्यदले मा
त्रेति. अधिकरणयोग्यत्वमिति योग्याधिकरणवृत्तित्वमित्यर्थः इदं चाभावग्राहकयोग्यसन्निकर्षप्रदर्शनं

दि०क०

र्थंतेन स्तंभ इति. य नाय्यादौ न पिशाचान्योन्याभावप्रत्यक्षमिति भावः अन्योन्याभावयोग्यतानुगतत्ववच्छिन्न प्रतियोगितावच्छेदकत्वं जात्यतिरिक्त योग्यधर्मावच्छिन्नप्रतियोगिताकत्वान्यतरदेव तेन स्तंभे पिशाचान्योन्याभाव पिशाचवदन्योन्याभावयोः प्रत्यक्षत्वाप्रसक्तस्य दोषोपपत्तिरित्यत्र विस्तरः धूमत्वादिसामान्यलक्षणायां इंद्रियजन्यत्वाभावात् व्यापारवत्त्वकथनमसंगमत आह: व्यापारः सन्निकर्ष इति. यद्यपि धूमत्वादेरिंद्रियप्रतियोगिकत्वाभावात् सन्निकर्षत्वमयुक्तं. तथापि. संयोगस्येंद्रियप्रतियोगिकत्वात् तद्घटितस्येंद्रियसंयुक्त। विशेष्यकज्ञानप्रकारीभूत धूमत्वादेः प्रत्यासत्तितानिर्वाहः तत्र. सामान्यस्वरूपं च. अन्वयदीति. इंद्रियसंबद्धसामान्यं प्रत्यासत्तिरित्युच्यते तदेत्यर्थः ननु यत्र चक्षुःसन्निकर्षेण धूमेति ज्ञानं जनितं. तत्र चक्षुःसंयोगविनिगमेपि तादृशज्ञानमादायेंद्रियसंबद्धविशेष्यकज्ञानप्रकारकं स्मरणं. तत्र धूमत्वसामान्यलक्षणाजन्यज्ञानापत्तिवारणाय सामान्यलक्षणा घटकज्ञाने तदिंद्रियजन्यत्वस्य वाच्यत्वात्. नवींद्रियसंबद्धत्यत्र लौकिकः संबंधः ज्ञानप्रकारेत्यात्र ज्ञानस्य तदिंद्रियजन्यत्वं चेद्विवक्षितं. तदाणुत्वेन यत्किंचिदणु ॥१२७॥ 125

प्रकारस्य धूमत्वादेर्धूमान्तरे सत्त्वाद्धूमान्तराणां सामान्यलक्षणया ज्ञानापत्तिः न च तदा धूमो नेंद्रियसंबद्धः ज्ञानलक्षणात्मक संनिकर्षस्य धूमे सत्वात्. तत्र तत्रैव क्षणे सामान्यलक्षणाजन्यज्ञानत्वीकारे क्षतिविरह इति भावः. तन्मूलकज्ञानधारापत्तेर्दुर्वारत्वादित्यत आह. लौकिकेत्यादीति. अत्र लौकिकसन्निकर्षस्य धूमे सत्वात्. विशेषणविधया घटकत्वं बोध्यं. अन्यथा. तत्र धूमे पूर्वकालीनचक्षुःसंयोगमादाय तद्दोषतादवस्थ्यमिति ध्येयं. उद्भूतलक्षणं. यत्र चक्षुःसंयोगे विद्यमानेपि दोषात् धूमचाक्षुषं.

पक्षितावणुत्वसामान्यलक्षणया सकलाणुगोचरो मानसबोँ न स्यात्तदाणौ मनसो लौकिकसंबंधस्य ज्ञाने मनोजन्यत्वस्य चाभावादत आह· इदं चेति· तथा च न हि इन्द्रियेण सामान्यलक्षणया ज्ञाने जनीये तद्व्यक्तितं· ननु मानससामान्यलक्षणा जन्यज्ञाने नोक्तदोषेति भावः आसत्तिराश्रयाणां त्वित्याँमूलमवतारयितुं भूमिकां रचयति· परं त्वित्यादिना भूतले इत्यस्य ज्ञानेत्यनेनान्वयः भूतलादीनामित्यादिना संयोगेन तद्वद्धिवरकणइत्यान्तरमिति आह: तेनेदं बोध्यमिति· ज्ञायमानमितिसं सामान्यं प्रत्यासत्तिरिति बोध्यमित्यर्थः परंपरया प्रत्यासन्नस्य घटत्वादेरेव प्रत्यासत्तिरसंभवात्· किंत्वित्यादिना वक्ष्यमानदोषासंगतेराह· परं त्विति· तथा च घटत्वस्य परंपरयाँ लाघवज्ञानाद्वक्ष्यमाणदोषसंगतिः तेन संबंधेनेति· अन्यथा समवायेन ज्ञानप्रकारीभूतघटत्वादिसामान्यप्रत्यासत्त्या कालादिज्ञानापत्तेरिति भावः किंत्विति· एवं चेत्यस्यार्थः किंचेति· कुतो न जन्यतरति इदमापाततः सामान्यलक्षणाघटकीभूतलौकिकसन्निकर्षविशेषणत्व। विवक्षणेन कालान्तरीयसंयोगमादायोक्तातिप्रसंगस्याभावादिति· तस्मात्पूर्वोक्तदोष एवात्र कल्प्यो वा

दि०का० ध्यः न च तत्र स्वसमवायिसमवायादिसंबंधेन घटत्वादेरेवासत्तितया पूर्वोक्तदोषोपि न संभवती
ति वाच्यं· स्वसमवायिसमवायादिना घटत्वं कपालादौ यदा न ज्ञातं किंतु· तद्घट एव समवायादिना
ज्ञातस्तदुत्तरमपि तद्घटाश्रयकपालानां ज्ञानस्य सर्वानुभवसिद्धस्य घटत्वप्रत्यासत्त्याउपपाद
नासंभवात्· एवं ज्ञायमानसामान्यस्य प्रत्यासत्तित्वे चैत्रीयज्ञानविषयसामान्यप्रत्यासत्त्या मैत्र।
स्य तदाश्रयप्रत्यक्षापत्तिभिया तत्पुरुषीयत्वनिवेश्यत्वस्यावश्यकतया गौरवं ज्ञानस्य प्रत्यास
त्तित्वे तु पुरुषनिष्ठप्रत्यासत्त्या हेतुत्वान्न तत्पुरुषीयत्वनिवेश इति· लाघवमित्यपि बोध्यं· तेन सामान्य 126
विषयकज्ञानमिति· इन्द्रियसंबद्धविशेष्यकं सामान्यप्रकारकं ज्ञानमित्यर्थः यद्वा सामान्यविषयकं
ज्ञानमात्रमित्यर्थः सामान्यविषयकज्ञानत्वं प्रत्यासत्तितावच्छेदकमिति यावत्· तथा चात्र कल्पे इन्द्रिय
संबद्धविशेष्यकत्वप्रकारकत्वेन तदिन्द्रियजन्यत्वादिज्ञानविशेषणानि नोपादेयानीति· पूर्वमते तु तदिं
द्रियजन्यत्वादेर्निवेशेनेंद्रियभेदेन कार्यकारणभावकल्पनेन च गौरवमित्यर्थः एतन्मते च निर्विक ॥६६॥

त्पकसाधारणं स्मरणसाधारणं च सामान्यज्ञानमात्रं प्रत्यासत्तिस्तथा च घटत्वप्रकारकप्रत्यक्षत्वं कार्य्य
तावच्छेदकं घटत्वज्ञानत्वं च कारणतावच्छेदकं स्वप्रकारीभूतघटत्वाश्रयत्वं कार्य्यतावच्छेदकः संवंधः
स्वविषयघटत्वाश्रयत्वं कारणतावच्छेदकः संवंधः चक्षुःसंयोगादिशून्यकाले पूर्वोक्तातिप्रसंगस्य व
क्ष्यमाणानदिंद्रियजेत्यादिनैव वारणादिति ध्येयं -अणुत्वज्ञानमात्रेणैव सकलाणुगोचरमानसवो
घोदयाह. वह्निरिति. आलोकसंयोगादिकमित्यादिना दोषाभावपरिग्रहः नजन्येतेति. अयमाशयः यत्
घटे चक्षुःसन्निकर्षादिघटिता चाक्षुषादिसामग्री तदुत्तरक्षणे घटेति चाक्षुषं सैव सामान्यलक्षणानयो
त्तरक्षणे सकलघटविषयकं ज्ञानं जनयतीति. प्राचीनमते क्षणिकविलंकल्पने तत्र च मानाभावः यदेवघ
टेति चाक्षुषमुत्पद्यते तदेव सन्निकृष्टघटांशे लौकिकजन्यघटांशे लौकिकमित्यभ्युपगमात्तथा च. सामा
न्यलक्षणाजन्यघटत्वप्रकारकचाक्षुषत्वस्य व्यापकं घटत्वप्रकारकलौकिकचाक्षुषत्वमिति फलितं. त
था च चक्षुःसन्निकर्षादिशून्यकाले व्यापकधर्मावच्छिन्नजनकसामग्र्याः सहकारिण्या विरहादेव न चा

क्षुषं.सामान्यलक्षणायाज्ञानमिति.यदिज्ञानरूपेति अत्रेयोयदिशब्दः सामान्यलक्षणापीतदुत्तरंयोऽन्यःसा
मान्यलक्षणास्वीकारेबीजमाह.अत्रेति.अयमर्थः अयमभिप्रायःभानेविषयतानसंभवतीति.प्रत्यक्ष
विषयतायाःसन्निकर्षाअपत्वव्याप्यत्वादितिभावः वह्निसंबंधस्यागृहीतत्वादिति.तथाच.प्रत्यक्षधर्मे
व्याप्तेर्निर्णीतत्वात्तद्विशेष्यकोव्याप्यत्वसंशयःसंभवतीतिभावः अनुपस्थितत्वादिति.तथाचधर्मिज्ञानं
भावात्तद्विशेष्यकोपिव्याप्यत्वसंशयःसंभवतीतिभावः ज्ञानलक्षणास्वीकारे.बीजमाह.एवमित्यादिनं.
कथंस्यादिति.चन्दनखण्डस्याचाक्षुषेजायमानेउपस्थितसौरभभानंतस्मात्सौरभांशेचक्षुःसन्निक
र्षाभावादित्यर्थः सौरभत्वप्रकारकलौकिकप्रत्यक्षसामग्र्याःसहकारिण्याविरहेणसौरभत्वसा
मान्यलक्षणयापिसौरभभानंनसंभवतीतिभावः सुरभिचन्दनमित्यादौसौरभादेर्भानेसौरभत्वादि
सामान्यलक्षणयैवसंभवतिसौरभत्वप्रकारकलौकिकप्रत्यक्षसौरभत्वावच्छिन्नप्रकारकप्रत्यक्षा
न्यतरसामग्रीसहकारेणैवतस्याःफलजनकत्वांगीकारात्.प्रकृतेचद्वितीयसामग्र्याःसहकारिण्याः ॥८९॥

सत्वादिस्वभिप्रायेणाह· यद्यपीति· सौरभत्वस्य ज्ञानमिति· स्वरूपतः सौरभत्वस्य ज्ञानमित्यर्थः· ज्ञानल
क्षणया· ज्ञानलक्षणयैव न तदानीं सौरभत्वांशे धर्मान्तरस्याग्रहीततया सामान्यलक्षणया तज्ज्ञानानि
र्वाहादिति भावः· ननु धर्मान्तरसौरभत्वांशे ग्रहेपि सौरभत्वसामान्यलक्षणयैव सौरभत्वादेर्भानमस्तु·
सौरभत्वप्रकारकसौरभविशेष्यकत्वस्यैव तत्कार्यतावच्छेदकत्वादिति चेन्न सौरभत्वादिविषयता
प्रयोजिकायां स्वविषयसौरभत्वादिमत्त्वरूपसामान्यलक्षणासंबंधस्य सौरभत्वे भावेन सामान्य·
लक्षणयातज्ज्ञाननिर्वाहात् सौरभत्वे सामान्यलक्षणायाः कार्यतावच्छेदके सौरभत्वप्रकारकत्वनि
वेशप्रयोजनाभावाच्च· न च ज्ञानलक्षणायाः कारणत्वान्तरकल्पे गौरवभियैव सामान्यलक्षणाप्र ने ४
कारकत्वस्य कार्यतावच्छेदके प्रवेश इति शंक्यं विशेषणे ज्ञानहेतुतयैव निर्वाहे ज्ञानलक्षणायाः का
रणत्वान्तरकल्पनाविरहादिति· ननु विशेषणज्ञानजन्यतावच्छेदकं विशिष्टबुद्धित्वं· ज्ञानलक्षणाया
स्तु विशिष्टप्रत्यक्षत्वमिति नह्येतेन निर्वाहः· एवं यत्र ज्ञानलक्षणायाः स्वविषयमुख्यविशेष्यकमानसं तत्रेः

...iversity, ...

विशेषणज्ञानकारणतया न निर्वाहःस्यादत आह. एवमिति. ज्ञानलक्षणयैव तत्र धूमत्वज्ञानरूपसामान्यल
क्षणया: स्वविषयधूमत्वाश्रयत्वसंबंधेन धूलीपटलेऽभावेन सामान्यलक्षणयानुव्यवसाये धूलीप
टलभानासंभवादिति भावः सर्वदैवेति. ध्यानाभावेपीत्यर्थः॥ ॥इति प्रत्यक्षनिरूपणं समाप्तिमग
मत्॥ ॥अनुमितिमिति॥ परामर्शो व्यापार इति संगतिश्चात्र प्रत्यक्षेणोपजीव्योपजीवकभावो बोध्यः
करणे निर्दिष्टे एवं व्यापारे जिज्ञासोदयान्मूले पश्चान्निर्दिष्टमपि करणं प्रथमं प्रदर्शयति. व्याप्तिज्ञान
मिति. परामर्शो व्यापार इति. ननु व्यापारत्वं. तज्जन्यत्वे सति तज्जन्यजनकत्वं. तच्च परामर्शे न संभवति. 128
वह्निव्याप्यधूमवान्पर्वत इति परामर्शे व्याप्तिज्ञानजन्यत्वस्याभावात् महानसीयवह्निधूमव्याप्तिज्ञानस्य
तदानीमभावेन व्यभिचारात् तत्तदुपपादयति. तथाहीत्यादिना परस्पनीति. धूमदर्शनस्य व्याप्तिस्म
रणोद्बोधकविधया हेतोः संपत्त्यर्थं यादृशविशेषं विशिष्टस्य धूमस्य व्याप्तिसंबंधितया ज्ञानं तादृशधू ॥२०॥
मदर्शनस्यैव व्याप्तिस्मृतावुद्बोधकत्वमित्यभिप्रायेणानवच्छिन्नत्वमुक्तं. एवंरूपं स्मरणमिति. उद्बुद्धसंस्का

अयमाशयः व्याप्त्यंशे निश्चयत्वानिवेशे धूमो वह्निव्याप्यो न वेति संशयकाले तादृशपरामर्शसत्वेऽनुमितिवारणाय व्याप्त्यंशे निश्चयत्वनिवेशनं सार्थकं. नव्यापि तादृशपरामर्शस्यालक्ष्यत्वादेव न वारणे निश्चयत्वनिवेशनमफलमिति भावः २
स्य ४

रस्य पूर्वसत्वादिति भावः स एव परामर्श इति. तथा च स्मरणात्मकव्याप्तिज्ञानस्य पूर्वसत्वान्नर व्यभिचार इति भावः न च तथापि यत्र व्याप्तिघटकपदार्थानां विशृंखलोपस्थिति मूले विशेष्ये विशेषणमिति रीत्या परामर्शस्तैवानुमितिस्तत्र विशिष्टव्याप्तिज्ञानस्य व्यभिचारो दुरुद्धर एवेति वाच्यं. व्याप्त्यंशे निश्चयत्वानिवेशप्रयुक्तलाघवेन विशिष्टवैशिष्ट्यमिति रीत्या परामर्शस्यैवानुमितिहेतुत्वादित्यभिप्रायात्. स्मरणात्मकपरामर्शे व्याप्तिज्ञानस्य व्यभिचार इत्यपि न संस्कारसंबंधेन पूर्वं व्याप्तिज्ञानस्य सत्वात्. अत्र न व्याप्तिज्ञानत्वस्य परामर्शत्वव्यापकतयानुमितिं प्रति हेतुत्वमेव नास्ति कुतः कारणत्वं. अन्यथा कपालादेर्घट प्रति रसत्वेन हेतुतापत्तिस्तस्मादनुमितिं प्रति मनस्त्वेनैव करणत्वमित्याहुः लिंगमनुमितिकरणमिति. अनुमितौ परामर्शमात्रं न हेतुरपि तु लिंगपरामर्शः. तथा च विशिष्टस्य कारणताग्रहे विशेषणस्यापि कारणताग्रहात्परामृष्यमाणलिंगस्य लिंगपरामर्शस्य वा हेतुत्वे तत्र विनिगमनाविरहादुभयोर्हेतुतासिद्धौ तत्र च. व्यापाराभावान्नपरामर्शस्य करणं. किं तु लिंगस्यैवेत्याशयः लिंगस्य तदानीमभावादिति. न च परामर्श

रूप· व्यापारसंबंधेन तदानीं लिंगमस्त्येवेति वाच्यं· अतीतादिलिंगस्य परामर्शाजनकतया परामर्श
स्य तद्व्यापारत्वासंभवात्· इदमुपलक्षणं· लिंगस्य हेतुत्वे चैत्रीयपरामर्शविषयाल्लिंगान्मैत्रस्यानुमि
तिप्रसंगः· नत्पुरुषीयत्वनिवेशे गौरवमस्मन्मतेनुसामानाधिकरण्यप्रत्यासत्त्या हेतुमद्भावेनैवातिप्र
संगाभावान्न तत्पुरुषीयत्वनिवेशनमिति लाघवमित्यपि वोध्यं· तत्र· व्याप्यस्य पक्षेण सह वैशिष्ट्यज्ञानं
च· न तु परस्परं व्यभिचार इत्यत आह· अनुमितित्वेति· कार्यतावच्छेदकस्य परस्परानुमितिव्याप्यत्वा 129
न्न व्यभिचार इति भावः· पक्षविशेष्यकत्वमेव सर्वत्रानुमितौ नियतमिति नवीनमतमाह· द्विविधादपी
ति· कारणतावच्छेदकं च परामर्शद्वयसाधारणं व्याप्यपक्षोभयवैशिष्ट्यावगाहि निश्चयत्वमतो न व्यभिचा
रः· द्विविधयोरपि परामर्शयोः स्वस्वाव्यवहितोत्तरानुमितिं प्रति ताद्रूप्येण हेतुत्वमित्यपि केचित्· वस्तुतोनु
भवानुरोधात्पक्षविशेष्यकपरामर्शस्यैव हेतुत्वं· अत एव च वह्निव्याप्यधूमवानयमित्याकारकः पक्ष
विशेष्यक एवोपनयः सर्वसम्मत इति ध्येयं· मीमांसकंशंकते· न चेति· ज्ञानेति नापीत्यस्यानुमितेर्दर्श ॥२१॥

नादित्यनेनान्वयः ज्ञानद्वयादेव ज्ञानद्वयादपि विशिष्टवैशिष्ट्यावगाहि ज्ञानमिति भावप्रधानो निर्देशः स
र्वत्र न कारणमिति. अनुमितित्वावच्छिन्नं प्रति न कारणतावच्छेदकमित्यर्थः आवश्यकत्वादिति. व्याप्यताव
च्छेदकप्रकारकपक्षधर्मताज्ञानत्वस्यावश्यमतः सिद्धनियतपूर्ववर्त्तितावच्छेदकताकत्वादित्यर्थः ननु ज्ञान
द्वयस्थलेपि विशिष्टज्ञानं कल्पनीयमतो न व्यभिचार इत्यत आह. विशिष्टज्ञानेति. व्याप्यतावच्छेदकेति.।
अयमालोको धूमो वेति. संदेहदशायां व्याप्यतावच्छेदकप्रकारकनिर्णयाभावेपीत्यर्थः वह्निव्याप्यधूम
वानितीति. वह्न्यभाववद्वृत्तिमानित्यर्थः ननु धूमसमानाधिकरणत्वादिरूपव्याप्तिविशिष्टवानित्यर्थः तत्र
हेतुतावच्छेदकमाननैयत्यात्. अनुमित्युत्पत्तेरिति. तथाच. व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य त
त्र व्यभिचारान्नेतेन रूपेण हेतुत्वमिति भावः ननु तत्र फलबलाद्व्याप्यतावच्छेदकप्रकारकं कल्पनीयमतो न व्य
भिचार इत्यत आह लाघवाच्चेति. व्याप्यतावच्छेदकप्रकारकत्वापेक्षया व्याप्तिप्रकारकत्वस्य लघुत्वादित्यर्थः
न च स्तुँतुतावच्छेदकलाघवं. तथापि पूर्वोक्तकल्पनालाघवमेव मीमांसकानां मूलयुक्तिर्भविष्यतीत्यत आ

हे। वे। सानंक३

दि०क० ह.किंचेति.नचगृह्यमानेति.अत्रज्ञानचाग्रहस्य वर्त्तमानतायां अभिधानान्न कालान्तरीयतादृशाग्रह
मादायदोषः व्याप्तिप्रकारकं ज्ञानमिति स्वतन्त्रं कारणमित्यनेनाचार्यैरित्युक्तत इतिरत्नं च ननत्सुरूषीय
त्वं निवेश्यते.चैत्रस्य व्याप्तिग्रहकालेन छ्न्यमैत्रस्यानुमित्यापत्तेरभावान्मैत्रात्मनि स्वतन्त्रहेतुभूतव्या
प्तिज्ञानाभावादिति गौरवमिति भावः ननु व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मताविषयकव्या
प्तिप्रकारकज्ञानत्वेन वा हेतुतेत्यत्र विनिगमनाविरहेण हेतुताद्वयं तदापीत्यत आह.वह्निव्याप्य इति.अ
नुमितिः स्यादिति.न्यायनये तु व्याप्तिप्रकारकतानिरूपितहेतुप्रकारतानिरूपितपक्षविशेष्यताशालि 130
ज्ञानत्वेन हेतुत्वस्य विवक्षितत्वात्तेन तादृशज्ञानान्न वा धूमो वह्निव्याप्यो धूमवान्पर्वत इति ज्ञानादनुमित्याप
त्तिस्तत्र व्याप्तिप्रकारतानिरूपितधूमप्रकारतायाः पर्वतविशेष्यतानिरूपितप्रकारतानात्मकत्वादिति
भावः ननु ज्ञानद्वयस्थले विशिष्टज्ञानकल्पनागौरवं न्यायमते दूषणं भविष्यतीत्यत आह.इत्थं चेति.पर ॥१२॥
मुखगौरवस्येति.फले कार्यकारणभावग्रहः तन्मुखतदधीनं गौरवं गौरवज्ञानमित्यर्थः.विशिष्टज्ञान

त्वावच्छेदेन कारणत्वग्रहे विशिष्टज्ञानत्वधर्मिकगौरवनिश्चयो विरोधी वाच्यः तच्च गौरवं प्रमाणान्तरासिद्धं तत्तदनुमितेरव्यवहितपूर्ववर्त्तित्वाश्रयकत्वमेव. तादृशगौरवनिश्चयो विशिष्टज्ञानत्वेन कारणत्वनिश्चयाधीनत्वघटकीभूततत्तदनुमितेरव्यवहितपूर्ववर्त्तित्वाश्रयनिर्णयं विना न संभवतीति कार्यकारणभावनिर्णयात्पूर्वं गौरवनिर्णयाभावात्तेन तादृशगौरवं दोष इति भावः मूले अनुमितिलक्षणानन्तरं व्याप्तिनिरूपणे संगतिमुपोद्घातं निरूपयति. व्याप्यो नामेति. नन्वेति. घटकत्वं सप्तम्यर्थः अव्याप्तिप्रसंगादिति. अव्याप्त्यभिधानमिदं येन केनचित्संबंधेन साध्यवत्त्वविवक्षणेऽपि प्रायेण यदि च संबंधसामान्येन साध्यवत्त्वं विवक्ष्यते. तदा धूमवान्वह्नेरित्यादावतिव्याप्तिर्बोध्या. अवृत्तित्वं नास्तीति विशिष्टाधेयताया अनतिप्रसक्तत्वादिति भावः फलितार्थ इति. तथा च तन्निष्ठाधिकरणतानिरूपकतावच्छेदकस्यैव तन्निरूपिताधेयतावच्छेदकत्वनियमेन विशिष्टसत्तात्वस्य गुणाधेयतानवच्छेदकत्वात्तत्राव्याप्तिरिति भावः अथवेत्यादिलक्षणमवतारयितुमत्र लक्षणे दोषमाह. न चेति. ननु केवलान्वयित्वज्ञानकाले पक्षताघटकसंशयाभावान्नैवानुमितिः त

दि०क० धूम्यकालेनुत्रमात्मकव्याप्तिज्ञानादनुमितिमेवस्येवेत्यत आह किंचेति. उत्पादविनाशादिना संयोगेन हे
तुतायां गुणवान् घटादित्यादिः संग्रहः ननु स्वाधिकरणवृत्तिसाध्यवदन्योन्याभावकत्वं लक्षणार्थस्तः
था च नेयमव्याप्तिरिति चेन्न. वह्निमान् धूमादित्यादौ धूमाधिकरणे वह्निमदन्योन्याभावस्य कालिकसंबंधेनवृ
त्तेरव्याप्यापत्तेः साध्यवत्ताग्रहविरोधितांगेनियामकसंबंधेनावृत्तित्वस्यावश्यं विवक्षणीयतया सत्ताभाव
वान् जात्यभावादित्यादावव्याप्तेः सत्ताभावाधिकरणे साध्यवत्ताग्रहविरोधितानियामकसमवायेन वृत्ते
रप्रसिद्धेः ननु सत्तावान् जातेरित्यादौ स्वाधिकरणेत्यादिव्याप्तिज्ञानकारणं. सत्ताभाववान् जात्यभावादि 131
त्यादौ तु साध्यवदन्येत्यादिव्याप्तिज्ञानं कारणमिति वाच्यं. तथात्वे संयोगसंबंधावच्छिन्नघटाभावे साध्ये
विषयितया हेतौ घटे लक्षणद्वयस्याप्यव्याप्तेः तद्विषयितया हेत्वधिकरणे ज्ञाने साध्यवत्ताग्रहविरो
धितानियामकसंयोगेन तथाभूतसंयोँन घटाधिकरणे हेतुतावच्छेदकविषयितया च वृत्तेरप्रसिद्धेः न
चातिरिक्तो नयाभावेमानाभावइत्यत आह. एकसत्त्वेपीति. उदनुपलंभाणां विशिष्टाभावमादायातिव्याप्तिरिस ॥२३॥
पि वोध्यं. ननु वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेनाभावविशेषणत्वाव्याप्तिरित्यत आह. गु

गे३

णवानिति. अत्रे हेतोरेकव्यक्तिनयासमानाधिकरणयोरेव व्याप्तिरित्युक्तावपि न निस्तार इति भावः एतद्रूपवानेन दृष्टांते लक्षणसत्वादसंभवासंभवादाह. इति वाच्यमिति. गुणत्वद्रव्यत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वात् जातिव्याप्तिरिति भावः परंपरयास्वाश्रयसमवायेन तथात्वे उक्तपरंपरया यदवच्छेदकं तदन्यत्वस्य जातित्वे सत्तान्नाव्याप्तिरिति भावः उक्तपरंपरयारूपत्वव्याप्यजातित्वावच्छिन्नस्य समवायेनाभावः नास्तीत्यत्रापि पृथिव्यामित्यनुषज्यते मतान्तरमाह. साध्यादीति. आदिना साधनपरिग्रहः व्याप्तेर्भेदादिति. व्याप्तिज्ञानस्य कारणताभेदादित्यर्थः पूर्वोक्तरीत्यारीतो तत्र साध्यतावच्छेदकतावच्छेदकधर्मिकप्रतियोगितातावच्छेदकतानवच्छेदकत्वप्रकारकत्वज्ञानस्य हेतुत्वं नोचितं कारणतावच्छेदकगौरवान्न च पूर्वोक्तरीतौ ज्ञातिमानित्येवानुमितिः स्यान्न तु जातिमत्वानित्याकारिकेति वाच्यं. पृथिवीत्वादिहेतुके जातिमानित्येवानुमितिप्राकारो जातिमत्वानित्याकारस्तु नह्यक्तित्वहेतुकस्य दोषादित्यपि वदंतीत्यामस्वरसः सूचितः शुद्धसत्तासमानाधिकरणेति. न च विशिष्टनिरूपिताधिकरणतायाः हेतुतावच्छेदकसंबंधत्वे कथं तेन संबंधेन सत्ताधिक

दि०क० रणे गुणः समवायस्य न यत्वे तु उक्तत्वे साध्ये विशिष्टसत्ताया व्यभिचारित्वात् तत्र व्याप्त्यभिधानमसंगतमिति वाच्यं.
साध्याभाववद्वृत्तितानवच्छेदकहेतुतानवच्छेदकवत्त्वस्यैव व्यभिचारपदार्थतया शुद्धसमवायसंबंधस्य हेतुतावच्छे
दकसंबंधत्वेपि विशिष्टसत्त्वस्य हेतौ व्यभिचारित्वाभावात्. नाव्याप्तिरिति. न च हेतुतावच्छेदकविशिष्टसत्तात्ववि
शिष्टसत्ताया अधिकरणत्वस्य गुणेसत्त्वादेवं विवक्षणेपि कथमव्याप्तिपरिहाय इति वाच्यं. हेतुतावच्छेदकावच्छि
न्ननिरूपिताधिकरणत्वस्य विवक्षितत्वाद्विशिष्टसत्तात्वस्य गुणनिष्ठाधिकरणतानवच्छेदकतया तदवच्छिन्न
निरूपिताधिकरणत्वस्य गुणेऽभावादिति. तथैव तदवस्थैव तस्यैव वृक्ष इति. अधिकरणभेदेनाभावभेदानभ्यु 132
पगमादिति भावः. प्रतियोग्यधिकरणावृत्तित्वं. प्रतियोग्यनधिकरणवृत्तिभिन्नत्वं विवक्षितत्वादिति. प्रतियो
गिव्यधिकरणपदेन विवक्षितत्वादित्यर्थः. न चैवं हेतुसमानाधिकरणस्यास्य वैयर्थ्यं. सत्तावान् जातेरित्यादौ
सत्ताद्यभावस्य निरुक्तप्रतियोगिवैयधिकरण्याभावाद्व्याप्तिविरहादत आह. स्वप्रतियोग्यनधिकर
णेति. निष्कर्ष इति प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावा न निष्कर्ष इत्यर्थः. तथा च. हेतुसमाना ॥९४॥

धिकरणत्वविशेषणावलादेवतादृशप्रतियोगिवैयधिकरण्यलाभान्ननैद्वयर्थ्यमिति भावः सत्ताधिकर
णत्वेपीति. तथाच. विशिष्टसत्ताभावो न प्रतियोगिव्यधिकरणः अभावान्तरप्रतियोगितायाश्चानवच्छे
दकमेव विशिष्टसत्तात्वमित्यपि व्याप्तिरिति भावः नचातिः नास्ति व्याप्तिः एवमग्रेपि. ननु प्रतियोगिताव
च्छेदकसंबंधेनैव प्रतियोग्यनधिकरणत्वमुच्यतां तावतापि ज्ञानवान्सत्वादित्यादावतिप्रसंगादित्य
त आह. इत्थं चेति. साध्यतावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वविवक्षणे चेत्यर्थः वह्निविरहस
त्वेपीति. तथाच प्रतियोगितावच्छेदकसमवायेन प्रतियोगिव्यधिकरणतादृशाभावप्रतियोगितावच्छेद
कत्वाद्वह्नित्वस्या व्याप्तिः साध्यतावच्छेदकसंबंधावच्छिन्नत्वेना[illegible]मप्रतियोगिताविशेषणे तु संबंध
द्वयप्रवेशेन गौरवमिति भावः नचातिन्नो व्याप्तिः समवायेन वह्न्यभावस्य साध्यतावच्छेदकसंयोगे
न प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तित्वाभावादिति भावः तत्सामान्यस्य प्रतियोगितावच्छेद
कावच्छिन्नसामान्यस्य. यत्किंचिदिति. यत्किंचिद्यत्प्रतियोगितावच्छेदकं तदवच्छिन्नसामान्यस्य चेत्य

दि॰के॰ र्थः पूर्वक्षणवृत्तित्वविशिष्टेति। पूर्वक्षणवृत्तित्वविशिष्टस्य स्व[illegible]स्य घटाभावादेर्योऽभावस्तदात्मकेत्यर्थः घटाभावाद्यधिकरणेपि पूर्वक्षणवृत्तित्वविशिष्टघटाभावादेरभावस्यान्तरक्षणावच्छेदेन सत्त्वादिति भावः। न च पूर्वक्षणवृत्तित्वविशिष्टस्य घटाभावादेरभावत्वाभावस्य प्रतियोगी न घटाभावादेरिति वाच्यं। पूर्वक्षणवृत्तित्वविशिष्टस्य घटाभावादेरभावत्वाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्य घटाभावादेर्योऽभावस्तदभावस्य पूर्वक्षणवृत्तिविशिष्टघटाभावरूपस्य घटाभावानतिरेकितया विशिष्टघटाभावप्रतियोगिनस्तस्य शुद्धघटाभावप्रतियोगित्वात्। तथा च प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्यासंभव इति भावः। घटाभावात्मकतयेति। अभावाधिकरणकाभावस्याधिकरणानतिरिक्तत्वादिति भावः। इत्यादावित्यादिना अभावसाध्यकसद्धेतुमात्रपरिग्रहः। स्वरूपसंबंध इति अभावीयविशेषणतेत्यर्थः। पूर्वक्षणवृत्तित्वविशिष्टं यत्त्वं घटाभावादि तदभावात्मकेत्यर्थः। प्राचां मते द्रव्यसंयोगसामान्याभावानंगीकारादाह। तथापीति। घटाभावीययत्किंचित्प्रतियोगिताव ॥६५॥

च्छेदकघटत्वावच्छिन्नानधिकरणत्वस्य हेत्वधिकरणे संभवात्प्रतियोग्यधिकरणाभावात्प्रसि
द्धिनिबंधना व्याप्तिः संभवतीति भावः घटत्वहेतुके यत्किंचित्प्रतियोगितावच्छेदकगुणसामान्या
भावत्वावच्छिन्नानधिकरणत्वं हेत्वधिकरणघटादेर्न संभवति. उत्पत्तिकाले गुणसामान्याभाव
सत्वादत आत्मत्वपर्यंतानुधावनं तृतीयविवक्षानुसारेण समाधत्ते. यादृशेति. यादृश्याः प्रतियो
गितायाः अवच्छेदकावच्छिन्नानधिकरणत्वं. हेतुमतस्तादृश्याः प्रतियोगितायाः अनाश्रयत्वमि।
त्यर्थविवक्षितत्वात्. अप्रतियोगिपदेन विवक्षितत्वात्. कपिसंयोगाभाववानात्मत्वादित्यादौ गुण
सामान्याभावत्वावच्छिन्नप्रतियोगितायाः एवं यादृशप्रतियोगितापदेनोपादातुं शक्यं तदनवच्छेदक
त्वस्य कपिसंयोगाभाववत्वे सत्त्वान्न व्याप्तिरिति भावः अत्र च यद्धर्मविशिष्टानधिकरणत्वं हेत्वधिक
रणस्य तद्धर्मभिन्नसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यस्य लघोर्निरुक्तस्य संभवेपि यथा
सन्निवेशो नवैयर्थ्यमिति बोध्यं. साध्यतावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वविवक्षणे व्या

नपा ४

मूल ३

दि०क० ष्टिंशकते. नचेति. महाकालभेदविशिष्टघटाभाव इति. अभावीयकालिकविशेषणताघटित
सामानाधिकरण्यसंबंधे महाकालभेदविशिष्टस्य घटस्याभाव इत्यर्थः महाकालभेदाभावादिति.
अभावीयविशेषणतासंबंधेन महाकालभेदाभावादित्यर्थः सामानाधिकरण्यघटकौ विशेषण-
विशेष्यसंबधाभ्यां यत्र विशेषणविशेष्यो सत्वं तत्रैव विशिष्टाधिकरणत्वोपगमादिति भावः ननु
महाकालमात्रवृत्तिविविशेषणतासाध्यतायां महाकालान्यत्वविशिष्टघटाभावोपि न प्रतियो-
गिव्यधिकरणस्तत्र तेन संबंधेन महाकालान्यत्वविशिष्टघटाधिकरणाप्रसिद्धेरत आह. व
स्तुत इति. अत्र प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्त्यभावीयसा
ध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितावच्छेदकत्वघटितलक्षणकरणेपि कालो घटवान्नि
त्यादावव्याप्तिस्तदवस्थैव न साध्यतावच्छेदकसंबंधावच्छिन्नतादृशप्रतियोगितायाऽप्रसिद्धेरतः प्र ॥९६॥

तियोगिताधर्मिकोभयाभावपर्यन्तानुधावनं समवायेन वह्न्यभावप्रतियोगितायां वह्नित्वावच्छिन्नसत्वा
त्संयोगेन घटाभावप्रतियोगितायां साध्यतावच्छेदकसंयोगावच्छिन्नत्वस्य सत्वाद्वह्निमांधूमादित्या
दावव्याप्तिवारणाय यत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वयोर्निवेशः संयोगेन घटाभावप्रतियोगि
तायां धूमत्वावच्छिन्नत्वघटितोभयाभावसत्वादिति व्याप्तिवारणाय सामान्यइति. अप्रसिद्धमिति. तथा
चाव्याप्तिरिति भावः यदि च कम्बुग्रीवादिमान्नास्तीत्यादौ कम्बुग्रीवादिमत्प्रतियोगिकाभावएव विषयो
न तु कंबुग्रीवादिमत्वेन तत्प्रतियोगितावच्छेदकत्वमपीत्युच्यते. तदा यत्किंचिद्घटवत्यपि कंबुग्रीवादि
मान्नास्तीति वाक्यस्य प्रामाण्यापत्तिरिति हृदि निधायाह तंदोषपरइति. श्री:॥ मूले पक्षतानिरूपणासंगते
रप्रदर्शनात्तां प्रदर्शयति. पक्षवृत्तित्वमित्यत्रेति. तथा चाप्रकृतस्यापरामर्शस्य घटकतया पक्षध
र्मत्वमपि प्रकृतं तदुपपादकत्वरूपोपोद्घातसंगत्या पक्षतानिरूपणं व्याप्तिनिरूपण[illegible]तात्वेककार्यका
रित्वमेव संगतिरिति बोध्यं. मूले पक्षतालक्षणस्यास्पष्टतयाऽनुक्तेः पक्षतालक्षणं स्वातंत्र्येण दर्शयन्न

दि॰के॰ मूलार्थमाह॰ सिषाधयिषाविरहेति. घनगर्जितेन मेघानुमितिस्थले व्याप्यापस्य सिषाधयिषामात्र
स्य पक्षतात्वं निषेधति. सिषाधयिषामात्रं नेति. मेघानुमानात्. मेघानुमिते अत एव. वक्ष्यमाणदू
षणादेव. सिषाधयिषाविरहरूपविशेषणस्य प्रयोजनमाह॰ सिद्धौ सत्यामिति. अत इति. तत्रानुमि
मितिनिर्वाहकपक्षतासंपत्त्यर्थमित्यर्थः तत्र सिषाधयिषायां सत्यामसत्यामपीति. सत्यामुभयाभाव
प्रयुक्तस्यासत्यां विशेष्याभावमात्रप्रयुक्तस्योक्तविशिष्टाभावस्य सत्त्वादिति भावः सिद्धौ सत्यामसत्यां
चेति. सत्यां विशेषणाभावमात्रप्रयुक्तस्यासत्यां तदुभयाभावप्रयुक्तस्य विशिष्टाभावस्य सत्त्वादिति भावः
सिद्धेः सत्त्वादिति. सिद्धेः सत्त्वेन तदभावरूपपक्षताया अभावादिति भावः सिषाधयिषाविरहवैशिष्ट्यं. 135
च सिद्धौ एककालावच्छेदेनैकात्मवृत्तित्वं. तेन सिषाधयिषाकालीनसिद्धेः कालिकसंबंधेन सिषा
धयिषाविरहविशिष्टेपि न क्षतिः परामर्शरूपकारणसत्त्वे सिद्धिरूपविरोधिसत्त्वे यद्यनुमित्सोः
स्यात्तदा तस्या उत्तेजकत्वं. वाच्यं. न चैतत्संभवतीत्याशंकते. ननु यत्रेति. परामर्शानंतरं परामर्शोत्प ॥२७॥

त्वेर

त्तिद्वितीयक्षणे. ततः सिद्ध्युत्पत्तिद्वितीयक्षणे. क्रमेण अव्यवधानेन एवमन्यत्रापीति यत्र परामर्शसिषाधयिषासिद्धयः क्रमेण एवं सिद्धिसिषाधयिषापरामर्शाः एवं सिषाधयिषापरामर्शसिद्धयस्तत्रेत्यर्थः सिद्धिकाले परामर्शकाले चेति. सिद्धिपरामर्शोत्पक्षणे इत्यर्थः कथमिति किमर्थमित्यर्थः इति प्रत्यक्षमिति. अनुमितीष्टसाधनताविषयकमिति शेषः प्रत्यक्षोत्पत्तेः पूर्वमनुमितीष्टसाधनताधीस्वीकारे इच्छासामग्र्या।उतिबंधात्प्रत्यक्षमेव न स्यादिति. यादृशयादृशेत्यादि. घटानुमितिर्जायतामितीच्छासत्वे पर्वतो वह्निमानिति सिद्धसत्वे पर्वतो वह्निमानित्यनुमित्युत्पत्तेः पर्वतो वह्निमानिति सिद्धिसत्वेपि तदिच्छाबलात्तादृशानुमित्यापत्तिरत उक्तं सिद्धिसत्व इति. इदं चोत्तेजकेच्छाव्यक्तेः परिचायकरूपमुत्तेजकत्वं तु तद्व्यक्तित्वेनैवेति बोध्यं. तेन. तत्तदिच्छायामुत्तेजकत्वेन यत्किंचिज्ज्ञानमित्यस्य एतदुत्तरकालीनमित्यादि. यत्किंचिज्ज्ञानस्य सर्वदा सत्वेन तद्रूपेणेच्छाविरहात्. नानुमितिरिति. नानुमित्यापत्तिरित्यर्थः तदिच्छायास्तद्व्यक्तित्वेनोत्तेजकत्वानभ्युपगमादिति भावः. नच यत्किंचिज्ज्ञानं जायतामि

ता४

दि०क० सेतादृशेच्छाकालेसिद्धिकालेप्यनुमितिर्भवत्येवेतिवाच्यं·अनुमितिसामग्रीसत्त्वेआत्मादिविषयक
यत्किंचिन्मानसादिसामग्रीसत्त्वेनियमेनयत्किंचिन्मानसाद्युत्पत्त्यैव वैतादृशेच्छाविषयसिद्धेस्तत्रानु
मित्युत्पत्तौविष्टापत्त्यसंभवात्.नचानुमितित्वप्रकारेच्छात्वेनानुगतरूपेणैवोत्तेजकत्वंवाच्यं.तावते
वयत्किंचिज्ज्ञानंजायतामितीच्छानारंसंभवान्ननुगतत्वघटितत्वेनोत्तेजकत्वेकल्प्यंगौरवादित्यतआह·
वह्निव्याप्येति.प्रत्यक्षातिरिक्तंज्ञानमित्यस्याशाब्दसामग्र्यसत्त्वेइत्यादिशाब्दसामग्रीसत्त्वेशाब्दबोधेनै
वेच्छाविषयसंभवात्.भवत्येवेत्यनुमितिरित्यनेनसंबध्यते.तथाचानुमितित्वप्रकारेच्छात्वेनोत्ते 136
जकत्वेतत्रानुमितिर्नस्यादितिभावः.तल्लिंगकत्वप्रवेशस्यफलमाह·एवमित्यादिना.नानुमितिरिति·
इच्छायास्तत्त्वघटितत्वेनोत्तेजकतयातदिच्छाव्यतेरनुत्तेजकत्वादितिभावः.इदंतुबोध्यं.पर्वतेवह्न्यनुमि
मितिर्जायतामित्याद्यनुगतेच्छानांपर्वतत्वावच्छिन्नोद्देश्यकत्वप्रकारतानिरूपितवह्निविधेयकत्वप्र
काशात्यानुमितिगोचरेच्छात्वेनानुगतरूपेणैवोत्तेजकत्वं.प्रत्यक्षातिरिक्तंज्ञानंजायतामित्याद्यन ॥२८॥
रता।

नुगतेच्छानां तु तत्तद्व्यक्तित्वेन न तु सकलेच्छानां तत्तद्व्यक्तित्वेन गौरवादिति सिषाधयिषाकाले पर्वतो व
ह्निमानिति सिद्धिसत्त्वेपि पर्वतो वह्निमानित्यनुमित्युत्पत्ते स्तादृशसिद्धेर्न तादृशानुमितिप्रतिबं
धकत्वं स्यादत उक्तं सिषाधयिषाविरहकाल इति विशिष्यावक्तव्येति. पर्वतो वह्निमानित्याद्यनुमितौ
पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितावह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन प्रतिबंधिकावच्छे
द्येत्यर्थः तत्प्रयोजनमाह तेनेति. सिद्धिरित्येवकारेण सामानाधिकरण्येन सिद्धिव्यवच्छेदः सामाना
धिकरण्येनानुमितिं प्रतिबध्नातीति. सामानाधिकरण्यमात्रेणानुमितिं प्रतिबध्नातीत्यर्थः अन्यथावच्छेदका
वच्छेदकेनानुमितेरपि सामानाधिकरण्यावगाहितया तद्व्यवच्छेदाप्रतीतेः सिद्धिमात्रमिति. पक्षे वि
शेष्यकसाध्यप्रकारकं निश्चयत्वेन विरोधित्वमित्यर्थः उपाध्यायास्तु सिषाधयिषाविरहविशिष्टस्य सि
द्धिप्रत्यक्षसामग्र्योरन्यतरस्याभावः पक्षता तेन सिद्धिकाले समानविषयकप्रत्यक्षसामग्रीकालेपि।
चानुमित्यापत्तिरित्याहुः तद्दूषयितुं प्रत्यक्षसामग्र्यभावस्य पक्षताकुक्ष्यप्रवेशे प्रत्यक्षसामग्रीकाले

दि०क०। कथं नानुमितिरित्युक्तेः शिष्यजिज्ञासानुत्पादार्थं प्रथमतः स्वसिद्धान्तमाह. इदन्तु बोध्यमित्यादिना सं-
शयोत्तरप्रत्यक्षं प्रति हेतुभूतस्य विशेषदर्शनस्य सत्त्वादिति भावः. एतादृशप्रत्यक्षे सामग्रीविशेष-
पर्य्यन्तानुधावनं च. तद्विषये ऽनुमितिसामग्रीसंपत्तिप्रदर्शनार्थं स्वातन्त्र्येणानुमितिसामग्रीप्रदर्श-
णप्रयासापत्तेः स्वातन्त्र्येणेति. ननु पक्षतां कुक्षिप्रविष्टत्वेनेत्यर्थः। शाब्दसिद्धौ सत्यामशाब्दं ज्ञानं जाय-
तामितीच्छायामनुमितेरुत्पादात् सिद्धावनुमितिगोचरेच्छात्वेन तादृशेच्छाकाले प्रत्यक्षसामग्रीकाले
ऽनुमित्यनुत्पादेन सामग्र्या अनुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वस्यावश्यकतया एकरूपेणोत्ते- 137
जकत्वासंभवात्. एवमनुमेयत्रे ऽसिषाधयिषाविरहस्य नैकसंबंधेन विशेषणत्वं. सिद्धौ समवायघटि-
तसामानाधिकरण्येन चक्षुःसंयोगादिरूपसामग्र्यां तु स्वाश्रयचक्षुःसंयुक्तमनःप्रतियोगिकविज्ञा-
नीयसंयोगघटितसामानाधिकरण्येनेत्येकरूपेण तयोः प्रतिबंधकत्वासंभवादित्याशय इति दिक्. न ॥१२॥
नु. अनुमितिं प्रति प्रत्यक्षसामग्र्याः स्वातन्त्र्येण प्रतिबंधकत्वे भिन्नेविषयेपि प्रत्यक्षसामग्रीकालेनु-

मित्यनुपपत्तिः नन्वेवमनुमानानिरूक्तसाध्यसाधकमानत्वेन पक्षतानाक्रान्तौ तस्याः प्रवेशो नोक्ताप
त्यनवकाशादत आह· एवमिति· अनुमितिसामग्रीप्रतिबंधकेति· तथा च भिन्नविषयकानुमितिसं
मग्र्याभावघटितप्रत्यक्षसामग्र्यास्तत्राभावान्न पूर्वोक्तस्थलेनुमित्यनुपपत्तिरिति भावः· यद्वा अनु
मितिसामग्रीप्रतिबंधिका· अनुमितिसामग्र्येव प्रतिबंधिका·नुनुमित्रेविषये प्रत्यक्षसामग्र्यनुमि
तौ प्रतिबंधिकेत्यर्थः· तथा च प्रत्यक्षसामग्र्याः समानविषयकानुमितिं प्रत्येव प्रतिबंधकतया न
पूर्वोक्तानुमित्यनुपपत्तिरिति भावः॥ ॥श्रीः॥ हेत्वाभासानिति· विजयलक्षणैककार्यकारित्वमत्र
संगतिर्व्याख्यानन्तु लक्षणैकसाधारणधर्मज्ञानं विना विशेषजिज्ञासानुदयाद्विभागो निष्प्रयोजंकान
दित्यतो लक्षणमाह· तल्लक्षणं त्विति· हेत्वाभासलक्षणं त्वित्यर्थः· लक्ष्ये लक्षणं ग्राहयति· तथाहीति तेन
व्यभिचारादयः ननु यद्विषयकत्वेनेत्यत्र तृतीयार्थोवच्छेदकत्वं· तथा च वह्निमान्धूमादित्यत्र वह्न्यभा
वे·ति व्याप्तिः पर्वतविशेष्यकवह्न्यभावप्रकारकनिर्णयत्वेन वह्न्यनुमितिप्रतिप्रतिबंधकत्वे वह्न्य

दि०क० भाववविषयकत्वस्य प्रतिबंधकतावच्छेदककोटिप्रविष्टत्वात्. न च स्वरूपसंबंधरूपावच्छेदकतापर्याप्त्यधि-
करणत्वं. अनतिरिक्तवृत्तित्वं वावच्छेदकत्वं तृतीयार्थः वह्न्यभावविषयकत्वस्यावच्छेदककोटिप्रविष्ट-
त्वेप्यवच्छेदकतापर्याप्त्यधिकरणत्वादतिरिक्तवृत्तित्वाच्च नातिव्याप्तिरिति वाच्यं: पर्याप्तिनिवेशसंभ-
वापत्तेः अप्रामाण्यज्ञानानास्कंदितत्वस्याधिकरणस्य प्रतिबंधकतावच्छेदककोटिप्रविष्टत्वात्. अन-
तिरिक्तवृत्तित्वरूपावच्छेदकत्वे निवेशे ह्रदो वह्निमान्धूमादित्यादौ वह्न्यभावविशिष्टह्रदादावव्याप्ता-
पत्तेः प्रतिबंधकताभाववति ह्रदे इत्येतादृशज्ञाने वह्न्यभावविशिष्टह्रदविषयकत्वस्य सत्त्वात्. विशि- 138
ष्टह्रदस्य ह्रदानतिरिक्तत्वादित्यत आह. यद्विषयकत्वं चेति. एतद्वक्षणप्रयोजनमाह. तेनेति. बाध-
भ्रमसाधारणस्य पर्वतविशेष्यकवह्निप्रकारकत्वादेरित्यर्थः अनुमितिविरोधित्वेपि. अनुमितिवि-
रोधितावच्छेदकत्वेपि न क्षतिः न वह्न्यभावादावतिव्याप्तिः इतरथा तु वह्न्यभावविषयकत्वस्य प- ॥१००॥
र्वतविशेष्यकवह्न्यभावप्रकारकत्वरूपानुमितिप्रतिबंधकतावच्छेदककोटिप्रविष्टत्वात्तत्रातिव्या

प्तिः स्यादिति भावः यादृशविशिष्टेति विवक्षितेतु न तत्र नातिव्याप्तिरित्याह नत्रेत्यादिना न च वह्न्यभाव
विशिष्टपर्वतस्याप्रसिद्धत्वेपि यादृशविशिष्टपदेन वह्न्यभाववत्वविशिष्टं वह्न्यभावमुपादाय तत्राति
व्याप्तिरिति वाच्यं. यादृशविशिष्टेति विवक्षणेऽनतिरिक्तवृत्तित्वस्यैवावच्छेदकत्वस्य लक्षणे निवे
शनीयतया वह्न्यभावविषयकत्वस्य प्रतिबंधकत्वाभाववति वह्न्यभाव इति ज्ञाने ह्रदेत्वस्तत्रातिर्व्या
प्तेरभावात्. न चैवं पूर्वोक्तरीत्या वह्न्यभावविशिष्टह्रदादावतिव्याप्तिरिति वाच्यं. यादृशविशिष्ट
विषयकत्वेनैतस्य यद्रूपावच्छिन्नविषयकत्वेनेत्यर्थकत्वात्तत्वमित्यस्य च तद्धत्वमित्यर्थकत्वा
त् ~~तत्वमित्यस्य च तद्धर्थमित्यर्थकत्वे~~ ह्रद इति ज्ञाने वह्न्यभावावच्छिन्नविषयकत्वाभावात्. अथा ज्ञान
तिरिक्तवृत्तित्वरूपस्यावच्छेदकत्वस्य विवक्षणे अनुमितिप्रतिबंधकत्वाभाववति ह्रदे वह्न्यभाववत्वेति संश
ये ह्रदो वह्न्यभाववानित्याहार्यनिश्चये प्रामाण्यज्ञानास्कंदिते तादृशनिश्चये च वह्न्यभावविशिष्टह्र
दविशेष्यकत्वस्य सत्वादसंभव इति चेन्न. ज्ञानस्येत्यत्र ज्ञानपदस्यानाहार्याप्रामाण्यज्ञानानास्कं

ना१

दि.क. दितनिश्चयपरतयातादृशनिश्चयानिष्टंयादृशविशिष्टविषयकत्वमनुमितिप्रतिबंधिकता
नतिरिक्तत्वंतन्निष्ठत्वमित्यर्थलाभादितिदिक्.॥ ॥सत्प्रतिपक्षस्यानित्यदोषत्ववादीशंकते.नच
यत्रेति.विशिष्टस्याप्रसिद्धत्वादिति.पाषाणमयत्वेनवह्न्यभावव्याप्यत्वाभावादितिभावः.इष्टाप
त्तेरिति.तथाचसद्धेतूनांप्रतिपक्षमध्येऽपिनदुष्टत्वमितिभावः.अन्यथाप्रतिबंधकीभूतभ्रमविष
यस्यापिदोषत्वे अनित्यदोषत्वापत्तेरिति.पक्षेसाध्याभावभ्रमदशायांसद्धेतावपिदोषत्वापत्तेरि
त्यर्थः.इत्थंचयादृशविशिष्टविषयकत्वेनज्ञानस्यप्रतिबंधकत्वंतादृशविशिष्टस्यदोषत्वेचहेत्वादि 139
कमित्यादिनासाध्याभावविशिष्टपक्षपरिग्रहः.यादृशविशिष्टपदेनव्यभिचारत्वादिविशिष्टंव्यभि
दि.क.३ चारादिकमादायलक्षणेनसंभवति.व्यभिचारविषयकत्वस्यप्रतिबंधकताशून्येव्यभिचारइतिज्ञानेवृत्ति
त्वेनातिरिक्तवृत्तित्वात्.किंतुव्यभिचारादिविशिष्टहेत्वादिकमादायैवेतिव्यभिचारादिविशिष्टहे
त्वादिकमेवदोषइतिभावः.ननुव्यभिचारादिविशिष्टहेतोर्दोषत्वेतद्वत्त्वस्यहेतावभावाद्धेतोर्दुष्टत्वव्य ॥१०२॥

३२

वहारो न स्यात्. न च तादात्म्येन तद्वत्त्वं विवक्षणीयमिति वाच्यं. तथा सति वह्न्यभावविशिष्टह्रदादेस्तादा
त्म्येन धूमेऽभावेन ह्रदपक्षके धूमस्यादुष्टत्वं न स्यादित्यत आह. तद्वत्त्वं चेति. न च तद्व्यभिचारविशिष्ट
ह्रदत्वादेर्धूमेपि सत्त्वादतिव्याप्तिरिति वाच्यं. यादृशविशिष्टविषयकज्ञानत्वेन यद्धेतुकानुमितिप्रति
बंधकत्वं तादृशविशिष्टाश्रयतद्धेतुत्वस्यैव दुष्टत्वादिति. सत्प्रतिपक्षादेरनित्यदोषत्ववादिनां मतमाह.
परे त्विति. ननु वह्न्यभावादिव्याप्तेर्यस्य ह्रदे नोपादातुं शक्यत्वेपि तस्याः धूमावृत्तितया न धूमस्यादुष्टत्वं स्याद
त आह. तद्वत्त्वं चेति. ज्ञानेति. एकज्ञानविषयत्वेन तद्वत्त्वमित्यर्थः. तद्वत्त्वस्य. साध्याभाववत्त्वस्य तत्र बाधका
लीने धूमादिसद्धेतावित्यर्थः. अत्र प्रतिपरामर्शकालीने धूमादिसद्धेतौ न तत्कल्पनात्. ज्ञानस्य संबंधत्वक
ल्पनात्. ननु सद्धेतावपि बाधित इति व्यवहारेण संबंधत्वकल्पना ज्ञानस्याविशिष्टेत्यत आह. तत्रेति
बाधभ्रमकालीने सद्धेतावित्यर्थः. प्रत्युत येन बाधितः पुरुषस्तु भ्रान्त इत्येव व्यवहारादिति भावः. तादृश
व्यवहाराव्यवहारयोः स्वानुभवमात्रलक्षितत्वमाहुरित्यस्वरसबीजं यथाश्रुतविरोधित्वत्यागे बीजमाह.
तेनेत्यादिना. ननु तद्धेतुकतत्साध्यकानुमितिप्रतितद्धेतौ न तत्साध्यव्यभिचारस्याहार्याभावो हेतुर्वाच्यस्तत्राह.

कारण५

टि०क० तदभावेति. तथाहि: नाव्याप्तिः ननु अत्र लक्षणे अवच्छेदकत्वेन स्वरूपसंबंधविशेषः पूर्वोक्तदोषा
दिसमनतिरिक्तवृत्तित्वमेव निवेशनीयं. तथा च धूमवान्वह्नेरित्यादौ प्रमेयत्वविशिष्टव्यभिचा
रेऽपि व्याप्तिस्तद्विषयकत्वस्य प्रतिबंधकतानतिरिक्तवृत्तित्वात् तत्राह. संक्षेपइति प्रकृता
नुमितिप्रतिबंधकतावच्छेदकीभूतो यो व्यभिचारस्तद्घटित एवेति न तत्रातिप्रसंग इतिदिक्.
नन्वत्रानुमितित्वेनानन्यतरप्रतिबंधकत्वमन्यतरनिष्ठप्रतिबध्यतानिरूपकत्वघटितं य
दि तदा पर्वतो वह्निमान्धूमादित्यादौ वह्न्यभावविशिष्टह्रदस्यापि न दोषताप्रसंगः तस्य पर्वतो 140
वह्निमान्ह्रदो वह्निमानिति समूहालंबनात्मकप्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपितप्र
तिबंधकत्वावच्छेदकत्वात्. यदि च तादृशान्यतरत्वावच्छिन्नप्रतिबध्यतानिरूपितत्वघटितं तादृ
तादृशान्यतरत्वस्य कस्यचित्प्रतिबध्यतानवच्छेदकतयासंभवः तादृशान्यतरत्वव्यापकप्र
तिबध्यताविशेषे च व्यभिचारादौ बाधादौ चाव्याप्तिः व्यभिचारादेरनुमित्यविरोधितया बाधादे ॥१०२॥
नि

श्च व्याप्तिज्ञानाविरोधितया न प्रतिवध्यतायास्तथाविधान्यतरत्वाव्यापकत्वात्. किं च तद्धर्मावच्छिन्न
पक्षकतद्धर्मावच्छिन्नसाध्यकतद्धर्मावच्छिन्नहेतुकानुमितितत्कारणज्ञानान्यतरविरोधित्वं लक्षणे
निवेशनीयमन्यथा पर्वतो वह्निमान् धूमादित्यादौ पर्वतादेः काञ्चनमयत्वाभावो हेत्वाभासः स्यात्. ए
वं च निर्वह्निः पर्वतो वह्निमान् निर्वह्निर्वह्निमानित्यादौ न कापि हेत्वाभासः स्यात् तादृशानुमितेरप्रसिद्धेर
त आह. यादृशसाध्येति. संभवेति. वायुर्गंधवान् स्नेहादित्यादौ सर्वहेत्वाभाससंभव इति भावः. हेत्वा
भासलक्षणमुक्तामूले वक्ष्यमाणेषु अनैकान्तिकत्वादिलक्षणेषु क्वचित् क्वचिद्दोषं हृदि निधाय स्वयम
नैकान्तिकादीनां लक्षणान्याह. एवमिति. साधारणादीत्यादिना ऽसाधारणानुपसंहारिणोः परिग्रहः
न चैतस्यानुमितितत्कारणज्ञानान्यतरविरोधिज्ञानविषयत्वाभावात्कथं हेत्वाभासत्वमित्यतो दूषकतावी
जमाह. तेन चेति. एवमन्येपि. क्रियतइति. व्याप्तिघटकाव्यभिचारांशे व्यभिचारज्ञानस्य प्रतिबंधकत्वा
दिति भावः. प्रतिवध्यतइति. व्याप्तिघटकीभूतसामानाधिकरण्यग्रहः प्रतिवध्यत इत्यर्थः. एवं च साधा

दि
५

दि०का० रणासाधारणानुपसंहारिणां व्याप्तिज्ञानप्रतिबंधरूपदूषकतावीजैक्येनैकहेत्वाभासत्वमुपपद्यते.
साधारणेनाव्यभिचारग्रहस्यासाधारणेन सामानाधिकरण्यग्रहस्यानुपसंहारिणा च व्यतिरेक
व्याप्तिग्रहस्य प्रतिबंधादिति भावः प्राचीनमतमाह 'अन्येत्विति पक्षे साध्यसंदेहदशायामेवासाधार
णस्य हेत्वाभासता न तु निश्चयदशायां तदा पक्षस्यैव सपक्षत्वेन निश्चितसाध्यवत्त्वाद्धेत्वाभावा
दित्यनित्यदोषत्वं तस्येत्याह इत्यंतेनेति. असाधारण्यघटकसपक्षत्वस्य निश्चयघटितत्वेनेत्यर्थः
तत्र. निश्चितसाध्यवत्त्वोह्वेति पक्षे साधारणादित्रयाणामेकहेत्वाभासत्वानुपपत्तिरिदंतीत्यनेनास्व 141
रसः सूचितः व्यतिरेकव्याप्तिग्रहप्रतिबंधइति. केवलान्वयिसाध्यके चान्वयव्याप्तिज्ञानादेवानुमि
तिरिति भावः नन्वेवं साध्याभावसाधकत्वात्सत्प्रतिपक्षाद्विरुद्धस्याभेदो न स्यादत आह. सत्प्रतिपक्षेत्वि।
ति. प्रतिहेतुः प्रतिकूलो द्वितीयो हेतुः इति विशेषः इत्यनयोर्भेदः ननु दूषकतावीजैक्यपि हेतुभेदात्सत्प्र ॥१२॥
तिपक्षो हेत्वैक्ये विरुद्धरूपं हेत्वाभासान्तरमित्युच्यते. तदा यत्रान्वयिना हेत्वन्तरेण प्रतिरोधस्तत्रस

क्ती प्या

त्प्रतिपक्षो यत्रानुव्यतिरेकिणा तत्र हेत्वाभासान्तरं स्यादतो भेदकान्तरमाह। साध्याभावेति। वस्तुगत्या साध्या-
भावसाधके हेतावेवनवसाध्यसाधकत्वभ्रम इति स्थापनावादिनं प्रतिभ्रमरूपाशक्तिकस्य चकत्वे विरुद्धस्य
नत्वेवं सत्प्रतिपक्षस्येति भावः। साध्याभावव्याप्येति। एवं साध्यवदन्यत्वव्याप्यवान्पक्षः पक्षनिष्ठो साध्या-
भावसाध्यवदन्यत्वव्याप्यावपि बोध्यौ। अन्यतमत्वादिना अनुगमात्न विभागव्याघातः। सत्प्रतिपक्षव्य-
वहारोपयिकमन्येषां सत्प्रतिपक्षलक्षणमाह। अगृहीतेति। नित्यत्वव्याप्यशब्दत्ववत्ताज्ञानशून्यकाली-
नानित्यत्वव्याप्यकृतकत्वपरामर्शसत्त्वेपि सत्प्रतिपक्षव्यवहाराभावात्कालीनान्तमुपस्थितिविशेषणं।
गृहीताप्रामाण्यकनित्यत्वव्याप्यवत्ताज्ञानशून्यकालीनानित्यत्वव्याप्यकृतकत्वपरामर्शसत्त्वेपि तद्व्यवहा-
राभावादगृहीताप्रामाण्यकेति प्रथमोपस्थितिविशेषणं। तादृशकालीनानित्यत्वव्याप्यवत्तापरामर्शस-
त्त्वेपि तत्राप्रामाण्यग्रहकालेन तथा व्यवहाराभावादगृहीताप्रामाण्यकत्वं द्वितीयोपस्थितिविशेषणं। व्यव-
हारमात्रोपयोगिनो निरुक्तरूपस्य प्रकृतानुपयोगः उपस्थितिघटितस्योक्तरूपस्य स्वरूपमत एवोपयुक्त

दि०क० स्वाभासतायामप्रयोजकत्वादित्यस्वरसं सूचयन्नाह इति. सत्प्रतिपक्षस्य दूषकताबीजं प्रदर्शय-
ति. अत्रेत्यादिना. सत्प्रतिपक्षस्य संशयरूपे जनकत्वं दूषकताबीजं नत्वनुमितिप्रतिबंधकत्वं तद-
भाववद्व्याप्यवत्ताज्ञानस्यानुमितिप्रतिबंधकत्वे मानाभावादिति रत्नकोशकारमतं दूषयितुमुपन्यस्य-
ति. अत्र केचिदित्यादिना. अनुमितिर्भवत्येवेति. अनुमितिं प्रति तदभाववद्व्याप्यवत्ताज्ञानस्य प्रतिबंध-
कत्वे मानाभाववक्तृतत्तदभावानुमितिसामग्र्यामेव तत्तदभावकोटिकसंशयानुमित्युपपत्तेः।
संशयानुमितिं प्रत्युभयव्याप्यवत्तानिश्चयत्वेनातिरिक्तहेतुताकल्पने प्रयुक्तगौरवाभावाच्चेति भा- 142
वः. ननूभयभासकसत्त्वे उभयभानं तदापि पित्तादिदोषसत्त्वेपि पीतत्वशुक्लत्वोभयस्मृतावुभयो-
र्भानापत्तिरित्यत आह. फलबलेनचेति. तथा च. तत्र पीतत्वसाक्षात्कारस्यैवानुभविकतया शुक्ल-
त्वग्रहेपि तद्रूपदोषस्य प्रतिबंधकत्वं कल्पयित्वा पीतसाक्षात्कारसामग्र्या अधिकबलत्वमेवं दू-
रत्वदोषे सत्यपि स्थाणुत्वपुरुषत्वयोः स्मृतौ संशयस्यैवोदयात्तत्सामग्र्याः समबलत्वमेव कल्प्यत ॥१०४॥

इति भावः ज्ञानमात्रे तादृशज्ञानत्वावच्छिन्ने विशेषदोषविशेषाजन्यगौरवादिति. कार्यकारणभावद्वयकल्पनेगौरवादिति भावः कथमनुमितिरिति. अनुमितेरपि तत्प्रतिवध्यतावच्छेदकाक्रान्तत्वादिति भावः कथं नह्युभयव्याप्यवत्तानिश्चयात्प्रात्यक्षिकः संशय इत्याशंक्यानभवत्येव तावद्यावत्तन्निश्चयेऽस्य प्रामाण्यं न गृह्यत इत्याह. यत्रचेति. आश्रयासिद्ध्यादीत्यादिना स्वरूपासिद्धिव्याप्यत्वासिद्ध्योः परिग्रहः साध्याप्रसिद्ध्यादीनामाधिक्यं निराकरोति. साध्याप्रसिद्ध्यादय इति. आदिना साधनाप्रसिद्धिपरिग्रहः केषांचिन्मतमाह. एवं वह्निमानित्यादिना. वदन्तीत्यनेनास्वरसस्तद्बीजं तु नीलधूमे व्याप्तिसत्त्वात्कथं व्याप्यत्वासिद्धिः नचैतत्र व्याप्तिसत्त्वेपि नीलधूमत्वस्यानवच्छेदकतया तदवच्छेदेन व्याप्यत्वासिद्धिरेवेति वाच्यं. अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य नीलधूमत्वेपि सत्त्वात्. स्वरूपसंबंधरूपावच्छेदकत्वाभावाद्व्याप्यत्वासिद्धिरेवेति वाच्यं तथापि न. तथासति पशुमान्सास्नादिमत इत्यादावपि व्याप्यत्वासिद्ध्यापत्तेः सास्नाद्यपेक्षया गोत्वादिजातेर्लघुत्वेन सास्नादेः स्वरूपसंबंधरूपावच्छेदकत्वाभावात्. अस्तु वानी

८९-९० लेधूमत्वादेः स्वरूपसंबंधरूपावच्छेदकत्वाभें तदवच्छेदेन व्याप्यभावरूपव्याप्यत्वासिद्धेर्न तु तस्याः
हेत्वाभासत्वं अनुमितिकारणीभूतव्याप्तिज्ञानाविरोधित्वात् । न च वह्निमद्व्याप्तिप्रमेयवानिति
प्रमेयत्वसामान्येनाधिकरणे न व्याप्त्यंशग्राहिज्ञानादनुमित्यापत्तिवारणाय हेतुतावच्छेदकावच्छे-
दे न व्याप्तिज्ञानस्यैव कारणतया तद्विरोधितयानिःपि तत्र स्वरूपसंबंधरूपावच्छेदकत्वाभावाग्रह-
स्य ग्राह्याभावावगाहितया विरोधित्वात् । तस्माद्व्यर्थविशेषणस्थले न व्याप्यत्वासिद्धिर्हेत्वाभा-
सः पुरुषस्त्वधिकेन निगृह्यत इति प्रामाण्यज्ञानानास्कंदिततद्धर्मिकतदभावनिश्चयः ॥ बाधबुद्ध्यु-
त्तरक्षणे लौकिकसन्निकर्षजन्यविशिष्टबुद्धेरानुभाविकत्वादतः लौकिकसन्निकर्षजन्येति नन्वेवं
तदिंद्रियजन्यलौकिकबाधनिश्चयोत्तरं तदिंद्रियजन्यलौकिकविशिष्टबुद्ध्यापत्तिरिति चेन्न । अलौ-
किकत्वं प्रतिबध्यतावच्छेदककोटाव[illegible]निवेश्य तदिंद्रियजन्यतद्विशिष्टबुद्धौ तदिंद्रियजन्यलौकि-
कतदभावनिश्चयत्वेन प्रतिबंधकत्वोपगमात् । तदिंद्रियजन्योपनीतभानात्मकबाधनिश्चयो ॥१०५॥ 143

रुक्ते व्याप्यत्वासिद्धिर्हेत्वाभास इति वाच्यं । तावताप्यनतिरिक्तवृत्तित्वरूपावच्छे[illegible]ज्ञानस्य कारणत्वे ७

साध्याभाववादिरित्यादिना साध्यवदन्यत्वस्य पक्षावृत्तिसाध्यादेश्च परिग्रहः तद्धर्मिकतदभावनिश्चयः अनाहार्य ५

शि२

तैरं तदिंद्रियजन्यलौकिकतद्विशिष्टबुद्ध्युदयात्प्रतिबंधकतावच्छेदककोटौ लौकिकत्वस्य निवेशः
न चैलौकिकतदिंद्रियजन्याभावप्रमास्थले तदधिकरणे प्रतियोगिनोसत्वादेव न तद्विष्टधीलौकि
कप्रत्यक्षापत्तिरित्यलं. तथाविधप्रतिबध्यप्रतिबंधकभावनेति वाच्यं. यत्र प्रतियोग्यधिकरण
एवसन्निकृष्टाधिकरणांतरवृत्तेरभावस्य लौकिकप्रत्यक्षात्मकारोपो दोषेन जनितस्तदुत्तरं तद
धिकरणे प्रतियोगिनो लौकिकप्रत्यक्षापादनात्. तत्राभावलौकिकप्रत्यक्षजनकदोषस्य प्रतिबंध
कत्वादेव नेयमापत्तिरन्यथाभावारोपोत्पत्तिक्षणे प्रतियोगिप्रत्यक्षापत्तिरिति नुन. यत्र विनश्यद
वस्थदोषेणाभावलौकिकप्रत्यक्षात्मकारोपस्तदुत्तरं प्रतियोगिप्रत्यक्षापादनात्. तत्राभावलौकि
कतदधिकरणकप्रमासमकालं तद्वितीयक्षणे वा प्रतियोगिप्रकारकानुभूयमानारोपजनकदो
षसमवधानेन तत्राभावप्रमोत्तरं प्रतियोगिनो लौकिकप्रत्यक्षात्मकरोपापादनवारणाय वा इंद्रियभे
दे तथाविधप्रतिबध्यप्रतिबंधकभावोपगमात्. शंखो न पीतवेशानोरगरइति निश्चयेपि पित्तदोषव

मंडूकवसांजनादि।

अयमुरगा दोष वार। स्वा

दि०को० शान्ते शंखः पीतः इत्यारोपोदयान्न व्यभिचारंणा[illegible]ह. दोषविशेषेति. दोषसामान्याजन्यत्वनिवेशे भ्रममात्र
स्यैव बाधाप्रतिबध्यत्वापत्तिरतो विशेषेति. तथा च पित्तमंडूकवसांजनादिदोषाविशेष्यापादायतदज
न्यत्वं प्रतिबध्यतावच्छेदककोटौ निवेशनीयमिति भावः न च पित्तद्रव्यात्मकदोषाजन्यत्वनिवेशो व्य
र्थः शंखः पीत इति भ्रमे शंखांशेनुभूयमानस्यैव पित्तद्रव्यापीतिम्न आरोपोपगमेन तद्देशे लौकिकत्वाद
लौकिकत्वस्य प्रतिबध्यतावच्छेदके निवेशादेव तत्र व्यभिचारवारणादिति वाच्यं. पित्तद्रव्यस्यात्तरान
वस्थानदशायामपि तत्पीतिम्नः शंखादौ प्रसक्तोदयेन स्मर्यमाणारोपस्यैव तत्र नवीनैः स्वीकारात्तद्देशे
तस्यालौकिकत्वात्. तथा सति शंखः पीत इति प्रत्यक्षोत्तरं पीतं साक्षात्करोमि साक्षात्कारित्वग्रहानुपप
त्तिस्तत्र जनकलौकिकविषयताया अभावादिति तु न. लौकिकविषयताया इव दोषविशेषजन्यत्वस्या
पि साक्षात्कारित्वव्यंजकत्वादन्यथाऽयमुरग इति स्मर्यमाणारोपे साक्षात्कारित्वग्रहानुपपत्तेः शंखेतन ।।१०६।।
पीतरिस्यादितदिंद्रियजन्याबाधवृत्त्युत्तरं पित्तादिदोषवशात्तदिंद्रियजन्यः शंखः पीत इत्यारोपो यद्यनुभव

सउक्तदापूर्वोन्नेन्द्रियभेदभिन्नप्रतिबध्यप्रतिबंधकभावेपि दोषविशेषाजन्यत्वं प्रतिबध्यतावच्छेदके निवेशनीयो न्ति ध्येयाननु बाधप्रतिबध्यतावछेदककोटौ लौकिकान्यत्वस्य निवेशे बाधनिश्चयोत्तरं लौकिकसंनिकर्षजन्यसंशयापत्तिरिति चेन्न. मूलेसंघटवदित्याद्याकार. लौकिकप्रत्यक्षोत्पत्तिकाले स्वातंत्र्येण कथंचिदुपस्थितस्य गुणभावादेर्भूतले प्रकारतया भानवारणाय समानधर्मितावच्छेदकतत्कोटिलौकिकप्रत्यक्षसामग्र्या विपरीतकोटिभानप्रतिबंधकत्वमवश्यमंगीकरणीयं. तथाच बाधनिश्चयोत्तरमपि नापत्तिर्लौकिकसन्निकर्षजन्यसंशयस्य तत्कोटिलौकिकप्रत्यक्षसामग्र्याः प्रतिबंधिकायाः सत्वेन विपरीतकोटिभानासंभवान्नहि क्वापि लौकिकसन्निकर्षजन्यसंशयोनस्यादिति चेदेमु ज्ञानप्रत्यासत्त्यैव पूर्वोपस्थितकोट्यो भानसंभवादिति. ननु संशयपूर्वं तत्कोट्यंशे लौकिकसन्निकर्षसत्वे कथं संशयस्य न लौकिकत्वं कथवा न तत्र संशये विपरीतकोटिभानं. तत्कोटिलौकिकप्रत्यक्षसामग्र्याः प्रतिबंधिकायास्तत्र सत्वादिति. तन्न. न च लौकिकसन्निकर्षसत्वेपि संशयजनकदूरत्वादिदोषस्य लौकिकप्रत्यक्षप्रतिबंधकस्य सत्वेन तौ

तेः लौकिकसन्निकर्षस्यान्यकोटिभानप्रतिबंधकतायानन्यांशे लौकिकसन्निकर्षस्योत्तेजकत्वे तु लौकिकसन्निकर्षजन्यसंशयस्यापि कोटिद्वयसन्निकर्षकाले संभवादङ्गीकारार्थकमोमित्युक्तेः ४

[illegible]।

किंचस्वपक्षसाधनस्याभावादुभयोपपत्तेरित्यत्रं विस्तरं कस्यचिन्मतं दूषयति· नचेति· इतियुक्तमित्य-
दिनक० नेनान्वयः· नन्वेवं बाधनिश्चयकाले संसर्गज्ञानाभावादेवानुमित्यभावोपपत्तौ बाधनिश्चयस्यानुः-
मितिविरोधित्वमिति हेत्वाभासत्वं न स्यादत आह· तद्विरोधितयेति· अनुमितिकारणीभूतसाध्यसं-
सर्गज्ञानविरोधितयेत्यर्थः· नन्वप्रसिद्धसाध्यकानुमितिः कुत्रापि न भवत्येवात आह· साध्यसंशयेति· ननु
संशयशून्यकालेपि सिषाधयिषाकालीनसाध्यनिश्चयात्मकं साध्यसंसर्गज्ञानमस्त्येवेत्यत आह· आदी-
ति· आदिना सिषाधयिषाकालीनपरिग्रहः· नच संशयानन्तरोत्पन्नैवानुमितिरिति वाच्यं· सत्यपि विशेषदर्शने· 145
संशयापेक्षणात्· पक्षविशेष्यकसाध्याभावज्ञानप्रमात्वनिश्चयोऽनुमितिप्रतिबंधकस्तदभावः कारणमेतत्त्
ईशप्रमात्वमेव बाध इति प्राचीनमतं दूषयति· एवमिति· प्रमात्वज्ञानमपि प्रमात्वनिश्चयोपि मानाभावादिति
ग्राह्याभावानवगाहिनस्तादृशज्ञानस्य विरोधित्वे मानाभावादित्यर्थः· ननु पक्षे साध्याभावज्ञानेपि तत्राप्रा-
माण्यज्ञानकालेऽनुमितिर्दृश्यात्र साध्याभावज्ञानं प्रतिबंधकं· अस्मन्मते तु तत्र साध्याभावज्ञानप्रमात्वनिश्च- ॥१०७॥

भाव१

छ२

याश्छन्नादेवानुमित्युत्पत्तिरत आह• गौरवादिति. तथा च तत्रानुमितिनिर्वाहाय संशयनिश्चयसाधारण
ते प्रामाण्यज्ञानाभाव एव प्रतिबंधकतावच्छेदककोटौ निवेश्यते न तु पक्षविशेष्यकसाध्याभावज्ञानप्रमात्वनि
श्चयेन प्रतिबंधकत्वं गौरवादित्यर्थः यत्र पक्षे साध्याभावज्ञानमस्ति न तु तत्र प्रामाण्यज्ञानं न वाप्रामाण्य
ज्ञानं तत्राप्यनुमितिर्भवत्येवेति भावः साध्याभाववत्त्वांशघटितप्रमात्वविषयकत्वेनुमितिप्रतिबंध
कतानतिरिक्तवृत्तित्वसत्त्वात्तस्याभासत्वदुर्वारमिति तु न प्रमेयत्वविशिष्टव्यभिचारादेरिव तादृशावि
शिष्टान्तरघटितत्वेनाभासत्वायोगादिति. ननु गृहीतप्रामाण्यकसाध्याभावनिश्चयस्य प्रतिबंधकत्वे प्र
थमोपस्थितप्रमात्वनिश्चय एव तथा स्यादतोऽन्यथेति सत्प्रतिपक्षादावित्यादिनासिद्ध्यादिपरिग्रहः प्रति
बंधकत्वापत्तेरित्यस्यानुमित्यादावित्यादिः ननु साध्याभावज्ञानप्रमात्वज्ञानेऽनुमितिप्रतिबंधस्तद
भावे तु नेत्यन्वयव्यतिरेकाभ्यां प्रमात्वज्ञानस्यानुमितिप्रतिबंधकत्वमत आह• किंत्विति• ज्ञाविदुपयुज्य
तत्रेति• तथा चानुमितितत्कारणज्ञानान्यतरं प्रति साक्षात्प्रतिबंधकीभूतज्ञानविषयत्वाभावान्नासा

य४ आह४

ध्यो यत्र प्रमात्वं हेत्वाभासइति व्यभिचारज्ञानादेरित्यादिनासिद्धज्ञानपरिग्रहः. भेदादिति तथा
च बाधस्येति सिद्धव्यभिचारान्यतरनियमेपि बाधज्ञानस्य व्यभिचारादिविषयकत्वाभावेन तस्य हे-
त्वाभासान्तरत्वमिति भावः. न चेहेतुमान्पक्षः साध्याभाववानित्याकारक एव बाधग्रहः कुतो न भवति
सामग्रीसत्वात्तथाच व्यभिचारज्ञानात्मिकैव बाधबुद्धिरिति वाच्यं. परामर्शात्मकव्यभिचारज्ञानस्य
प्रतिबंधकत्वेन बाधबुद्धेर्व्यभिचारविषयकत्वासंभवात्. एवत्रैहेतौ व्यभिचाराव्यभिचारविषयकैक
निश्चयासंभवाच्च. न च योगोलकपक्षकधूमसाध्यकवह्निहेतुके बाधलौकिकप्रत्यक्षवद्व्यभिचारलौ-
किकप्रत्यक्षमपि व्याप्तिनिश्चयेसत्यपि भविष्यतीत्यत आह. किंचेति. अकिंचित्कर इति. व्यभिचारज्ञानं
हि अनुमितौ न साक्षात्प्रतिबंधकं किंतु परामर्शप्रतिबंधद्वारा तथाच परामर्शोत्तरकालीनं व्यभिचारज्ञा-
नमकिंचित्करमिति तत्र बाधबुद्धिरेव प्रतिबंधिकेति भावः. व्यभिचाराद्यसंकीर्णमपि बाधं प्रदर्शयति
एवमित्यादिना. बाधस्यैवेति. तत्र पक्षोहेतुमत्वेन स्वरूपासिद्धेः प्रतिं व्यधिकरणसाध्याभाववद् इति तद्रूपस्य

योगा।

व्यभिचारस्य चाभावादिति भावः बाधतद्व्याप्यभिन्ना ये हेत्वाभासास्तद्व्याप्या अपि तन्मध्य एवान्तर्भवन्तीति पाठः
बाधः साध्याभावविशिष्टपक्षादिः तद्व्याप्यस्तत्रेति पक्षस्तद्भिन्ना व्यभिचारविरुद्धास्तद्व्याप्यानां तत्रैवान्तर्भाव इ
त्यर्थः व्यभिचारादेरिव व्यभिचारादिव्याप्यस्यापि व्याप्तिग्रहप्रतिबंधकज्ञानविषयत्वेन पंचहेत्वाभासानन्त
र्गतत्वे तस्यातिरिक्तहेत्वाभासत्वं स्यादित्यर्थः न प्रतिबंधक इति. साध्याभाववद्व्याप्यवत्ताज्ञानस्य साध्यवत्ताज्ञा
त्वाद् नविरोधित्वे मानाभावादिति भावः दूषकताबीजस्य भिन्नत्वेनेति. साधारणस्य व्यभिचारज्ञाने विरुद्धस्य सामा
नाधिकरण्यसंग्रहे प्रतिबंधकत्वादिति भावः असाधारण्यघटकं सपक्षत्वं निश्चयगर्भं न तु साध्यवत्त्वमात्रमि
त्याह. सपक्षइति. एवमग्रेपि. सपक्षत्वविपक्षत्वयोर्निश्चयनिवेशस्य फलमाह. शब्दइत्यादिना पूर्वमुक्तमि
ति असाधारणः साध्यासमानाधिकरण इत्यादिनोक्तमित्यर्थः केवलान्वयिपक्षक इति. अत्र पक्षता सा
ध्यसंशयरूपा ग्राह्या तेन सर्वमभिधेयं प्रमेयत्वादौ यदा सिद्धिः सिषाधयिषा च तदा चै साध्यनिश्चयसंभ
वेन तत्समानाधिकरणाघटितव्याप्तिग्रहसंभवात्तस्य सद्धेतोरलक्ष्यतया सिषाधयिषाविरहविशिष्टसिद्ध

भावग्रहात् केवलान्वयित्वेपि तत्रानतिव्याप्तिः अनुपसंहारिणो हेत्वाभासत्वमुपपादयति. सर्वमनि
दि०के० धेयमित्यादिना. सर्वस्यैव पक्षत्वात्सामानाधिकरण्यग्रहस्थलाभावादिति. संशयोत्पत्तिक्षणो निश्च
यवारणाय निश्चये प्रतिसंशयसामग्र्याः प्रतिबंधकत्वस्यावश्यं वाच्यतया प्रकृते सर्वत्र साध्यसंदेहस्थ
ले तत्पूर्वं तत्सामग्र्याः सत्वे न साध्यनिश्चयस्य कुत्राप्यसंभवेन व्यापकसाध्यसामानाधिकरण्यविशिष्ट
धूमत्वादिरूपव्याप्तिग्रहानुत्पादान्नत्रानुमितिरित्यनुपसंहारिणो हेत्वाभासत्वमिति भावः. इतरभावा
दिति. तदानीमपि केवलान्वयिपक्षताकत्वरूपस्यानुपसंहारित्वस्य पक्षेतरभावादित्यर्थः. तथाचेत्तत्रा
नुपसंहारित्वस्य सत्वात्तस्य व्याप्तिज्ञानानुत्पादप्रयोजकत्वाभावाद्धेत्वाभासत्वानुपपत्तिरिति भावः. नच
संशयसामग्र्याः सत्वात्कथं पक्षैकदेशे साध्यनिश्चय इति वाच्यं. सर्वत्वधर्मितावच्छेदकसंशयसामग्री
सत्वेपि घटत्वादिधर्मितावच्छेदकसाध्यनिश्चयोत्पादे बाधकाभावात्. समानप्रकारकत्वेनैव विरोधात्
भिन्नविषयत्वेन प्रतिबंधकत्वेप्याह. अनुवेति. तस्य सहचाराग्रहस्य. तस्य स्वरूपमत एव विरोधि ॥१०२॥

पृथ्वी गंधवतीति सत्वादि स्यादे ४

भावा३

नीलधूमवारणाय व्याप्यतावच्छेदकेति. स्वनीलधूमत्वादि ५

त्वेन नज्ञानस्यानुमित्युत्पादकप्रयोजकत्वाभावादिति भावः नच तत्र सहचाराग्रहप्रयोजकस्संशयए
वहेत्वाभासस्तस्यापि स्वरूपसत एव विरोधित्वात्. नच संशयविषयसाध्याभावविशिष्टपक्षादेरेव तत्रा
भासत्वमिति वाच्यं. सर्वमभिधेयमित्यादावभिधेयत्वाभावविशिष्टपक्षाप्रसिद्धेरित्यन्यत्र विस्तरः तदर्थं
इति. तेन साधारणो नातिव्याप्तिरिति भावः धूमप्रागभावत्वेति. तस्य व्याप्यतावच्छेदकीभूतधूमत्वघटित
त्वेन न तत्संग्रहो न स्यादिति भावः स्वस्य स्वाविषयकप्रतीतिविषयत्वरूपस्वाघटितत्वाभावाऊर्मीनेरेति. नच
नीलधूमत्वस्यापि तादृशधर्मान्तराघटितत्वमस्त्येव धूमत्वस्य नीलधूमत्वभिन्नत्वाभावादिति वाच्यं. स्वावि
षयकप्रतीतिविषयत्वस्य स्वपर्याप्त्यवच्छेदकतानिरूपकप्रकारतानिरूपितावच्छेदकतापर्याप्त्यनधिक
रणत्वपर्यवसितस्य तदर्थत्वात् शुद्धधूमत्वपर्याप्तावच्छेदकताकप्रकारत्वे नीलत्वादिविशिष्टधूम
त्वपर्याप्तावच्छेदकताकप्रकारत्वयोर्भेदात्. नन्वेवं वह्निमदन्यावृत्तित्वस्य वह्निव्याप्यतावच्छेदकत्वा
नुपपत्तिः तस्य वह्नित्वरूपतादृशधर्मान्तरघटितत्वात्. धूमान्यान्यत्वादेर्व्याप्यतावच्छेदकत्वापत्ति
स्वापर्याप्त्यावच्छेदकतानिरूपकप्रकारतानिरूपितावच्छेदकतापर्याप्त्यधिकरणत्वस्य तत्प्रतिपाद्यत्वात्. पर्यवसितेति तदर्थत्वात्. धर्मान्तरार्थस्ये

२४

न्तरस्य १ त्योः २

दि०क० नियाधर्मं विशेष्यविधया घटकत्वविवक्षणस्याशक्यत्वादिति चेन्न. स्वसमानाधिकरणपदेन
स्वव्यापकस्य विवक्षितत्वात्. वह्नित्वस्य वह्निमदन्यावृत्तित्वाव्यापकं धूमत्वस्य धूमान्यान्यत्वव्यापक
त्वाज्ञानेन दोषासंभवात्. स्वव्यापकत्वं च धर्मान्तरस्य स्वघटकसाध्यसंबंधितावच्छेदकत्वेन. आ
न्याया धूमालोकान्यतरत्वस्य वह्निव्याप्यतावच्छेदकत्वापत्तेः धूमत्वालोकत्वयोः प्रत्येकमन्यतर
त्वाव्यापकत्वादिति. विरुद्धयोः परामर्शहेत्वोरित्यत्र विरुद्धयोर्हेत्वोः परामर्श इति भ्रमवारणाया
ह. स्वसाध्येति. स्वसत्प्रतिपक्षत्वेनाभिमतो हेतुस्तत्साध्यस्य विरुद्धो यः साध्याभावस्तदर्थः ननूत्प 148
त्तिकालीनघट इत्यादिमूलोक्तमयुक्तं. तत्र पक्षे घटे गंधस्यात्यन्ताभावादत आह. पक्षतावच्छेदके
ति. कालस्येव देशस्यापि पक्षतावच्छेदकत्वे बाधसंभवात्तदप्रदर्शने न मूलस्य न्यूनतां परिहर्तुमाह.
एवमिति बोध्यमिति. तत्र पक्षे वृक्षे संयोगसत्वेपि पक्षतावच्छेदकमूलावच्छेदेन संयोगाभावादि ॥११०॥
ति भावः॥ ॥इति अनुमानं॥ ॥अवसरसंगतिमभिप्रेत्याह. उमितिमिति. तत्र गवये साहश्य

प १

दर्शनं सादृश्यप्रत्यक्षं.तदुपमितिकरणमिति.नवीनमतेनैतत्.अतिदेशवाक्यार्थशाब्दबोधः करणम
तिदेशवाक्यार्थस्मरणं व्यापारः सादृश्यविशिष्टपिंडदर्शनं सहकारीति.संप्रदायमते तु सहकारि
तयाऽवश्यकसादृश्यविशिष्टपिंडदर्शनस्यैव करणत्वे युक्तमित्युपेक्षितं स्मरणं जायत इति सादृश्यवि
शिष्टपिंडदर्शनस्योद्बोधकविधया तादृशवाक्यार्थस्मारकत्वादिति भावः तदेव व्यापार इति.एतेन सा
दृश्यविशिष्टपिंडदर्शनोत्तरं यत्रातिदेशवाक्यार्थशाब्दबोधस्तत्रातिदेशवाक्यार्थस्मरणापेक्षाभावा
त्रातिदेशवाक्यार्थस्मृतिव्यापारकं सादृश्यविशिष्टपिंडदर्शनं करणं किंतु सादृश्यज्ञानमात्रं करणं.
विशेषणज्ञानविधया तज्जन्यमतिदेशवाक्यार्थज्ञानं सादृश्यविशिष्टपिंडदर्शनं चोभयं व्यापार इति
कस्यचिन्मतं प्रत्युक्तं.यत्र सादृश्यविशिष्टपिंडदर्शनोत्तरमतिदेशवाक्यार्थशाब्दबोधस्तत्रोपमित्य
नभ्युपगमात्किंतु तदुत्तरं पुनस्सादृश्यविशिष्टपिंडदर्शनं ततोऽतिदेशवाक्यार्थस्मरणं तदुत्तरमेवोपमि
तिरिति भावः गवयो गवयपदवाच्य इति ज्ञानं जायत इति.एतेनोपमितिर्न प्रमित्यंतरं किंतु शाब्दबोधः

दि०का०

त्मिन्नेव गोसदृशो गवयपदवाच्य इत्यत्र सदृशपदेनोपस्थितसादृश्यावच्छेदेन गवयपदवाच्यत्वग्रहस्य गो
सदृशो गवयपदवाच्य इत्याकारकस्यैवोपमितित्वस्वरूपत्वादित्याशयः. गवयत्वावच्छेदेन गवयपदवाच्यत्व
विषयिण्या उपमितेर्गवयपदजन्यगवयत्वविशिष्टोपस्थितिं विना शाब्दबोधवदसंभवादिति न च गोस
दृशस्य गवयत्वस्य चाप्रत्यक्षेणोपस्थितौ कथं गवयत्वावच्छेदेनैव गवयपदवाच्यत्वोपमितिर्न तु सादृ
श्यावच्छेदेनेति वाच्यं. उपस्थितत्वेऽपि गवयगोसादृश्यस्य गौरवज्ञानेन तदवच्छेदेन गवयपदवाच्य 149
त्वोपमितेरनुदयात्. गवयपदाज्ञत्वप्रकारकशाब्दबोधानुपपत्तेश्च तत्प्रकारकशाब्दबोधे तदवच्छेदेन श
क्तिग्रहस्य हेतुत्वात्. न च उक्तत्वविशिष्टसादृश्यज्ञानाद्गवयत्वावच्छेदेन गवयपदवाच्यत्वोपमितेरनुदया
त्तद्धर्मविशिष्टसादृश्यज्ञानं तद्धर्मावच्छेदेनोपमितिजनकं वाच्यं. तथा च यदा गवयत्वादिज्ञानस्यानुपस्थिति
स्तदा सादृश्यज्ञानस्य संस्थानादिगुरुधर्मविशिष्टग्रहात्तदवच्छेदेन गवयपदवाच्यत्वोपमित्यापत्तिरि ।।।।।।
ति वाच्यं. उपपत्तेः तस्याः भ्रमत्वेन तादृशगुरुधर्मावच्छेदेन गवयादिपदवाच्यत्वासाधकत्वादिति उदनु

पलक्षणं. वैधर्म्यविशिष्टपिंडदर्शनं करणं जलादिविधर्मगुणवती पृथिवीत्यतिदेशवाक्यार्थस्मृतिर्व्यापारः पृथि
वीत्वावच्छेदेन पृथिवीपदवाच्यत्वोपमितिः फलमित्यपि बोध्यं. ननूपमानस्य प्रमाणान्तरत्वे मानाभावः न च प्रत्य
क्षादिप्रमितिविजातीयप्रमितिकरणत्वात्तस्य प्रमाणान्तरत्वं. उपमितेः प्रत्यक्षादिप्रमितितो विजातीयत्वाभावा
दिति चेत्. चक्षुरादिव्यापारविगमेपि उपमितिरुत्पादे न चाक्षुषादित्वासंभवात्. न वा मानसत्वं मानसान्तरमनु
त्पद्यमानाया उपमिनोमी प्रतीतेर्विषयत्वात्. उपमित्यनंतरं साक्षात्करोमीति प्रतीतेरनुदयेन तत्र प्रत्यक्षत्वसत्त्वे
प्रमाणाभावात्. अन्यथानुमितेरपि मानसत्वापत्तेः नाप्यनुमितिः व्याप्त्यादिज्ञानं विनाप्युदयात्. न शाब्दं पदज्ञाना
जन्यत्वात्. न स्मृतिरननुभूतार्थस्य स्मरणायोगादिति संक्षेपः॥ ॥इत्युपमानं॥ उपजीव्योपजीवकभावसंग
तिमभिप्रेत्याह. मूले पदवाच्य इत्यत्र सदृशपदेनोपस्थितसादृश्यावच्छेदेन गवयपदवाच्यत्वं गोसदृशो गवयप
दवाच्य इत्याकारकस्यैवोपमितिस्वरूपत्वादित्यपास्तं. गवयत्वावच्छेदेन गवपदवाच्यत्वविषयिण्या उपमितेर्गो
वयपदेन गवयत्वविशिष्टोपस्थितिं विना शाब्दबोधकत्वासंभवादिति. न च गोसादृश्यस्य गवयत्वस्य च प्रत्य

वा व६ तो२

दि०के०१ स्तो[illegible]तौ कथं गवयत्वावच्छेदेनैव गवयपदवाच्यत्वोपमितिर्ननु सादृश्यावच्छेदेनेति वाच्यं। उपस्थि-
तेस्तस्यापि गवये गोसादृश्यस्य गौरवज्ञानेन तदवच्छेदेन गवयपदवाच्यत्वोपमितेरनुदयात्। गवपदा-
द्गत्वप्रकारकशाब्दबोधानुपपत्तेश्च। तत्प्रकारकशाब्दबोधे न तदवच्छेदेन शक्तिग्रहस्य हेतुत्वात्तत्
चद्गव्यत्वविशिष्टे सादृश्यज्ञानाद्गवयत्वावच्छेदेन गवयपदवाच्यत्वोपमितिरनुदयात्त। धर्मविशिष्टे
सादृश्यज्ञानं तद्धर्मावच्छेदेनोपमितिजनकं वाच्यं। तथा च यदा गवयत्वादिजात्यनुपस्थितिस्तदा सा-
दृश्यज्ञानस्य संस्थानादिगुरुधर्मविशिष्टे ग्रहात्तदवच्छेदेन गवयपदवाच्यत्वोपमित्यापत्तिरिति वाच्यं। 150
इष्टापत्तेः। तस्मात्क्रमत्वेन तादृशगुरुधर्मावच्छेदेन गवयादिपदवाच्यत्वासाधकत्वादिति। इदमुपलक्ष-
णं वै धर्म्यविशिष्टपिंडदर्शनजत्वादि विधर्मगुणवती पृथिवीत्यतिदेशवाक्यार्थस्मृतिव्यापारः पृथि-
वीत्वावच्छेदेन पृथिवीपदवाच्यत्वोपमितिः फलमित्यपि बोध्यं। नन्वुपमानस्य प्रमाणान्तरत्वे मानाभा- ॥१४॥
वः न च प्रत्यक्षादिप्रमितिविजातीयप्रमितिकरणत्वात्तस्य प्रमाणान्तरत्वं उपमितेः प्रत्यक्षादिप्रमिति

क्तेऽपि विजातीयत्वाभावादिति चेन्न चक्षुरादिव्यापारविगमेऽप्युपमितिरुत्पादेन चाक्षुषादित्वासंभवात्
नवा मानसत्वं मानसोत्तरमनुव्यवसीयमानाया उपमिनोमीति प्रतीतेर्विषयत्वात्. उपमित्युत्तरं साक्षात्करो
मीति प्रतीतेरनुदयेन तत्र प्रत्यक्षत्वे सत्त्वे प्रमाणाभावाच्च. अन्यथानुमितेरपि मानसत्वापत्तेः नाप्यनु
मितिः स्याः व्यादिज्ञानं विनाप्युदयात्. न शाब्दं पदज्ञानजन्यत्वात्. न स्मृतिरननुभूतार्थस्य स्मरणायोगा
दिति संक्षेपः इत्युपमानं॥ उपजीव्योपजीवकभावसंगतिमभिप्रेत्याह मूले पदज्ञानं त्विति. एवकारार्थ
सा मूलस्थ तु शब्दस्य व्यवच्छेद्यं दर्शयति. मुक्तावल्यां ननु ज्ञायमानानीति मौनिश्लोकादावित्यादिना द्वि
त्वादिबोधकविजातीयहस्तचेष्टादेः संग्रहः अन्यथा पदार्थज्ञानमात्रस्य व्यापारत्वे तत्रापि. पदजन्य
पदार्थोपस्थितावपि. घटकर्मत्वे सप्तम्यर्थः अन्यथा वृत्त्येत्यस्यानुपादाने ननु वृत्तिर्यदि शक्तिस्तदा गंगा
पदात्तीरादेर्बोधो न स्यात्. शक्त्या पदजन्यतीरोपस्थितेरभावादत आह. वृत्तिश्चेति. अन्यतरसंबंधः अ
न्यतरात्मकसंबंधः अत्रैव पदजन्यपदार्थोपस्थितावेव. सा चेति. यद्यपि शीघ्ररेखायाऐकास्यदश

दि०१० द्वास्यदेवोद्धव्यरतीश्वरेच्छापदेपीत्यतिप्रसंगः एवंगंगापदजन्यबोधविषयत्वप्रकारकेच्छायास्ती
रेपिसत्वादुक्तैव तीरबोधोपपत्तेर्लक्षणोच्छेदापत्तिस्तथापि गंगादिपदवाच्यत्वव्यवहारस्य तीरादि
दिभिन्नेऽभावाद्गंगादिपदजन्यबोधविषयत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबंधेनेश्वरेच्छै
वगंगादिपदानांशक्तिः तीरादिनिष्ठविशेष्यतायागंगादिपदजन्यबोधविषयत्वप्रकारतानिरूपि
तत्वेपि न तस्यास्तादृशविषयतात्वेन तादृशप्रकारतानिरूपितत्वमपि तु शुद्धविषयतात्वेनेति नातिप्र
संगो न वा लक्षणोच्छेद इति। आधुनिके नाम्नि आधुनिकैः पित्रादिभिरेकादशेऽहनि संकेतिते। नाम्निशक्ती 151
श्वरेच्छायाइति। एकादशाहकालीनपित्रुच्चारणविषयतामत्वेन सामान्यरूपेणेत्यर्थः आधुनिकसंके
तेन। आधुनिकसंकेतितनद्यादिपदे तु संप्रदायमतेऽस्वरसंहृदिनिधाय नवीनमतंप्रदर्शयति। न
व्यास्त्विति। न शक्तिरिति। तथासत्याधुनिकसंकेतितनद्यादिपदाच्छाब्दबोधो न स्यादिति भावः। मतद्व
येप्यपभ्रंशात्मकगंगादिपदे शक्तिभ्रमादेव बोध इत्यवधेयं। व्याकरणादिति। भूतनायां वर्तमाने लडि ॥११३॥

मात्र१ ह४

स्यादिव्याकरणादित्यर्थः लाघवादिति कृतित्वजातेः शक्यतावच्छेदकत्वे लाघवादित्यर्थः न च कर्त्तुरभिधा
नादिति अनभिहिते इत्यधिकारीयेण कर्त्तरि तृतीयेत्यनेनानभिहिते तृतीयाविधानादिति भावः तत्र तृ
तीयायां तन्त्रत्वात्. प्रयोजकत्वात्. ननु कर्तृगतसंख्याभिधानमेव किं प्रयोजकमित्याशंक्य तत्प्रयोजकं
दर्शयति. संख्याभिधानेति. चैत्रः पचति तण्डुलमित्यादौ कर्मत्वादिलाक्षणिकप्रथमान्तपदोपस्थाप्यत्वे
तुल्यादिव्युदासायाह. कर्मत्वाद्यनवरुद्धेति. ननु चैत्र इव मैत्रो गच्छतीत्यत्राख्यातेनैकवचनरूपेणो
क्तायाः संख्यायाश्चैत्रेन्वयः स्यात्. कर्मत्वाद्यनवरुद्धत्वात्प्रथमान्तपदोपस्थाप्यत्वाच्च. किं च पक्वमन्नं भु
ज्यत इत्यादावन्नादौ संख्यान्वयानुपपत्तिः पाककर्मत्वस्यान्नेऽन्वयेन कर्मत्वाद्यनवरुद्धत्वाभावादत आ
मे३ ह. कर्त्वादीत्यस्येति. तथा च कर्मत्वपदमितरपरं अनवरुद्धत्वं च विशेषणतया विवक्षितं. वस्तुतस्तु इतरस्या
पि न विवक्षा अविशेषणत्वे प्रकारताशून्यत्वं तस्य च शाब्दबोधास्पृष्टत्वं चैत्रादावपि सत्त्वाच्चैत्र इव मैत्र इत्या
दौ चैत्रेपि संख्यान्वयापत्तिः न च चैत्रीयसादृश्यमित्यवान्तरवाक्यार्थबोधस्य पूर्वं सत्त्वात्कथमविशेषणत्वं

टि०क० चैत्रस्तोतिवाच्यं यत्र खले कपोतन्यायेन बोधस्तत्र चैत्रीयं सा दृश्यमित्यवान्तरवाक्यार्थबोधस्य पूर्वमभा
वादृते विशेषणत्वेन तात्पर्याविषयत्वापर्यन्तानुधावनं· नच चैत्र एव पचति चैत्रश्चैत्रं पश्यतीत्यादा
वेवकारार्थेअन्यस्मिन्कर्मत्वादौ च चैत्रस्य विशेषणत्वात्कथं तत्र संख्यान्वय इति वाच्यं· विशेषणत्व
मात्रेण तात्पर्याविषयत्वस्य विवक्षितत्वाच्चैत्रस्यात्रस्थले विशेषणत्वमुख्यविशेष्यत्वाभ्यां तात्प
र्यविषयत्वात्तत्र संख्यान्वयोपपत्तिः यदि च चैत्र एव मैत्र इत्यादौ यदा चैत्रादेर्न विशेषणत्व तात्पर्यवि
षयत्वं तदा चैत्रेपि संख्यान्वयापत्तिः न च शाब्दबोधे तात्पर्यज्ञानस्य हेतुत्वान्नैवमिति वाच्यं· तात्प 152
र्यातिरिक्तस्थले शाब्दबोधे तात्पर्यज्ञानस्य हेतुत्वे मानाभावादित्युच्यते· तदा विशेषणत्वं विशेषणत्व
मात्रप्रयोजकप्रथमान्ततत्वपदानुपस्थाप्यत्वमत्र बोध्यं· न विशेषणत्वतात्पर्येण विशेषणत्वमात्र
तात्पर्येण यथा च तंडुलं पचतीत्यादौ यदा विशेषणत्वमुख्यविशेष्यत्वाभ्यां तण्डुलबोधे तात्पर्यं तत्र तंडु
ले संख्यान्वयवारणाय प्रथमान्तेत्यादीति भावः ॥ इदमुपलक्षणं· चैत्रेण सुप्यत इत्यादौ धात्वर्थत्वाप्या। ॥११४॥

विभावनंचधात्वर्थोतिरिक्तमात्राः विशेषणंबोध्यं ४

दौ संख्यान्वयवारणाय प्रथमान्तपदोपस्थाप्यत्वस्यावश्यकत्वात् द्वितीयदलस्य प्रथमान्तरेण प्रयोजनं वक्तुं मन्यथा प्रथमदलार्थमाह - यद्वेति. चैत्रादेर्वारणमिति. तस्य सादृश्ये विशेषणत्वादिति भावः द्वितीयान्तपदोपस्थाप्यत्वादिति. प्रथमान्तपदोपस्थाप्यत्वाभावादित्यर्थः नव्यकल्पे चैत्र एव पचतीत्यादौ चैत्रसंख्यान्वयोपपादनं सुधीभिर्विभावनीयं. इदंत्ववधेयं. संख्यान्वयबोधं प्रतिनस्यान्तेत्यत्र प्रथमान्तपदोपस्थाप्यहेतुत्वे आख्यातेन भावनानवगाहि संख्याकबोधस्य कुत्राप्यजननात् संख्यान्वयबोधत्वव्यापकभावनान्वयबोधत्वावच्छिन्ने हेतुमत्तातादृशप्रथमान्तपदोपस्थाप्यत्वरूपकारणविरहेणैव प्रथमान्तपदानुपस्थाप्य संख्यान्वयापत्त्यसंभवात्. न च. निरुक्तप्रथमान्तपदोपस्थाप्यत्वे जन्यतावच्छेदकं भावनान्वयबोधत्वं संख्यान्वयबोधत्वे वेत्यत्र विनिगमनाविरहः संख्यामविषयीकृत्यापि भावनान्वयबोधस्यानुभवसिद्धतया भावनान्वयबोधत्वस्य जन्यतावच्छेदकत्वावश्यकत्वे संख्यान्वयबोधत्वस्य तथात्वे मानाभावात्. लकारसामान्यस्य व्यापारार्थ इति मीमांसकमतं दूषयति. गौरवादिति जन्यत्वादिघ

रथोगच्छतीत्यादौ गमनानुकूलव्यापारस्य न बोधः किंतु गमनाश्रयस्येति नव्यमतमाश्रित्याहुः । आश्रयत्वे वा लक्षणा निरूढलक्षणा क्वचिन्नत्थैव पाठः २

आह ३

१६०क० रितस्य व्यापारत्वतेयेत्व जात्यपेक्षया गुरुत्वादिति भावः । नन्वाख्यातस्य न यत्नार्थकत्वं रथो गच्छतीत्यादौ
तदभावेप्याख्यातपदप्रयोगादत आह । रथ इति । चक्षुर्जानातीत्यादौ व्यापारे जनकत्वे वा लक्षणास्वीका
राज्जानातीत्यादावाख्यातस्याश्रयत्वलक्षणानियमो न संभवतीत्यतः आदौ इति आदिना रुछतियतरत्या
देः संग्रहः । इदमत्र बोध्यं । तंडुलं पचतीति चैत्र इत्यादौ कर्मत्वं द्वितीयार्थः तत्र तंडुलस्याधेयतयान्वयः कर्मत्व
स्य पाके पाकस्याख्यातार्थकृतौ तस्याश्चैत्र इति तंडुलकर्मकपाकानुकूलकृतिमांश्चैत्र इति बोधः चैत्रेण
पच्यते तंडुल इत्यत्र कृतिस्तृतीयार्थः तस्यामाधेयतया चैत्रादेरन्वयः तस्याश्चाधात्वर्थपाके तस्यास्मने 153
पदार्थफले तस्य चाश्रयतासंबंधेन तंडुल इति चैत्रनिष्ठकृतिजन्यफलाश्रयस्तंडुल इत्यन्वयबोधः कृतौ स४
तु कर्तीकर्मचार्थः चैत्रपक्वा तण्डुलाः पक्व इत्यभेदान्वयानुरोधात् नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वादि
त्यत्र विस्तरात्तयोनोक्तमिति । उपमाननिरूपणावसरे इति शेषः । शक्तिग्रह इति भवतीति शेषः तेनैन
व्युत्पादितेति । गुणेश्च स्वादयः पुंसि गुणिलिंगास्तु तद्वतीति कोशयोः नयत्र शक्तिग्रहः कत्वादिति भावः । ला ॥११५॥

घटादीति. नीलादिमत्त्वापेक्षया नीलत्वादिज्ञानेऽलघुतया शक्यतावच्छेदकत्वादित्यर्थः नीलादिविशिष्टे तु लक्ष
णेति. गुणवचनान्मतुपो लुगिष्ट इति स्मरणाल्लुप्तेन मतुपैव विशिष्टार्थबोधसंभवे. शं लक्षणायेत्यपि वदन्ति
न घटानयनं. ननु व्यवहारेणानयनादिना अनुमिते घटानयनादिधर्मिककार्यताज्ञाने पदानां कारणत्वं.
लाघवात्सदृत्त्वावच्छेदेनैव गृहीतः एवं च साक्षात्परंपरया कार्यत्वान्वितविषयकशाब्दत्वावच्छिन्नं प्रति पदत्वे
न कारणतेति कार्यकारणभावः पर्यवसित. इयमेव कार्यान्विते पदानामानुभाविकी शक्तिः। एवं च कार्य
त्वान्वितविषयकशाब्दत्वव्यापकीभूतकार्यताविषयकशाब्दत्वावच्छिन्नजनककार्यतावाचकलिङादिप्रत्य
याभावात्कथं कोशादिना शक्तिग्रह इति प्राभाकराक्षेपं. तन्मतदूषणेन दूषयितुं तन्मतसिद्धं दर्शयति. इत्थं
चेत्यादिना. एतेन स्मारकशक्तिप्रसंगेऽनानुभाविकशक्तिप्रदर्शनमनुचितमित्याशंका निरस्ता. ननु भूतले नी
लो घट इत्यादितः कार्यताविषयकबोधापत्तिः तत्र तादृशपदानां सामर्थ्यावधारणादितित्वे बोधकत्वादित्यत आ
ह. कार्यताबोधं प्रति चेति. सामर्थ्यात्तदभावादिति. कार्यताबोधं प्रति पदानां स्वजन्यकार्यतोपस्थितिद्वारा हे

दि० क० तुत्वं घटादिपदानां कार्यत्वानुभवप्रतिहेतुत्वेपि घटादिपदेषु कार्यत्वस्मारकशक्त्यभावे न स्मारकशक्त्या कार्य
त्वोपस्थापके लिङादिपदाभावाद्भूतले घट इत्यादितः शाब्दबोध इति भावः लाघवेनेति. कार्यत्वान्वितघटशाब्द
त्वापेक्षया घटशाब्दत्वस्य कार्यतावच्छेदकत्वे लाघवेनेत्यर्थः अत एव कार्यताविषयकबोधं प्रतिपदानां हेतुत्वा
देव. तत्कारणत्वेन सुखदुःखयोः कारणत्वेन तद्धेतुतया तादृशशाब्दबोधं प्रतिपदानां हेतुत्वादेव तत्कारणत्वे
न सुखदुःखयोः कारणत्वेन तद्धेतुतया तादृशशाब्दबोधहेतुतया व्यभिचारादिति घटादिपदैः कार्यताविषय
क एव बोधो जन्यत इति नियमे व्यभिचारादित्यर्थः कार्यत्वाविषयकबोधस्यापि चैत्रपुत्रस्ते जात इत्यादिपदै 154
र्जननादिति भावः अध्याहार्यमिति. तथा च तत्रापि लोडादिजन्यकार्यत्वोपस्थितेः सत्त्वेन कार्यताविषयकबो
धस्यैवोत्पादात् तादृशनियमे व्यभिचार इति भावः तदभावाच्चेति. तं पश्येत्यादि कार्यताबोधकपदाध्याहारासंभ
वाच्चेत्यर्थः भट्टमतं प्रक्षिपन्स्वमतमुपसंहरति. इत्थं चेति. लाघवादिति. अन्वितघटकल्पनापेक्षया घटमात्रे
तत्कल्पने लाघवादित्यर्थः यववपदस्येत्यस्य देहलीदीपकन्यायेनान्वयः तन्निहितादृशाद्विविधव्यवहारेण कंगो ॥२६॥

मीमांसकमतसिद्धव्यापारे शक्त्युपगमादिति भावः ५

दीर्घशूके वा यवपदस्य शक्तिरिति संदेहे सति हि यवपदस्य इति वाक्यशेषाद्दीर्घशूके शक्तिर्निर्णीयते इत्यन्वयः न नन्तु यवपदस्य वाक्यशेषेण दीर्घशूके शक्तिः कङ्गावपि शक्तिसत्वे बाधकाभाव इत्यत आह: नानाशक्तीति. कथं तर्हि हर्यादिपदे नानाशक्तिकल्पनेत्यत आह: हर्यादिपदेष्विति. विनिगमनाभावादिति. विनिगमनेति. तत्र कोशस्याप्यत्र तुल्यत्वात्प्रकृते च वाक्यशेषस्यैव विनिगमकत्वादिति भावः आख्यातस्य फलार्थकत्वमिति. न च विवरणस्य कथं शक्तिग्राहकत्वं न द्याचकपदाभावादिति वाच्यं. आख्याते यत्नत्वविशिष्टशक्तौ यत्नत्वविशिष्टशक्तेः करोति प्रतिपादितार्थप्रतिपादकत्वादित्यनुमानविधया तस्य शक्तिग्राहकत्वात्. प्रसिद्धपदस्येति. प्रसिद्धार्थकपदस्य स्वार्थः तिङर्थधर्मिणा नामार्थान्वयस्याव्युत्पन्नतया नेदं शक्तिग्रहस्योदाहरणमिति तु न: यो यः शूद्रस्य पचति द्विजोऽन्नं सोऽतिनिंदितरस्यादे तिङर्थधर्मिणा तथान्वयदर्शनेन तादृशनियमस्यासिद्धेः प्रसंगात्परमतनिराकरणपूर्वकं स्वमते जात्यादिविशिष्टे शक्तिव्यवस्थापयितुं मीमांसकमतमाह. जातावेवेति. जातिविशिष्टशक्तिस्वीकारे जातावपि शक्तिग्रहस्याव

दि०के० रुपकतानागृहीतविशेषणान्यायान्नयावज्जातावेव शक्तिर्लाघवात्तदुक्तं विशेष्यं नाभिधा गच्छेत्क्षीणशक्ति
विशेषण इति भावः यस्यां कस्यांचिद्व्यक्तौ शक्तिः सर्वासु वेति. विकल्प आद्ये दोषमाह. व्यभिचारादिति
अगृहीतशक्तिकव्यक्तावपि शाब्दबोधोदयेन तत्र शक्तिज्ञानाभावाद्व्यभिचार इति भावः द्वितीयेतमा
ह. आनंत्यादिति. व्यक्तिभेदेन शक्तिभेदे तच्छक्त्यानंत्यं स्यादित्यर्थः असंभवादिति. जातिभासकसा
मग्र्याएव शक्तिभासकत्वादिति भावः इदमेव कथमिति चेद्व्यक्तिविशेष्यकजातिप्रकारकशाब्दबोधे
जातिविषयकशक्तिज्ञानत्वेन हेतुत्वान्न च तादृशबोधे व्यक्तिशक्तिज्ञानत्वेन हेतुत्वमुपगम्य व्यक्तावेव श — 155
क्तिः किं नांगीक्रियत इति वाच्यं. तथा सति तज्ज्ञानत्वादिदोषप्रसंगादिति. शक्तिं विनेति. पदजन्यपदा
र्थोपस्थितेः शाब्दबोधं प्रति हेतुतया व्यक्तिशक्तिं विना तज्ज्ञानानिर्वाहादिति भावः लक्षणेति. तावतै
व तस्याः पदजन्यपदार्थोपस्थितेर्निर्वाहादिति भावः अनुपपत्तिप्रतिसंधानं विनापीति. गामानयेत्यादौ
गोत्वजातेरानयनान्वयानुपपत्त्या गोपदस्य गवि लक्षणास्वीकारेऽपि गौरस्तीत्यादौ गोत्वजातेरस्तित्वा ॥११७॥

धन्वयानुपपत्तेर्लक्षणावीजस्याभावेन लक्षणायाः स्वीकर्तुमशक्यत्वादिति भावः मैते पूर्वोक्तदोषमाशं
क्य वारयति. न चेत्यादिना. एकस्या इति शक्ये छागरूपायास्तस्या एकत्वादित्यर्थः न चाननुगम इति. गोत्व
त्वानामननुगततया विषयतासंबंधेन शक्तिज्ञानकारणतायामवच्छेदकत्वासंभव इत्यर्थः गोत्वादेरेवेति.
नत्वाच्च गोशाब्दबोधे गोत्वविशिष्टविषयकशक्तिज्ञानत्वेन हेतुत्वान्नोक्तदोष इति भावः ननु सर्वत्र पदजन्यप
दार्थोपस्थितेर्हेतुत्वे मानाभावः कथमन्यथा शाब्दबोधे संसर्गभानं नैवं पदानुपस्थितघटादेरपि भानाप
त्तिरिति वाच्यं. गोविशेष्यकगोत्वप्रकारकशाब्दबोधं प्रति गोत्वशक्तिज्ञानत्वेन हेतुत्वस्योक्तत्वादेतादृशानिष्टप्र
संगविरहादित्यत आह. किंचेति. तदाद्यक्तौ शक्तिरिति गौः शक्येति विशिष्टज्ञानं प्रमात्मकमेव तन्मते अन्यथा
स्यात्वभावात्प्रमायाश्च वस्तुसाधकत्वादिति भावः समानप्रकारकत्वेनेति. ईदृशशक्तिज्ञानस्य गोत्वप्रकार
कत्वाभावेन गामानयेत्यादौ गोत्वप्रकारकस्मरणशाब्दबोधयोरनुपपत्तिरित्यर्थः न च गोपदं गोत्वशक्तमि
त्येतादृशशक्तिग्रहस्यैव शाब्दबोधहेतुत्वात्तस्याश्च शक्यांशे गोत्वप्रकारकत्वान्न तत्प्रकारकशाब्दबोधानुप

पत्तिरिति वाच्यं. शक्तिग्रहे यद्देशे गोत्वादिप्रकारकत्वं शाब्दबोधस्यापि तद्देशे गोत्वादिप्रकारकत्वमित्येता
दि०क० दृशसमानप्रकारकत्वस्य परमतेऽसिद्धान्तितत्वात्. अनएवापूर्ववादे पूर्वस्य पूर्वमनुपस्थितत्वात्कथं तत्र
शक्तिग्रह इत्याशंक्य कार्यत्वेन घटादिषु शक्तिग्रहाद्योग्यतया शाब्दबोधे पूर्वभानमित्युक्तं तैरिति ननु का
र्यत्वाद्युपाधिप्रकारकशाब्दबोधे हेतुत्वे गोत्वत्वावच्छिन्नगोत्वविषयतया निवेशः आवश्यकः निर्धर्मिता
वच्छेदकत्वशक्तिज्ञानस्य गोत्वाद्यंशेति. अकारकशक्तिज्ञानस्य वा विपरीतज्ञानविरोधिनः शाब्दबोधहेतुत्वा
त्तथा च गोत्वत्वे शक्यतावच्छेदकत्वावगाहितादृशप्रमाया विषयसाधकत्वेऽज्ञात्वत्वे शक्यतावच्छेदकत्वसिद्धिरि 156
ति भावः नैवं गौरवमिति. न च गोत्वत्वावच्छिन्नविषयकशक्तिज्ञानस्य कारणत्वेऽपि संभ्रमो न तु तस्य विषय
साधकत्वमिति वाच्यं. तथा सति प्रतीतेः कारणतावच्छेदकत्वाद्यंशेऽपि भ्रमत्वस्य वक्तुं शक्यतया कारणता
वच्छेदकत्वादीनां कुत्रापि सिद्धिर्न्न स्यात्. मास्तु वा गोत्वत्वादीनामवच्छेदकत्वं तथापि गवेतरासमवेतत्वादिघ ||११८||
टितगोत्वत्वादेर्धर्मितावच्छेदकताद्यात्मकविषयतायाः शाब्दबोधकारणतावच्छेदककोटिप्रवेशप्रयुक्तं

नतदनुगमकमनमाह. किं चेति शक्यतावच्छेदकं वाच्यमिति. गोत्वधर्मिकशक्यत्वज्ञानस्य यद्धर्मिकगोत्वादिशक्तिज्ञानस्य वा शाब्द
बोधे

गौरवं दुर्वार मेवेति. स्वमतमेमुपसंहरति. तस्मादिति. व्यक्तावेवेति. जात्याकृतिविशिष्टव्यक्तावेव. अवयवसंस्थानविशेषरूपाया आकृतेः शक्यत्वेपि न तदवच्छेदकत्वं सामानाधिकरण्यसंवंधस्य शक्यतावच्छेदकतावच्छेदकत्वकल्पने गौरवात्. अत्र च परस्परपरित्यागेन परस्परवोधाभावात्त्रिष्वेकैकव्यक्तैकवोधनायैव सूत्रे जात्याकृतिव्यक्तयः पदार्थ इत्येकवचनमिति संप्रदायः. नव्यास्तु. संस्थानानुपस्थितावपि गोत्वादिना गवाद्यन्वयवोधाज्जातिविशिष्टव्यक्तावेव शक्तिः संस्थाने च पृथगेव शक्तिर्व्युत्पत्तिवैचित्र्यात् संस्थानव्यक्त्योरेकपदार्थयोरपि परस्परमन्वयवोधात्सौत्रं पदार्थ इत्येकवचनं जातिव्यक्त्योरेकशक्तिलाभायेवेत्युः. तच्छक्यस्य वोद्धृबुद्धिविषयतावच्छेदकीभूतघटत्वाद्यवच्छिन्ने शक्तिः अथ घटत्वादीनां शक्यतावच्छेदकभेदाच्छक्तिभेदापत्तिः न च शक्यतावच्छेदकभेदेपि शक्यतावच्छेदकस्य वुद्धिविषयतावच्छेदकत्वस्यैक्यान्न शक्तिभेद इति वाच्यं. तस्य शक्यतावच्छेदकतावच्छेदकत्वे शाब्दवोधे तज्ज्ञानापत्तेरिति चेन्न. वुद्धिविषयतावच्छेदकत्वस्योपलक्षणतया शक्यतावच्छेदकतावच्छेदकत्वात्. उपलक्षणस्य शाब्दवोधे भानानंगीकारात्. घट।

स्वघटकान्यतरत्वेनार्थवत्व केवलयौगिकमध्ये समासान्तर्भावे त्विष्यत एवेति बोध्यं ४
मतान्तरमाह. तन्नेति. प्रत्यक्षबुद्धिविषयो द्विविधः समीपसमीपान्तरश्च. आद्य इदमोऽन्त्य एतदो विषय एवं परोक्षबुद्धिविषयोपि द्विविधोऽनभ्यासदशापन्नो
संशयनिवर्त्तनिश्चयोपहितसामग्रीरहितसन्निकर्षविषयत्वमदसः ध्रौव्यस्वपरस्तदः इति विवेकसंभवे सामीप्यस्याननुगतत्वात् इदमत्वादेर्वक्तव्ये नैतत्संभवति

दि०क० त्वादेश्च शक्यतावच्छेदकत्वं च विशेषणत्वेनैतच्छक्तस्य शाब्दबोधे भानं विशेषणत्वं च तत्पदजन्यबो वं विप्रकर्ष
धविषयत्वेन शक्तिविषयत्वमुपलक्षणत्वं च तत्पदजन्यबोधाविषयत्वेन शक्तिविषयत्वमित्येवमिदं योरपीस्व रसंसूचि
पदादिष्वपि तत्रापीदमेतदोः प्रत्यक्षबुद्धिविषये अदसः परोक्षबुद्धिविषये शक्तिः अत एव तेषां विभिन्ना यन्नियामा तिः ३
र्थकत्वं. एवं तदोपि. इदमः प्रत्यक्षगतं समीपतरवर्त्ति चैतदो रूपं. अदसस्तु विप्रकृष्टं तदिति परोक्षे विजा
नीयादित्यपि पठन्ति. किंपदस्य जिज्ञासाविषयत्वविशिष्टे शक्तिः सर्वपदस्य व्यापकत्वे सर्वे घटा रूपवन्त इ
त्यादौ घटत्वव्यापकरूपवत्त्वमिति बोधात्. तत्पदस्य तत्कालीनसंबोध्यचैत्रत्वादि शक्यतावच्छेदकं. एव 157
महंपदस्य तत्कालीनस्वतंत्रोच्चारयितृचैत्रत्वादि स्वातंत्र्यात्वाच वाच्यास्त्वया मद्वचनात्स राजेत्यादौ न मत्पदा
त्कैव बोध इत्यास्तां विस्तरः. शक्तं पदं विभजते शक्तं पदमिति. क्वचिदिति. किंचिदित्यर्थः एवमग्रेपि मङ्गलादौ
स्यत्र बहुपुस्तकेषु मंडपादौ इति पाठः. प्रमादिकं प्रतिबंधकत्वादिति न च क्लृप्तज्ञानयोगिकार्थबुद्धेः प्रतिबंधक ॥११०॥
त्वेन समुदायार्थस्य पंकजनिकर्त्तृत्वस्य बोधो न स्यादिति वाच्यं. पद्मत्वावच्छिन्नविशेष्यतानिरूपितपंकजपदयो
इविप्रकृष्टतरपरोक्षबुद्धिविषयत्वादिश्च प्रयोगोपाधिरिति बोध्यं रस्य २
सौ ४

गजन्यपंकजनिकर्तृत्वावच्छिन्नविषयताशालिबोधं प्रतिरूढिज्ञानस्य प्रतिबंधकत्वेन पद्मधर्मिकयोगार्थबुद्धेः प्रतिबध्यतावच्छेदकानाक्रान्तत्वादिति. विरोधाविषयकज्ञानस्य प्रतिबंधकत्वं. जनकज्ञानविघटकत्वेनैवेति. नियमभंगमस्वरसं ग्रांवरस्तानेन सूचयन्मणिकारमतमाह. वस्तुतस्त्विति. सान्निध्यादिति रूढ्यर्थस्य सन्निहितोपस्थितिकत्वादित्यर्थः. व्यक्तिवचनानां सन्निहितविशेषपरत्वे नियमादिति. भावः व्यक्तिवचनानां किंचिद्व्यक्तितात्पर्यकाणां सन्निहितविशेषपरत्वं. उपस्थितविशेषपरत्वमित्यर्थः. तथा च पद्येनैत्यर्थसत्वेन रूढ्यर्थयोगार्थयोः परस्परान्वयबोधजनकसामग्र्यंतरसत्वेन च रूढ्यर्थ एव योगार्थान्वयो न कुमुदादाविति. न रूढिज्ञानस्य योगिकार्थबुद्धौ प्रतिबंधकत्वं. एवं च रूढ्यर्थयोगार्थयोः परस्परान्वयबोधसामग्रीस्थल एव न कुमुदादेः पंकजपदाद्बोधो यत्र तु तयोः परस्परमन्वयबोधसामग्रीविरहस्तत्र कुमुदादेर्बोधो भवत्येव परं तु कुमुत्वेन रूपेण कुमुदत्वविशिष्टपंकजनिकर्तृत्वेन वा लक्षणया शुद्धपंकजनिकर्तृत्वेन तु शक्त्यैवेत्याह. यत्र रूढ्यर्थस्यादिना प्रतिसंधीयते तस्य नंतरं कुमुदत्वेन बोधे च तात्पर्यमिति पूरणीयं. लक्षण

व्यक्त्यादिवचनेनावयवशक्तिग्रहेत्यन्तेः योगे येस्नातितत्पेत्यर्थस्तेनार्थादैन व्यभिचारः ६

किंचिदिति योगार्थतात्पर्यकारणमित्यर्थः उपस्थितेति रूढ्यर्थपरत्वमिति पाठन.६

वे४ ए२ वे६

दि॰कां॰ येति. पंकजनिकर्तृकुमुदत्वेन बाधो लक्षणायेत्यर्थः रूढ्यर्थयोगार्थयोः सामग्रीविरहोपलक्षकमेतत्.
तेन रूढ्यर्थबाधप्रतिसंधानासत्वेपि यत्र सामग्र्यंतरविरहस्तत्रापि लक्षंया कुमुदबोधो भवत्येव. अव
यवशक्तिमात्रेणेति मात्रपदेन लक्षणानादरः सूचितं निर्वाहः पंकजनिकर्तृत्वेन कुमुदशाब्दबोधनिर्वा
ह इत्यर्थः पद्मत्वेन बोधे: पद्मत्वेनैव बोधः लक्षणयैवेति. रूढ्यतावच्छेदकपद्मत्वज्ञाने तत्राभावेन रूढ्या
तद्बोधनासंभवादिति भावः लक्षणा द्विविधा जहत्स्वार्थाऽजहत्स्वार्था च. तत्राद्य दर्शयति. गंगायामिति. व
क्ष्यमाणस्वरसात्. तात्पर्यानुपपत्तिर्वेति. सा लक्षणा च. द्वितीयां प्रदर्शयति. एं काकेभ्य इति. दध्युपघा
तके काकविडालादिसाधारणदध्युपघातकत्वविशिष्टे. एकसार्थवाहित्वे. एकसार्थवाहित्वविशिष्टे
छत्रियपदलक्षणाभिधानं च वाक्यलक्षणावादिमताभिप्रायेण न्यायमते तु छत्रपद एव एकसार्थवा
लक्षणा प्रत्ययार्थस्य संबंधान्वयाचैकसार्थवत्तो गच्छतीत्यन्वयः एकसार्थवाहित्वे चैकसार्थ एव. ननु
एकगन्तृत्वं. नैराकांक्ष्येण यान्तीत्यस्यानन्वयापत्तेः न चाजहत्स्वार्थायोक्तिविरुद्धेति वाच्यं. वाक्यलक्षणा ||१२०||

158

ता।

एवं ~~पूर्वोक्त~~स्थले यष्टीः प्रवेशय ~~मंचाः क्रोशं~~तीत्यादावपि ~~यष्टि~~धरत्वमंचस्थत्वादिना बोधे जहत्स्वार्थैव लक्षणा

वादिमतेनैव तदभिधानादिति. क्वचित्तु गंगापदस्य तीरे तात्पर्यग्रहस्थले. क्वचिद्घोषपदस्य मत्स्यादौ ता
त्पर्यग्रहस्थले. तेनैव रूपेणेति. न च गंगामित्यादौ गंगातीरत्वेन बोधे जहत्स्वार्थत्वहानिरिति वाच्यं. ती
रत्वेन लक्षणायामेव जहत्स्वार्थत्वस्य सर्वसम्मतत्वाद्गंगातीरत्वेन भाने त्वजहत्स्वार्थैव लक्षणेति. एवं पू
र्वोक्तस्थले यष्टीः प्रवेशय मंचाः क्रोशंतीत्यादावपि यष्टिधरत्व मंचस्थत्वादिना बोधे जहत्स्वार्थैव लक्षणेति
ध्येयं. अत एव तद्धर्मविशिष्टे लक्षणाग्रहस्य तेन रूपेणोपस्थिति शाब्दबोधौ प्रति हेतुत्वादेव. एवं च. यदा
नुपस्थाप्यस्यापि लक्ष्यतावच्छेदकस्य शाब्दे भानं सुकरं. अतिप्रसंगस्य तद्धर्मविशिष्टेत्यादिनैव वारणा
दिति भावः. इदमुपलक्षणं. गंगापदशक्यप्रवाहसंयोगस्य तीरत्वे वाधादिस्यपि द्रष्टव्यं. लक्षितलक्षणाया
आधिक्यमाशंक्य जहत्स्वार्थायामन्तर्भावमाह. यत्रेति. परंपरासंबंधरूपेति. स्ववाच्यरेफद्वयघटितपद
वाच्यत्वादिरूपा न च द्वौ रेफौ यत्रेति व्युत्पत्त्या द्विरेफपदेन स्वशक्यरेफद्वयसंबंधि भ्रमरपदं लक्ष्यं भ्रमरप
देन च शक्त्या भ्रमर उपस्थाप्यत इत्येतावतैव सामंजस्यं. अलं द्विरेफपदस्य भ्रमरे परंपरासंबंधरूपलक्षणा

दि०क० याएवंचलक्षितेनलक्षणांज्ञापनमितिलक्षितलक्षणाशब्दार्थोप्यस्त्वितिवाच्यं.तथासति.द्विरेफमानयेत्यादि
तःकर्मतादेर्भ्रमरान्वयानुपपत्तेःप्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधकत्वादिति.ननुतच्छाब्दबोधेतच्छक्तपदज्ञा
नत्वेनहेतुत्वाल्लाक्षणिकार्थशाब्दबोधःकथंस्यादित्यतआह.किंत्विति.पदान्तरं.समभिव्याहृतंसक्तपदं.शक्ति
लक्षणेति.अन्यतरसंबंधेनइतरपदार्थस्तदन्वितोयःस्वार्थइत्यर्थः.कुमतिःपशुरित्यादिसर्वलाक्षणिकस्थले
शाब्दबोधस्यानुभवसिद्धतयालाक्षणिकस्याप्यनुभावकत्वमितितुनव्याः.ननुशक्यसंबंधोनलक्षणातथा
सतिवाक्यस्यशक्याप्रसिद्ध्यातत्रलक्षणानस्यादितिमीमांसकास्तेषामिष्टापत्त्यानिराकुरुतेवाक्येत्विति.न 159
नुगंभीरायांनद्यांघोषइत्यादौनदीपदस्यतीरेलक्षणास्वीकारेगंभीरपदार्थस्यैकदेशान्वयापत्त्यापदलक्ष
णायांसंभवेनवाक्यलक्षणाआवश्यकीत्यतआह.यत्रगंभीरेति.क्वचिदिति.चैत्रस्यगुरुकुलमित्यादावित्यर्थः.
स्वीकृतत्वादिति.पदभेदेनव्युत्पत्तिभेदात्प्रकृतेनतथाव्युत्पत्तिकल्पनादितिभावः.नदीपदस्येति.नचविनिगमना
विरहेणगंभीरपदस्यलक्षणानदीपदं.तात्पर्यआहकमित्यस्यापिवक्तुंशक्यत्वात्कथंनदीपदमात्रेलक्ष ॥१२१॥

णाभिधानमिति वाच्यं. प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेरुत्तरपद एव लक्षणायुक्तत्वात्. अत्र
मीमांसकमतानुयायिनः वाक्यलक्षणायै वोपपत्तौ गंभीरपदस्य तात्पर्यग्राहकत्वकल्पनमयुक्तं. न च वाक्यशक्त्य-
भावाच्छक्यसंबंधरूपा लक्षणापि न संभवतीति वाच्यं. स्वबोध्यसंबंधस्यैव लक्षणापदार्थत्वात्. गंगायां घो-
षइत्यादौ गंगापदबोध्यस्य प्रवाहस्य संबंधस्तीरे इति तत्र लक्षणा गंभीरायां नद्यामिति वाक्यस्य बोध्याग-
भीराभिन्ना नदी तत्संबंधस्तीरे इति तत्र लक्षणा एवं मीमांसात्मकेपि चित्रगुरिति वाक्येपि चित्रगुपदस्यावय-
वशक्त्या चित्राभिन्नागोः स्वबोध्या स्वजन्यबोधविषयत्वस्यैव स्वबोध्यत्वात्. तत्संबंधस्य स्वामिनि सत्त्वादित्या-
हुः तन्न. स्वबोध्यत्वं हि न स्वजन्यबोधविषयत्वं. गंगाघोषइत्यादौ गंगायामित्यस्यां लाक्षणिकत्वापत्तेः तत्तत्वे
न बोधकत्वं वाच्यं. न वा तावतापि निर्वाहः अपभ्रंशस्यापि लाक्षणिकत्वापत्तेः तत्तत्त्वावच्छिन्नायाशक्त्यावच्छिन्नबो-
धकतामेव निवेशात् तथा च. कथं वाक्यस्य लक्ष्यकत्वं. वस्तुतस्तु न स्वबोध्यत्वं यदि स्वजन्यशाब्दबोधविषयत्वं
तदा गंगायां घोषइत्यादौ गंगापदे लक्षणानुपपत्तिः गंगापदेन तत्र प्रवाहशाब्दबोधाजननेन प्रवाहस्य गंगा

तद्धत्वसाधा
रणत्वेन४

पि४

पदवोध्यत्वाभावात्किंतु शक्यास्वजन्यज्ञानविषयत्वं न वाच्यं. न च शक्येप्यधिकं समवायेन घटपदस्मारितग
गनस्यापि स्ववोध्यत्वापत्तेः संबंधज्ञानाद् घटपदेन पटादेः शाब्दबोधप्रसंगात्. एवं च शक्यसंबंधापेक्ष
याशक्यास्ववोध्यसंबंधस्य गुरुत्वान्न तस्य लक्षणात्वमिति. किंच गभीरायां नद्यामिति. सप्तम्यन्तस्य गभी
रनदीतीरलाक्षणिकत्वे घोषे तादृशतीराधेयत्वबोधानुपपत्तिः आधेयताबोधकपदाभावात्. नामा
र्थयोर्भेदसंबंधेनान्वयस्याव्युत्पन्नतया आधेयतासंबंधेनापि तीरस्य घोषादावन्वयासंभवात्. ग
भीरायां नद्यामिति सप्तमीशून्यस्य तीरलक्षकत्वे सप्तम्यर्थाधेयत्वादेस्तादृशतीरादेरन्वयापत्तिः प्र
त्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः गभीरायां नदीति भागस्य सप्तमीसप्तमीप्रकृतित्वाभावा
त्. न च गभीरायां नद्यामिति सप्तम्यन्तस्य गभीरनदीतीरवृत्तित्वे लक्षणास्त्विति शंक्यं तादृशवृत्तित्वस्य घो
षादावन्वयानुपपत्तेः नामार्थयोर्भेदसंबंधेनान्वयस्याव्युत्पन्नत्वात् सप्तम्यन्तभागस्य तादृशतीरवृत्तौ लक्ष
णामुपगम्य तस्याभेदेन घोषादावन्वय इत्यपि न. अभेदेनान्वयबोधे समानविभक्तिकत्वस्य तंत्रत्वादित्या ॥[illegible]१॥
सप्तम्यन्तस्य नामत्वाभावात्तेन तत्संभवतीति शंक्यं शक्तिलक्षणान्यतरसंबंधेनार्थबोधकत्वरूपार्थवत्त्वमात्रप्रातिपदिकत्वे.ल. न च सम्भारागहत्व
स्य [illegible]तेति सूत्रे नियमार्थत्वान्नेत्थं संभवतीति वाच्यं. तस्य विध्यर्थत्वात्.२

स्तां विस्तरः एवं अवयवलक्षणेव ननु वाक्यलक्षणेऽस्यर्थः गोपदस्येति. प्रत्ययार्थान्वयानुरोधेनोत्तरपदलक्षणायायुक्तत्वादिति भावः गोमति. गोस्वामिनि न स्वीक्रियत इति. गोधर्मिकान्वयबोधे गोधर्मिकत्वेन ज्ञानस्य हेतुताया आवश्यकत्वादन्यथा चित्रङ्गोस्तीत्यादावपि व्रजपदार्थस्य गोस्वामिरूपस्यैकदेशे गवि चित्रान्वयप्रसंगादिति. यद्यपि घटशून्यमित्यादावेकदेशान्वयोऽस्त्येव तथापि तादात्म्येन तथान्वयो न स्वीक्रियत इदये. निपातातिरिक्तेति निपातपदमन्वयस्याप्युपलक्षकं. तेन चंद्र इवेत्यादाविवार्थसादृश्ये चंद्रस्य प्रतियोगितयान्वयोपपत्तिः अन्यथा अव्ययनिपातातिरिक्तेनामार्थयोरभेदेनान्वयबोधस्वीकारे तथाऽन्वयबोध इति भेदान्वयबोधस्यादित्यर्थः साक्षादेव प्रत्ययार्थमद्वारीकृत्यैव भूतले घट इत्यादावाधेयतासंसर्गेणापि भूतलेयोरनयात्साक्षादित्यस्यापि व्युत्पत्तौ निवेशादिति भावः तत्र. नञर्थान्योन्याभावस्य स्मरणं कल्प्यमिति. तथा चावापि प्रत्ययार्थद्वारेव राजपुरुषयोरन्वयान्नो न व्युत्पत्तिविरोध इति भावः परन्तु राजपुरुष इत्यादितत्पुरुषेण लक्षणा व्युत्पत्तिवैचित्र्येण स्वत्वादिसंसर्गेण राजपुरुषादावन्वयस्वीका

तथा च निपातान्नेवसदृशाः कतिपयशब्दाः संग्राह्याः अव्ययनिपातातिरिक्तेति केचित्तत्त्वं दर्शयितुमेवाह अनुनिपातविहितार्थव्ययेत्यपाठ्यमिति तत्र.

ग्रामसतिदीर्घपुरुषाभिप्रायेणैवैश्वेम इतिवद्ग्रामसरस्थितदीपनाभिप्रायेण तथा प्रयोगापत्तेः ५

दि०क०

रादन्यथा दर्शितेराजमातंगास्तथैवान्ये तुरंगमा इत्यादौ तच्छब्देन राज्ञः परामर्शो न स्यात्. तस्यैकदेशत्वादि
त्यातुः द्वंद्वे तु. इतरेतरद्वंद्वे तु धवखदिरावित्यत्र धवत्वं खदिरत्वं च प्रत्येकं नोद्देश्यतावच्छेदकं. सुपामुद्देश्य
तावच्छेदकव्याप्यसंख्याबोधकत्वस्याकाशावित्यादिवाक्यप्रामाण्यापत्तिभिया क्लृप्तत्वेन धवद्वयस्य खदि
रद्वयस्य च बोधापत्तेः. परन्तु खदिरपदस्य धवखदिरसाहित्याश्रये लक्षणा उपगम्यते. एवं चोद्देश्यतावच्छे
दकीभूतेनोद्देशसाहित्यव्याप्यत्वेन धवद्वयवृत्तित्वस्य न वा खदिरद्वयवृत्तित्वस्यापि तु धवखदिरोभ
यवृत्तित्वस्येति न धवद्वयादेर्बोध इति मीमांसकमतं. शंकते न च साहित्येति. साहित्याश्रय इत्यर्थः. स
मूहवृत्तित्वरूपं साहित्यं लक्षणमनेकक्रियान्वयित्वमिति विकल्प्य दूषयति. साहित्यस्यान्ययोरपीति. द्वितीयं
शंकते. न चैकेति. अननुभवाच्चेति. वस्तुगत्या एकक्रियान्वयित्वस्य धवखदिरयोः सत्त्वेप्येकक्रियान्वयित्व
स्य शाब्दबोधाभावादित्यर्थः. इदमुपलक्षणं. चैत्रमैत्रौ गच्छत इत्यादौ चैत्रादिपदस्य यादृशसाहित्यविशिष्टे 161
लक्षणा तादृशसाहित्यस्य व्यासज्यवृत्तितया तदवच्छेदेनाव्यासज्यवृत्तेर्गमनकर्तृत्वस्यान्वयासंभवश्च ॥१२३॥

[illegible]

सामर्थ्याभावात्र समासः समाहारेतरे
अयमाशयः यदि स्तुवर्धतं स्यात्तरयोः २

पि वोध्यं. ननु यदि द्वंद्वेन लक्षणेन तत्कर्मधारयद्वंद्वस्य को विशेष इत्यत आह. किं त्विति. चार्थे द्वंद्व इत्यनुशास
नं. तत्र चार्थाश्चत्वारः समुच्चयान्वाचयेतरेतरसमाहारभेदात्. तत्र समुच्चयान्वाचययोः सामर्थ्यसत्वा न
त्रसमासः तत्र चार्थस्य भेदव्याप्यत्वाद्वे द्वंद्व इत्याशयः इत्यादावित्यापदेन प्रमाणप्रमेयेत्यादिसूत्रे आत्मेशं
परिग्रहः कथमिति यदि समासघटकपदार्थयोर्यत्र भेदस्तत्रैव द्वंद्वस्तदा नीलघटयोर्भेदाभावात्कथं द्वंद्व
एवं प्रमाणप्रमेयेत्यादिसूत्रे आत्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमे
यमिति सूत्रोपात्तद्वादशविधप्रमेयान्तर्गतमनोबुद्धींद्रियाणां प्रमाणत्वेन प्रमाणप्रमेययोर्भेदाभावात्कथं द्वं
द्व इत्यर्थः लक्षणेति. तथा च तयोर्भेदसत्वाद्द्वंद्व इति भावः ननु अभेद इत्यसंगतं नीलघटत्वयोरभेदाभावादत आ
हे अभेद इत्यस्येति. केचित्तु पदार्थत्वं पदजन्यप्रतीतिविषयत्वं. तथा च केचित्पदार्थभेदात्केचिच्च पदार्थतावच्छे
दकभेदाद्द्वंद्वः प्रकृते च नीलत्वघटत्वयोः पदार्थतावच्छेदकयोर्भेदाद्द्वंद्वः अस्तु वा पदार्थतावच्छेदकभेद एव द्वंद्वः न
वैवं घटाः इत्यादौ द्वंद्वस्याप्रशक्तत्वेन तदपवादकः सरूपैकशेषो न स्यादिति वाच्यं. इष्टापत्ते। तत्र घटपदोपस्था।

१ सामर्थ्यं चात्र साक्षात्परंपरया वा एकपदार्थनिरूपितापरपदार्थविष [illegible]

[illegible] त्वस्य तेन संबंधेनाकाशे विमत्वान्नत्वापत्तिः न च पर्याप्तिसंबंधेनैवान्वये विवक्षणीय इति वाच्यं. उभयस्य प्रत्येकानतिरेकित्वेन तेन संबंधेनाकाशे द्वित्व [illegible]

पितेषु वहुत्वान्वयादेव वहुघटबोधसंभवात्सङ्केतुश्चरित इत्यादि व्युत्पत्तौ भानाभावात्. सरूपैकशेषविधेर्हती
त्यादौ वैवसार्थकत्वात्. अस्तु वा समूहादिति व्युत्पत्तिः परन्तु समूहादित्यर्थपदार्थैकदेशे हेतो विशेषणं. वस्तुतो बोध
विशेषणमेवनदिति नेष इत्याह. समाहार इति. अहिनकुलमित्यादावहिनकुलयोः समाहार इति प्रतीतेरस्तु
मेवसिद्धत्वे मित्यर्थः वस्तुतस्त्वाहिनकुलमात्रप्रतीतेर्नोत्तरपदे समाहारलक्षणा न वा शक्तिरित्यभिप्रेत्यै
तं. पदानीति. पूर्वपदमिति. प्रत्ययानामिति व्युत्पत्ते विनिगमकत्वादिति भावः कथमिति. समाहारबोध इत्यर्थः त कथं प
त्रैतेनुमाह. समाहारमिति. वादनासे नवादिति. अभिघातास्व्यसंयोगावच्छिन्नक्रियाया एव वादनपदार्थतया 162
धात्वर्थतावच्छेदकीभूतनादृशाभिघातास्वसंयोगस्य समाहारेसंभवेन वादनकर्मत्वासंभवादित्यर्थः परं प
रासंबंधेनस्वाश्रयवृत्तित्वरूपेण नेतु न्वयात्. वादनकर्मत्वान्वयात्. एवमिति. उत्तरपदेसमाहारलक्षणेत्यर्थः
नवा न तमाह. परे त्विति. वुध्यन इत्यिप्रस्थाननु समाहारोपीति शेषः ननु यदि समाहारो नुवुद्धो नेतदा एकत्वस्य कु ॥१२४॥
त्रान्वयः समाह्रीयमानयोरेकत्वाभावादत आह. प्रत्येकमिति संज्ञां चेति. नत्रैकवचनं साधुत्वार्थमित्यपि वदन्ति.

समाहारद्वंद्वइत्यर्थः यथाश्रुतनुनपुंसकं आकारलोपि पुंवदिवत्वादेशसंज्ञायाः प्रसिद्धेः एवमन्यत्रापि यथायथं बोध्यं ।

ननु पाणिपादमित्यादिसमुदायस्य समाहारबोधकत्वाभावे कथं तस्य समाहारसंज्ञेत्यत आह. समाहारसं-
ज्ञा चेति. तत्रैवेति. तथा च पाणिभाषिके एव सार्थत्वेन्यत्रापि प्रसंगादिति भावः ननु तादृशसंज्ञायाः किं प्रयोज-
नमत आह अत्रैवेति. समाहारेतीत्थं द्वंद्वइत्यर्थः तथा च नित्यैकवचनक्लीवलिंगत्वादिपदसंस्कारार्थत्वे-
न तस्यावैयर्थ्यमिति भावः पितरौ श्वशुरावित्यादाविति. चैत्रस्य पितरावित्यादि विरूपैकशेषस्थल इत्य-
र्थः तत्राणेति. एकस्य चैत्रादेः पितृद्वयासंभवे नत्र विरूपैकशेषविनागत्यभावादिति भावः विरूपैक-
शेषत्वेपि नत्र लुप्तमात्रादिशब्दस्मरणेनैव शाब्दबोधान्न लक्षणा स्वज्यत इति. एवमन्यत्रापीति. पुमान्स्त्रियेत्य-
नेन यत्रैकशेषस्तत्र दंपतीपूजाप्रकरणे ब्राह्मणान्वा नयेत्यादौ शिवौ वा नमस्कुर्यादित्यादौ च मातरौ पुत्रौ पि विसत्रा४
प्रमाणान्तरेण स्त्रीपरत्वज्ञानेन मातृपुत्रौ स्वसृदुहितृभ्यामिति विरूपैकशेषान्तः भ्रातृपदे भ्रातृस्वस्रोः पुत्रपदे
च पुत्रदुहित्रोर्लक्षणेत्यर्थः नात्र लक्षणेति. बहुत्वाचयोग्यानेकोपस्थितेः शक्तित एव संभवादिति भावः न-
त्पुरुष इति स्वीक्रियत इति शेषः नेतानधिकारादिति. स्त्रीशूद्रौ नाधीयातामित्यनेन निषेधादिति भावः याज

दि०क० नासंभवतीति. अध्ययनविधिसिद्धज्ञानासंभवादिति भावः तत एवेति. श्रुतिबोधितयाजनानुपपत्त्यैवेत्यर्थः
ननु निषादस्य विद्याकल्पने गौरवमत आह· लाघवेनेति. ननु स्त्रीशूद्रौ नाधीयातामिति श्रुतेरप्रामाण्याप
त्तिरिया लाघवमकिंचित्करः नेत्र शूद्रपदस्य निषादेतरशूद्रपरत्वे निषादस्य वेदान्तराध्ययनप्रसंगः अ
ध्ययनपदस्य यागोपयुक्ताध्ययनेतराध्ययनपरत्वादध्ययनपदस्य. तेन निषादस्य यागोपयुक्ताध्यय
नेतराध्ययननिषेधः शूद्रान्तरस्य त्वध्ययनमात्रनिषेधः सिद्ध्यतीति. अदोषत्वादिति. ननु लक्षणाकल्प 163
नेपि न दोषः शक्यसंबंधरूपलक्षणायाः क्लृप्तत्वान्न च शाब्दबोधं प्रति लक्षणाज्ञानस्य हेतुत्वकल्पनमधिक
मिति वाच्यं. निषादानां स्थपतिरिति व्युत्पत्त्यादिनिषादसंबंधाभिन्नस्थपत्यनुभवस्य लौकिकवाक्ये क्लृप्तत्वात्त क॰४
दनुरोधेन लक्षणाज्ञाने हेतुत्वस्य सर्वसिद्धत्वेन वेदेऽधिकस्याकल्पनादिति चेन्न शक्यसंबंधरूपलक्षणायाः
ज्ञानस्य शक्तिज्ञानं विनासंभवेन शक्तिज्ञानस्य तत्रोभयसिद्धतया भवन्मते वैदिकवाक्यजन्यशाब्दबोधात्पूर्वं लक्ष
णाज्ञानव्यक्तिकल्पनागौरवस्य वज्रलेलोपेदिति. उपकुंभमर्द्धपिप्पलीत्यादाविति. अत्र च कुंभस्य समीपमि ॥२५॥

वार

त्यस्वपदविग्रहः.अव्ययीभावस्यनित्यसमासत्वात्.पूर्वपदार्थप्रधानतयेति.कुंभपदलक्षितस्यकुंभसंबंधिनउपपदार्थसमीपे.भेदेनान्वयात्कुंभसंबंधिभिन्नंसमीपमित्युपपदार्थविशेष्यकोन्वयबोधइत्यर्थः.केचित्तुउपपदार्थःसामीप्यंनतुसमीपंसमीपउपपदलक्षणास्वीकारेतुपदद्वयलक्षणापेक्षयाकुंभपदस्यैवकुंभसमीपेलक्षणाउपपदंतात्पर्यग्राहकं.कुंभसमीपमितिवाक्यबोधइत्याहुः.अत्रअस्वपदविग्रहविधानेतितत्पुरुषशक्तिनिराकरणंपुनरुक्तंपूर्वंतत्पुरुषेतन्निरासात्तथापिपूर्वमुत्तरपदार्थप्रधानेराजपुरुषादौतन्निराकरणंपूर्वपदलक्षणयाइहचपूर्वपदप्रधानेर्धपिप्पल्यादितत्पुरुषउत्तरपदलक्षणयातन्निराकरणमितिभेददृपौनरुक्त्यमितिध्येयं.वैयाकरणमतंदूषयति.इत्थंचेति.पदशक्त्यैवेति.समासघटकीभूतपदशक्तिलक्षणाभ्यामित्यर्थः.आसत्तियोग्यताकांक्षेति.मूलोदापत्तेःस्वरूपसत्याएवकारणत्वंलभ्यते.ननुयोग्यताज्ञानादिवदासत्तिज्ञानस्यज्ञानपदस्यसमासघटकत्वेनसमासाघटकासत्तिपदार्थेनान्वयात्स्वरूपलभ्याश्चासत्तेःकारणत्वंनसंभवति.गिरिर्भुक्तमित्यादौगिरिपदाग्निमत्पदयोर्व्यवधानक्रमेणशाब्दबोधोदयेनव्यभिचारा

दि॰कं॰ दतोमूलस्थमासत्तिपदमासत्तिज्ञानपरतयाव्याचष्टे. आसत्तिज्ञानमिति. आसत्तिर्योग्यतेतिविसर्गशून्यंपा
ठस्तुकत्रुरेव. ननुसन्निधानेनुपदस्यासन्निरुच्यतइतिमूलोक्तस्यासत्तिलक्षणस्यगिरिर्भुक्तमित्यत्रातिव्याप्तिः
तत्रापिगिरिपदभुक्तपदयोरव्यवधानसत्वादतोव्याचष्टे. यत्पदार्थेति. अपेक्षितस्तात्पर्यविषयः तयोरि
ति. तयोःपदयोरित्यर्थः तादृशपदयोरव्यवधानमासत्तिस्तदुपस्थितिःकारणमित्यर्थः तथाचगिरिपदा
र्थभुक्तपदार्थयोरन्वयेनतात्पर्यविषयोपितुगिरिपदार्थाग्निमत्पदार्थयोरेवेतितयोरव्यवधानाभावान्ना
तिव्याप्तिरितिभावः तेनएतादृशयत्नस्यदृग्भीस्त्रनिर्वचनेन. ननुनीलोघटोऽस्तिघटइत्यत्रनीलपदार्थघट 164
पदार्थयोर्यत्रान्वयोवन्तुस्तात्पर्यविषयोनतुनीलपदार्थघटपदार्थयोस्तत्रनीलपदघटपदयोरासत्तिर्न्नः
स्यात्तदर्थयोरन्वयस्यतात्पर्यविषयत्वाभावादतस्तत्रेष्टापत्तिमाह. नीलोघटइत्यादिनानार्गिं. तत्रकथंनीलो
घटइतिशाब्दबोधइत्यतआह. भ्रमाच्छाब्दबोधइति. तथाचभ्रमाच्छाब्दबोधमात्रंनतुतत्रासत्तिरितिभावः न
नुतत्रयद्यासत्तिभ्रमस्तदाशाब्दबोधोपिभ्रमात्मकस्यात्तत्रचेष्टापत्तिघटेनीलस्यसत्वेनविषयबाधाभावात् ॥१२६॥

दासत्तिभ्रमाच्छाब्दभ्रमांगीकारे वासत्तिभ्रमाच्छाब्दभ्रम इति प्राचीनगाथाविरोध इत्यत आह॰ आसत्तिभ्रमेणेति॰ न क्षतिरिति आसत्तिभ्रमप्रयोजकत्वं किंतु॰ योग्यताभ्रमस्य आसत्तिभ्रमाच्छाब्दभ्रम इति प्राचीनगाथा न निर्युक्तिकत्वादमेद्ध्येयेति भावः क्वचित्पुस्तके न शाब्दबोध इत्यनंतरं नीलो घट इत्यतः पूर्वं तात्पर्यगर्भा आसत्तिरिति पाठः स च यत इत्यादिपूरणेन यतस्तात्पर्यगर्भा तात्पर्यविषयीभूतान्वयबोधविषयीभूतार्थबोधकपदाव्यवधानरूपा पूर्वं निरुक्ता आसत्तिरतो न शाब्दबोध इत्यर्थकतया व्याख्येयः पर्यन्तरकल्पमिति॰ न चोक्ताया आसत्तेः श्लोके: भावाद्विशेषदर्शने पदाव्यवधानबोधस्यापि तत्राभावाच्छाब्दभ्रमं न स्यादिति वाच्यं॰ श्लोकादेर्योजनावाक्यादेवान्वयबोधोपगमात्॰ नव्यास्तु उक्तासत्तिर्मौनिश्लोकेन संभवति॰ तत्र पदाभावेन पदाव्यवधानासंभवात्॰ उक्तासत्तिर्ज्ञानविलंबेन शाब्दबोधविलंबाभावाच्च॰ किंत्वव्यवधानेन वृत्त्यापदजन्यपदार्थोपस्थितिरासत्तिस्तत्र चाप्यव्यवधानांशो न निवेश्यते॰ शाब्दबोधं प्रति पदजन्यपदार्थोपस्थितेः कारणतया व्यवधानेनैव न संभवात्तस्माद्वृत्त्यापदजन्यपदार्थोपस्थितिरासत्तिरिति प्राहुः॰ तन्न व्यवधानेन पदोपस्थितिः शाब्दबोधे

टि॰ कै॰ कारणमित्यायुक्तं अनेकपदघटितवाक्यस्थले अव्यवधानेन पदोपस्थित्यसंभवादित्याशंकते नचेति·
अव्यव्यवधानेनोपस्थितेरिति· अभेदेप्यव्यवधानसंभवादिति भावः ननु तद्विशेष्यकतत्प्रकारस्मृतिं प्रति
तद्विशेष्यकतत्प्रकारकसंस्कारत्वेन जनकत्वात्कथं प्रत्येकपदसंस्कारैर्नानापदविशेष्यकं स्मरणं
भिन्नविषयकत्वादत आह· नानासन्निकर्षैरिति· संभवादिति· तथा च· घटचक्षुःसंयोगस्य पटप्रत्यक्षांशे
कारणत्वाभावेपि घटचक्षुःसंयोगपटचक्षुःसंयोगाभ्यामेकं प्रत्यक्षं· तथा तत्तत्पदगोचर
संस्कारस्य भिन्नविषयकत्वांशे जनकत्वाभावः नानावर्णैरिति· नानावर्णानां प्रत्येकसंस्कारैरित्यर्थः· एकस्मरणं 165
नानावर्णगोचरमेकस्मरणं· पदस्मरणवदाशुतरविनाशिनां क्रमिकाणां पदजन्यपदार्थैपिस्थितानामपि
मिलनासंभवात्सर्वत्र शाब्दबोधे पदजन्यपदार्थोपस्थितिः समूहालंबनात्मिकैव·
कारणं· एवं च· सर्वत्र युगपदेव· सकलपदार्थानां विशेष्यविशेषणमिति न्यायेनैव शाब्दबोधो ननु विशिष्टस्य
वैशिष्ट्यमिति रीत्यान अनेकविशेषणतावच्छेदकप्रकारनिर्णयस्यापूर्वमभावादिति प्राचीनमतं· ॥२०॥

स्वघटकार्थान्वयबोधप्रयोजकाकांक्षावत्वेन गृहीतं स्वघटकार्थान्वयबोधजनकज्ञानविषयोऽस्मत्ताकं स्वघटकार्थान्वयबोधजनकोपस्थितिविषयो भवतितन्द
धं यैतान्वितः ४

प्रदर्शयति. परंत्वित्यादिना एकोदेवेति. ननु घटमानयेत्यादौ प्रथमं य घटीयाकर्मेनेत्येवं बोधस्तदनंतरं
च घटकर्मकानयनेत्यादिबोध इति क्रमेणास्यार्थः वृद्धायुवान इत्यस्य सानदाकुरित्यादि अत्र वृद्धयुवशिशु
भिः कपोतैः स्थिरतरचिरसन्निहितकोलोज्ञानां पदार्थानां साम्यं बोध्यं. केचिदित्यनेन सूचितमस्वरसं प्र
काशयन्मतान्तरमाह. परे त्विति. यद्यदिति. स्वार्थाकांक्षितं स्वार्थयोग्यं यद्यत्सन्निधानं प्रपद्यते. स्वार्थोप
स्थितिविषयो भवति तेन तेनैवान्वितः स्वार्थः पदैः प्रथममनुभाव्यतेनन्तरं च महावाक्यार्थबोध इत्यर्थः. ए
वं च. पूर्वोक्तं चसमूहालंबनात्मकं पदार्थस्मरणं विनापि निर्वाह इति भावः. न च घटमानयेत्यादौ चरमपदार्थ
स्मृतिकाले घटादिपदार्थस्मृतेर्नाशात्समूहालंबनस्मृतिरावश्यकीति वाच्यं. तत्र घटस्मरणनाशेपि घ
टीयाकर्मतेत्याकारकावान्तरशाब्दबोधस्यैव पदजन्यपदार्थोपस्थितित्वेनैवेति. एवं चैतन्मते खंडवाक्या
र्थबोधपूर्वपूर्वक एव महावाक्यार्थबोधः अत एव सर्वत्र खंडवाक्यार्थबोधरूपस्य विशेषणतावच्छेदक
प्रकारकविशेषणाभिज्ञयस्य पूर्वसत्त्वाद्विशिष्टस्य वैशिष्ट्यमितिरीत्यैव महावाक्यार्थबोधं उपपद्यत.इ
२ त्वेन तेनैव घटकर्मकानयनेत्यादिमहावाक्यार्थबोधनिर्वाहात्. नहि पदजन्यपदार्थोपस्थितित्वेन शाब्दबोधहेतुत्वमपि तु शाब्दबोधसाधा
स्थि धा

रणतादृशोपस्थिति २

दिन.क. ति. यत्र खंडवाक्यार्थबोधनाशोत्तरं महावाक्यार्थबोधस्तत्रापि खंडवाक्यार्थसमानाकारं स्मरणं कल्पयि
त्वा विशिष्टवैशिष्ट्यानवगाहि स्यात्. तथैव पदार्थस्मृस्येति. अत्रेदं बोध्यं. यत्र खंडवाक्यार्थबोधानन्तरं चर
मपदस्मृतिस्तदुत्तरं तदर्थस्मृतिस्तत्र खंडवाक्यार्थानुभवस्य नाशात् समूहालंबनस्मरणमावश्यकं. ए
वं च. यत्रेन विशिष्टवैशिष्ट्यबोधसामग्री तत्र विशेष्ये विशेषणमिति रीत्यैव बोधः यत्र तु सामग्री तत्र विशि
ष्टवैशिष्ट्यमिति रीत्येत्यन्यत्र विस्तरः. अर्थान्तरवाक्यार्थबोधेनान्तरवाक्यार्थस्मरणमेव कारणं. ननु समू
हालंबनस्मृतिः नहि शाब्दबोधे पदजन्यपदार्थोपस्थितिः कारणं लाघवेन पदार्थोपस्थितेरेव हेतुत्वात्. अ 166
त एव च. द्वारमित्यादौ न पिधेहीति पदाध्याहारः किंत्वर्थाध्याहार एवेति प्राभाकरमतं दूषयति. इदन्तु बो
ध्यमित्यादिना पदजन्येति. पदार्थोपस्थितिमात्रस्य हेतुत्वे प्रत्यक्षादिना उपस्थितस्यापि शाब्दबोधापत्ति
रिति भावः. ननु प्रत्यक्षोपस्थितकलापादेः शाब्दबोधाभावस्तात्पर्याभावान्नत्वसत्त्वेत्विष्टापत्तिरत आह. किंचे ||१२६||
ति. तेनैव सहेति. द्वारं कर्मत्वं. पिधानं कृतिरिति वाक्या द्वारकर्मकपिधानान्वयबोधानुदयात् द्वारं पिधेहीत्या

कपालोनाघअन्नविशेषः २

तत्कारणीभूतान्वयेन हेतुत्वंबोधविन्दुवाकारः ३

नुपूर्वीरूपाकांक्षाज्ञानहेतुत्वस्यावश्यं वाच्यतया तादृशाकांक्षाज्ञानार्थं विधेहीति पदाध्याहार आवश्यक
इति भावः ननु द्वारकर्मकपिधानानुकूलकृतिबोधे आनुपूर्वीविशेषस्य द्वारपदोत्तरस्य पिधेहीत्याकारकस्य
वा ज्ञानं कारणमतो न द्वारं कर्मत्वं पिधानं कृतिरित्यस्माच्छाब्दबोधापत्तिः तथा च द्वारमित्युक्ते पिधेहीति प
दस्याध्याहारः न च तादृशानुपूर्व्योः परस्परं व्यभिचारः अव्यवहितोत्तरत्वस्य कार्यतावच्छेदके निवेशात्
न च यत्र द्वारं पिधानं कृतिरिति द्वारं कर्मत्वं पिधेहीति वोक्तं तत्रापि द्वारकर्मकपिधानानुकूलकृतेः शा
ब्दबोधापत्तिरिति वाच्यं इष्टापत्तेः प्रत्यक्षानुमानादिनोपस्थितस्येव निराकांक्षपदेनोपस्थितस्यापि बोधे
बाधकाभावादत आह तथा पुष्पेभ्य इति स्पृहयतीत्यादिना क्रुध्यति द्रुह्यतीर्ष्यत्यसूयत्यादिपरिग्रहः चतुर्थ्य
नुपपत्तेरिति कर्मत्वार्थकचतुर्थ्याः स्पृहयतियोग एवानुशासनेन बोधनादिति भावः अत्रेदं चिंत्यं अस्त्वेवं
रीत्या क्वचित्पदाध्याहारस्तावतापि तज्जन्योपस्थितित्वेन न शाब्दबोधहेतुत्वं लाघवेन पदार्थोपस्थितित्वस्ये
व जनकतावच्छेदकत्वात् तथा च द्वारमित्यादौ कथंचिदुपस्थितस्य पिधानादेर्बोधे बाधकाभावादध्या

तत्२

।दि०क० हारपक्ष एवोचित इति. मूले पदार्थे तत्र तद्वत्वेत्यनेन तत्पदार्थे तत्पदार्थवत्वं योग्यतेत्युक्तं. तच्चायुक्तमनुपयु-
क्तं चेत्यस्मिन्स्वाधिकरणत्वाभाववत्ताज्ञानस्य शाब्दबोधाहेतुत्वाच्चेत्यतः प्रथमं पदमेकपदार्थपरं द्वितीयं.
च तत्पदमपरपदार्थपरमित्यभिप्रायेण व्याचष्टे. एकपदार्थ इति. योग्यताज्ञानस्य शाब्दबोधहेतुत्वे मान-
माह. तदज्ञानाभावाच्चेति. अपूर्वत्वादिति. सर्वत्र शाब्दबोधोत्पत्तेर्मनिश्चितत्वादित्यर्थः. क्वचित्संशयस्येति. सं-
शयनिश्चयसाधारणज्ञानयोग्यताज्ञानत्वेन हेतुत्वादिति भावः. अत एव निश्चयमपि दर्शयति क्वचिदि-
ति. जले घट इति प्रात्यक्षिकनिर्णयोत्तरभाविनि शाब्दबोध इत्यर्थः. न वास्त्विति. ननु अयोग्यनिश्चयस्य
प्रतिबंधकत्वेन तदभावत्वेन हेतुत्वं वाच्यं. तदपेक्षया लाघवेन योग्यताज्ञानहेतुत्वस्यैवोचितत्वादत आह. त- 167
दभावनिश्चयस्येति. बाधनिश्चयकालेपि लौकिकसन्निकर्षजन्यतद्विशिष्टबुद्धेरुदयादाह. लौकिकसन्निक-
र्षाजन्याजन्येति. शंखो न पीत इति निश्चयेपि पित्तादिदोषवशात्पीतः शंख इति प्रत्ययनोदयाद्दोषविशेषाज-
न्येत्युक्तं. शुक्तौ नेदं रजतमिति ज्ञानोत्तरं दोषजन्यस्येदं रजतमिति भ्रमस्य वारणाय विशेषेति. पित्तमण्डूक ।।१२८।।

घ२

स्मकुण्ठेणस्पर्शवद्द्रव्यप्रतियोगिकत्वमवगाहत इति भावः रूपादीनां पाक इति पाठे रूपादीनां परावृत्तिरित्य
र्थः पाकेन संभवतीति रूपादिपरावृत्तिफलकस्तेजःसंयोगो न संभवतीत्यर्थः रूपादिपरावृत्तिर्न संभवती
तियावत् रूपनाशं प्रतिसाक्षात्परंपरासाधारणसर्वावयवावच्छेदेन तेजःसंयोगस्य हेतुतया
ऽवयविनावष्टब्धेष्ववयवेषु रूपादिनाशो न संभवति तद्धेतोः सर्वावयवावयव्यवच्छेदेन तेजःसंयोगस्या
भावादिति भावः न च विद्यमानेऽपि घटादौ सर्वावयवावच्छेदेन तेजस्संयोगः कुतो नोत्पद्यत इति वाच्यं तथा
सति आरंभकसंयोगावच्छेदनावयविनि तेजस्संयोगोत्पादकाले तदवच्छेदेनावयवेष्वपि नोदनाभिघातयो
रन्यतरस्योत्पादनियमेनावयवेषु विभागहेतुक्रियोत्पादेनारंभकसंयोगनाशादवयवविनाशोत्पत्तेः न
चावयवेषु तेजोभिघातानन्तरं चमक्षण एवावयविनाशसंभवेन तत्पूर्वमवयविनि रूपादिनाशोत्पादा
भ्युपगमे बाधकाभाव इति वाच्यं तत्र पूर्वावयविनाशावयवान्तरोत्पादयोरावश्यकत्वात्पूर्वावयविनि रू
पादिपरावृत्तिजनकविजातीयतेजःसंयोगस्य मानाभावेनाकल्पनात् अवयवरूपनाशे आश्रयनाशस्य

दि० क०

हेतुत्वात्पाकजन्यत्वस्य तत्कार्यतावच्छेदककोटिप्रवेशे गौरवादवयविनाशं विना पाकेनावयविरूपनाशासंभवादवयविनीलादेरवयवनीलादेर्हेतुतायां व्यभिचारापत्त्या पाकेनावयविनीलाद्युत्पादसंभवाच्चेत्यभिप्रायः अवयविष्वनष्टेष्विति घटाद्यारंभककपालादिपरमाणुपर्यन्तेष्वग्निसंयोगेन पूर्वोत्तरीत्या घटादिद्व्यणुकपर्यन्तनाशासंभवादिति भावः स्वतन्त्रेषु कार्यद्रव्यध्वंसविशिष्टेषु ननु तत्र संस्थानभेदादि कथं न प्रतीयत इत्यत आह तेजसामिति व्यूहः संस्थानवैशेषमुत्पत्तिः प्रक्रिया द्व्यणुकनाशादिरूपाद्युत्पत्तिक्षणनिरूपणं क्रियत इति शेषः विभागजविभागानंगीकारे इति कारणाकारणविभागात् कार्याकार्यविभागवत्कारणमात्रविभागात् कारणाकारणविभागानंगीकार इत्यर्थः द्रव्यारंभकसंयोगप्रतिद्वन्द्विविभागजनकक्रियायास्पन्दनारंभकसंयोगप्रतिद्वन्द्विविभागजनकत्वनियमेमानाभावादिति भावः॥ अत्र ॥१४२॥

भेदनं भेदनाश इति यावत् ४

168

२

विभागग्रंथे वक्ष्यमाणविकसत्कमलभंगभियाउक्तनियमांगीकारस्यावश्यकः एवंच द्व्य
णुकारंभकपरमाणुक्रियया यत्र द्व्यणुकारंभकसंयोगप्रतिद्वंद्वि विभागो जनितस्तत्र
तत्र तया तत्परमाणुक्रियया न तत्परमाण्वाकाशादिसंयोगप्रतिद्वंद्विविभागोत्पत्तिसंभ
वतीति· नच· मास्तु तत्र परमाण्वाकाशविभागः का क्षतिरिति वाच्यं· तथासति नाशक
विभागाभावेन परमाण्वाकाशसंयोगस्य नित्यत्वापत्तेः एवंच· परमाण्वाकाशसंयो
गरूपस्य पूर्वदेशसंयोगस्य प्रतिबंधकस्य सत्वात्परमाणावुत्तरदेशसंयोगानु
त्पत्त्या परमाणुगतक्रियानाशानुपपत्तेश्चातः तादृशपरमाण्वाकाशादिविभा

दि०क० गजनकःपरमाण्वोर्विभागोवाच्यइत्यभिप्रायवानाह·तदंगीकारेत्विति·अनयोः
पक्षयोःप्रथमपक्षएवसम्यक्·यदवच्छेदेनकमलारंभकसंयोगःतदवच्छेदेन
क्रियानुत्पत्त्याचनविकसत्कमलभंगप्रसंगइतिध्येयं·तत्वेविभागजनकत्वे
कमत्वंकर्मलक्षणस्यातिव्याप्तिःसंयोगविभागयोरणॅपेक्षंकारणंकर्मेतिसूत्रस्य
संयोगस्यविभागस्यवानपेक्षंकारणंकर्मेतिलक्षणद्वयेतात्पर्यमित्यभिमानेनद्वि 169
तीयलक्षणस्यतत्रातिव्याप्त्यभिधानमिदं·वस्तुतस्तु·संयोगविभागयोरनपेक्षंका
रणकर्मेतिसूत्रंतत्रसंयोगस्यानपेक्षंकारणमित्युक्तौकारणाकारणस्यसंयोगेति ॥१४३
व्याप्तिस्तस्यकार्याकार्यसंयोगेकिंचिदनपेक्ष्यकारणत्वात्·एवंविभागस्यानपेक्षमित्युक्तौकार

णाकारणविभागेतिव्याप्तिरत[illegible]संयोगविभागयोरिति.अनपेक्षत्वंचस्वोत्तरोत्पन्नभावानपेक्षत्वं.अन्यथाकर्मणोपिसंयोगजननेद्रव्यस्यपूर्वसंयोगनाशस्यचापेक्षणादसंभवापत्तेः विभागासमवायिकारणसत्वेसतिसंयोगहेतुत्वंवानस्पूर्वदेशविभागस्तुनोत्तरदेशसंयोगकारणंव्यवहाराभावेनान्यथासिद्धेःसंयोगस्यविभागंप्रतिकारणत्वाभावादेवनासमवायिकारणत्वमितिनतत्रातिव्याप्तिःइत्थंचकारणमात्रविभागस्यपूर्वसंयोगनाशंद्रव्यनाशंचानपेक्ष्यकारणविभागजनकत्वेपिनातिव्याप्तिःतस्यविभागजनकत्वेपिसंयोगविभागोभयजनकत्वाभावादितिध्येयं.द्रव्यारंभकेसंयोगनाशविशिष्टंकालमपेक्ष्येति.द्रव्यारंभकसंयोगनाशोत्तरस्याधिकरणक्षणोत्तरक्षणइत्यर्थः कारणतातुद्रव्यारंभकसंयोगनाशत्वेनैवलाघवादितिध्येयं.एवमग्रेपिनवदशेकादशक्षणाः प्रक्रियाःक्रमेणोपपा[illegible]ति.तथाहीत्यादिना.परमाणौकर्मद्व्यणुकारंभकपरमाण्वोर्मध्येएकस्मिंपरमाणौकर्म.परमाण्वन्तरेणद्व्यणुकारंभकपरमाण्वन्तरेण.आरंभकेति.द्व्यणुकारंभकेत्यर्थः.ततःपरमाणौश्यामादिनाशइति.परमाणुगतरूपना

टि.क.

शंप्रति द्व्यणुकात्मकद्रव्यस्य प्रतिबंधकत्वात्तत्पूर्वश्यामनाशासंभवादिति भावः द्रव्यारंभकेति.
द्व्यणुकारंभकेत्यर्थः आरंभकेति. द्व्यणुकारंभकेत्यर्थः तद्विनाशमन्तरेणेति. द्व्यणुकनाशोत्प
त्तिक्षणोत्पत्तिकोत्तरसंयोगेन श्यामनाशक्षण एव पूर्वक्रियानाश इति भावः परमाणौ क्रियां
तराभावादिति. तस्मिन्परमाणौ क्रियान्तरानुभवादित्यर्थः अत्र हेतुमाह. कर्मवतीति. कर्मवति
कर्मान्तरानुदयेन कर्मोत्पत्तौ कर्मणः प्रतिबंधकत्वकल्पनादिति भावः गुणोत्पत्तिमन्तरेण कर्मा 170
नुत्पत्तौ हेतुमाह. निगुणे यद्यपि द्रव्योत्पत्तौ स्पर्शस्य प्रयोजकत्वं न तु द्रव्यारंभानुगुणक्रियायां
मानाभावात्तथापि तादृशक्रियायामदृष्टवदात्मसंयोगस्य हेतुत्वात्तददृष्टं श्यामनाशक्षणे यत्र
नोत्पन्नमपि तु रक्तोत्पत्तिक्षण एवोत्पन्नं तत्र रक्तोत्पत्तिक्षणे तादृशक्रियोत्पत्तिर्न संभवतीत्यपि
प्राचीनासंगतिः कारणमात्रविभागस्य कारणाकारणविभागजनकत्वाभावपक्ष एव परमाइ ॥१४८॥

एतन्नरेकर्मचिन्नंविनैवद्यघान्नरैः३क्षणेप्रक्रियोक्तासाचनिर्गुणेद्रव्यारंभानुगुणक्रियोत्पत्तौबा
धकाभावेनतरक्षोत्पत्तिक्षणएवद्रव्यारंभानुगुणक्रियोत्पत्तिःसंभवतीत्यभिप्रायेनेसमर्थनीया·
विभागेनविभागजननइति·कारणमात्रविभागेनकारणाकारणविभागजननेसतीत्यर्थः·वि
भागजविभागाविति·आरंभकसंयोगनाशस्यतृतीयक्षणएवोत्पन्नतयाचतुर्थक्षणेपरमाण्वा
काशविभागःसंभवतीतिभावः·ततःश्यामनाशपूर्वसंयोगनाशाविति·परमाणुश्यामनाशपरमाण्वा
काशसंयोगनाशावित्यर्थः·परमाणुश्यामनाशंप्रतिद्व्यणुकनाशस्यहेतुत्वात्तत्पूर्वंपरमाणुश्यामना
शासंभवादितिभावः·रक्तोत्पत्त्युत्तरसंयोगाविति·उत्तरसंयोगंविनापूर्वकर्मणोनाशासंभवेनद्रव्यारं
भानुगुणक्रियानुत्पत्तेरितिभावः·एवमग्रेपि·अत्रएवाग्निःसंयोगोद्व्यणुकनाशकःसएवश्यामनाशे
रक्तोत्पादेचहेतुरितिकेषांचिन्मतं·पुनरप्यंतरसंयोगादितिभाष्यविरुद्धंनादरणीयमित्यभिप्रेत्याह·
मध्यमशब्दवदिति·एकस्मादितिद्व्यणुकनाशकादेकस्मादित्यर्थः·यथामध्यशब्दात्पूर्वशब्दनाशोत्तर

दि०क० शब्दोत्पादो भवतस्तथैकस्माद् द्व्यणुकनाशकादग्निसंयोगात् श्यामनाशरक्तोत्पादौ न भवत इत्यधिके दृष्टान्तः
तावत्कालमिति. श्यामनाशोत्पत्त्यवहितपूर्वक्षणपर्यंतमित्यर्थः अग्रे. द्व्यणुकनाशकाग्निसंयोगस्य. एव
मग्रेपि. अस्थिरत्वादिति. यदा परमाणावग्निसंयोगाद् द्व्यणुकासमवायिकारणसंयोगविनाशकं परमा
णौ कर्म तदैव नोदनाभिघातान्यतरात्मकस्याग्निपरमाणुसंयोगस्य जनकं यदग्निकर्म तस्य विनाशः क
र्मणः स्वजन्यसंयोगविनाश्यत्वात् तदुत्तरक्षणे पुनरग्नौ कर्म कर्मकारणीभूतवेगाभिघातादेः समानाधिक
रणकर्मध्वंसरूपसहकारिणस्सत्वात्. ततो विभागः ततो द्व्यणुकनाशसमकालमग्निपरमाणुसंयोग 17-1
स्य नाशेन श्यामरूपनाशोत्पत्त्यवहितपूर्वक्षणपर्यन्तं तस्यास्थिरत्वादिति भावः ननु मास्तु. द्व्यणुकनाशका
ग्निः संयोगस्य परमाणुश्यामनाशकत्वं रक्तोत्पादकत्वं च परन्तु द्व्यणुकनाशसमकालोत्पन्नाग्न्यन्तरसं
योगस्य परमाणुश्यामनाशकत्वं रक्तोत्पादकत्वं चास्तु न च श्यामनाशकतावच्छेदकरक्तोत्पादकतावच्छेद
कजात्योः सांकर्यापत्तिरिति वाच्यं. उत्पादकतावच्छेदकजात्या नाशकतावच्छेदकजातिव्याप्यत्वोपगमात् ॥२४५॥

तत्राह. किंचेति. नाशक एव यद्युत्पादक इति. एवकारेण नाशकतावच्छेदकवह्नित्वाघटितत्वरूपव्याप्तेरुत्पादक
तावच्छेदके लभ्यते. तथा च. यद्युत्पादकतावच्छेदकं नाशकतावच्छेदकव्याप्यं तदेत्यर्थः. नष्टरूपादेरूपपरंप
रायां नष्टायां अग्निनाशे चरमाग्निसंयोगनाशे परमाणौ पाकेन रूपोत्पत्तिस्थले प्रथमाग्निसंयोगादिना
रूपोत्पत्तिस्तेनैव रूपनाशः पुनरग्निसंयोगान्तरं पुनः रूपोत्पत्तिः संभवेपि चरमाग्निःसंयोगोत्तरं तेन रूपोत्पा
देतद्रूपस्य तेनैवाग्निःसंयोगेन नाशसंभवात्तदग्निःसंयोगस्यापि नाशे रूपान्तरोत्पादासंभवेन नीरूपश्चिरंप
रमाणुः स्यादित्यर्थः. न च चरमाग्निःसंयोगेन विनश्यदवस्थेनैव रूपोत्पत्तिस्तदुत्तरक्षणे च नतद्रूपनाशः पूर्व
क्षणे अग्निसंयोगाभावादिति वाच्यं. असमवायिकारणस्य कार्यसहभावेनैव हेतुतायाः न्यायवैशेषिकसि
द्धान्तसिद्धतया विनश्यदवस्थेन चरमाग्निसंयोगेन रूपोत्पादासंभवादिति. परमाणुरितिवैशेषिकमताभि
प्रायेण न्यायनये पूर्वोक्तरीत्या घटादेरपि नीरूपत्वप्रसंगो बोध्यः. ननु रक्तोत्पादकतावच्छेदके वैजात्यं श्यामना
शकतावच्छेदके वैजात्यस्य व्याप्येति न ब्रूमः परन्तु तयोः वैजात्ययोरभेदं तेन न सांकर्यमत आह. उत्पादकस्येति.

क्वचिद्रक्ततमतारता ३

दि०क० येन्नाशकउत्पादकइतियोजनानाशकतावच्छेदकमेवयद्युत्पादकतावच्छेदकंतदेत्यर्थःरक्तान्तरतानस्यादि
तिअयंभावःरूपनाशकतावच्छेदकंविलक्षणाग्निसंयोगत्वंतदेवयद्युत्पादकतावच्छेदकंतदाकार्यतावच्छेद
कमपिसामान्यतःपृथिवीपरमाणुरूपत्वंत्वयावाच्यं.तथासतिक्वचिद्रक्ततारतापरमाणौनस्यात्.कार्यवै
चित्र्यस्यकारणतावच्छेदकभेदाधीनत्वादिति.सिंदूरादौरक्ततारतम्यस्यानुभविकतयान्त्यपरमाणुषुत ३
स्यावश्यंभावादितिभावः इदंचपूर्वरूपनाशकाग्निसंयोगमात्रस्यान्तररूपहेतुत्वमित्यभिप्रायेणपुनरन्य
स्मादग्निसंयोगादितिभाष्यानुरोधेनचोक्तं.वस्तुतोरक्ततारतम्यस्यपूर्वरूपविशेषध्वंसकृतत्वाद्भाष्यस्यद्व्य 172
णुकनाशकाग्निसंयोगापेक्षयान्यपरत्वादुत्पादविनाशकयोरग्निसंयोगयोरेकत्वानेकत्वेनियमएवेति ३
ध्येयं.परमाण्वन्तरेति.द्व्यणुकनाशकक्रियावत्परमाणुभिन्नद्व्यणुकान्तरारंभकपरमाणावित्यर्थः कर्मवि
तनादिति.द्व्यणुकारंभकसंयोगनाशाद्युत्पादिक्षणेद्व्यणुकान्तरारंभककर्मचिंतनादित्यर्थः पंचमादीत्यत्रा
दिनाषष्ठसप्तमाष्टमक्षणानांपरिग्रहः इत्यपेक्षणेति.ननुयत्रैकस्मिन्परमाणावग्निसंयोगसमका ॥१४५॥

स्व२ पि२

लंपरमाण्वंतरेकर्मोत्पत्तिस्तदुत्तरक्षणेषुक्रमेणैकत्रक्रियाविभागपूर्वसंयोगनाशद्व्यणुकनाशाःअपरत्र
विभागपूर्वसंयोगनाशोत्तरसंयोगोत्पत्तिद्व्यणुकोत्पत्तिरूपोत्पत्तयस्तत्रद्विक्षणाः एवंयत्रैकस्मिन्परमा
णौकर्मोत्पत्तिसमकालंपरमाण्वंतरेकर्मोत्पत्तिस्तत्रत्रिक्षणा. एवंयत्रैकस्मिन्परमाणौविभागसमकाले
ण्व४परमांन्तरेकर्मोत्पत्तिस्तत्रचतुःक्षणापिसंभवतिप्रक्रियेतिचेन्न. द्व्यणुकनाशमन्तरेणपरमाणौनश्यामा
दिनिवृत्तिस्तामंतरेणचरक्तोत्पत्तिर्नसंभवतीत्युक्तप्रायं. इत्थंचद्व्यणुकनाशक्षणेपरमाणुश्यामनाशक्षंः
णेरक्तोत्पत्तिक्षणोवाद्व्यणुकान्तरोत्पत्तौद्वित्रिचतुःक्षणाप्रक्रियावाच्यानचैतेषुक्षणेषुद्व्यणुकान्तरोत्पत्तिःसं
भवतितथासतितत्पूर्वक्षणेषुपरमाणोररक्तत्वेनतदारब्धद्व्यणुकेनौत्पेक्षतिविरहेणत्रिक्षणापिसंभव
तिरूपान्यन्तरमहत्त्वस्यैवरूपादेःरूपाद्युत्पादकत्वांगीकारेत्रिक्षणप्रक्रियायाःसंभवेपिचतुःक्षणासंभ
वत्येवरक्तोत्पत्तिक्षणेद्व्यणुकोत्पत्त्याउत्तरक्षणेनत्ररक्तोत्पादसंभवादित्युक्तं. खलमतंनादरणीयं. रूपा
दिमतएवरूपादिमद्द्रव्यारंभकत्वमितिसिद्धान्तविरोधात्. द्विक्षणप्रक्रियानुकस्यापिमतेनसंभवत्येव.

दि०रु० पूर्वद्व्यणुकस्य प्रतिबंधकतया द्व्यणुकनाशक्षणे द्व्यणुकान्तरोत्पादासंभवादिति ध्येयं. अवयविन्यवयविनाप
रमाणुपरिग्रहः तेषां नैयायिकानां. अवयवक्षणाः. अवष्टब्धेष्वपीति. अवयविनावष्टब्धेष्वपीत्यर्थः यावद्रूपादिप
रावृत्तिः नविरुध्यत इति. साक्षात्परंपरासाधारणसकलावयवावच्छेदेन तेजःसंयोगस्य रूपादिनाशहेतुत्वे
मानाभावेनारंभकसंयोगावच्छेदेन विजातीयतेजःसंयोगादेव रूपादिनाशसंभवेप्यारंभकसंयोगावच्छे
देन तेजःसंयोगस्याभिघातादेस्तदानीं तत्र सद्भावे मानाभावेन पूर्वोक्तरीत्यावयविनाशस्याप्रसक्तेस्सर्वाव
यवावच्छिन्नतेजःसंयोगस्य रूपादिनाशकत्वेपि नाशकतावच्छेदकवैजात्यस्य नोदनात्वाभिघातत्वादिविरुद्धत्वे 173
नांगीकरणीयतया नोदनाभिघातभिन्नतेजःसंयोगाद्रूपादिनाशेपि तेनावयविनाशस्यासंभवात्. अ
स्तु वा रूपादिनाशकतावच्छेदकवैजात्यस्य नोदनाभिघातत्वव्याप्यत्वं. तथाप्यवयव्यभिघातादिकाले व
यवाभिघातोत्पादनियमे मानाभावः. आस्तां वा. तथा नियमस्तथाप्यवयवाभिघातादेर्नियमतोऽव्यारंभ
कसंयोगविरोधिविभागहेतुक्रियाजनकत्वे मानाभावएव. विभागंप्रति क्रियायास्तत्र प्राक्कॢप्तत्वेनैव हेतु ॥१४२॥

तयातत्क्रियाधीनविभागं प्रति तत्पूर्वदेशस्य विशिष्य हेतुतया च तत्रान्यक्रियायास्तादृशविभागहे
तुत्वासिद्धेरिति भावः यदप्युक्तं वैशिषिकैरवयविरूपं प्रत्यवयवरूपं हेतुतायां व्यभिचारापत्त्या नावय
विनि पाके नरूपोत्पाद इति तदपि न. अवयवरूपादेर्विजातीयरूपादिकं प्रत्येव हेतुतया व्यभिचाराप्रस
क्तेः एतेनावयविरूपनाशश्वयनाशहेतुतायां व्यभिचारापत्त्या पाकेनावयविरूपनाशासंभव इत्यपा
स्तं. आश्रयनाशजन्यतावच्छेदककोटौ वैजात्यस्य निवेशनीयत्वादिति. अवयविपाकानभ्युपगमे साध
काभावमुक्त्वा तत्र बाधकमप्याह. अनन्तेति. इत्थं च. अवयविविनाशानंगीकारे च प्रत्यभिज्ञानस्यादिति भा
वः कालादावतिव्याप्तिमाशंक्याह. साधारणमिति. वस्तुतो गगने संख्यात्वे तत्प्रकारको व्यवहारस्तत्प्रकारकं
प्रमात्मकं ज्ञानं. तद्धेतुस्तद्विषय इत्यर्थान्न कालादावतिव्याप्तिः तत्रापि संख्यात्वं जातिरेव लक्षणमितरे तु संख्याइ
त्वं जातौ प्रमाणनयोक्तं. एवमग्रेऽपीति ध्येयं. द्वित्वादय इति. एकत्वान्यसंख्यामात्रमपेक्षाबुद्धिरूपनिमित्तकार
णजन्यमित्यर्थः असमवायिकारणं तु द्वित्वं प्रति समवायिगतयावदेकत्वमिति ध्येयं. ननु योग्यद्वित्वादा
प्रत्यभिज्ञासंगच्छत इति. पूर्वावयविनाशे तदुत्तरोत्पन्नावयविपूर्वावयविनोरभेदाभावे नाभेदावगाहि ५

बुद्धि२

दि०.क० वपेक्षाबुद्धेर्हेतुत्वेप्ययोग्यगुरुत्वादौ तद्धेतुत्वे मानाभाव इति. चेन्न. योग्यद्वित्वादेरपेक्षाबुद्धिजन्यत्वेनातींद्रिय
द्वित्वादावप्यनेकसंख्यात्वादिना तदनुमानात्. अथापेक्षाबुद्धेर्द्वित्वहेतुत्वे कथमविरलक्रमेण यावदपेक्षा
बुद्धिसत्त्वं न द्वित्वाद्युत्पत्तिः अत्र केचित्. अपेक्षाबुद्धेरुत्पत्तिसंबंधेन हेतुत्वान्न यावदपेक्षासत्त्वं. द्वित्वाद्युत्प
त्तिरिति. तन्न धारावाहिपेक्षाबुद्धिभिः सर्वत्र धारावाहिकद्वित्वाद्युत्पत्तेर्दुर्वारकत्वात्. भगवदपेक्षाबुद्ध्या
धारावाहिकद्वित्वाद्युत्पत्तेर्दुर्वारत्वाच्च. तद्बुद्धेर्नित्यत्वेनोत्पत्तिसंबंधेन तद्धेतुत्वस्य दुर्वचत्वात्. वस्तुतस्तु
तत्तत्पुरुषीयापेक्षाबुद्धिजन्यानेकसंख्यात्वाद्यवच्छिन्नं प्रति तत्तत्पुरुषीयापेक्षाबुद्धिजन्यानेकसंख्यादेः प्र 174
तिबंधकत्वाभ्युपगमान्न यावदपेक्षाबुद्धिसत्त्वं द्वित्वाद्युत्पत्तिरिति प्रत्येकं घटादाविति. तथा चानेकाश्रयप
र्याप्तेति. मूलमसंगतमिति भावः. नन्वेकत्वस्य न्यूनवृत्तितया द्वित्वाधारणानवच्छेदकत्वान्न तथाप्रत्यय इत्य
त आह. एकोन द्वावितीति. एकत्वावच्छेदेन द्वित्ववद्भेदाभावादेकत्वादेर्न्यूनवृत्तितया द्वित्ववद्भेदानवच्छे ॥१४८॥

तथा च तादृशप्रतीतेर्द्वित्ववद्भेदाधारतावच्छेदकत्वमेकत्वे विषयः किंतु पर्याप्तिसंबंधेन द्वित्वं न तद्भेदो वा एकत्वावच्छिन्ने प्रकार ।१

दकत्वादिति भावः अनेकाश्रय इति. उभयोर्द्वाश्रय इत्यर्थः इत्थं च पर्याप्तिसंबंधेन द्वित्वस्य प्रत्येकमभावा
न२ देको द्वावित्यप्रत्ययस्यैको न द्वाविति प्रत्ययस्य चोपपत्तिरिति भावः अत एव उभयादेः प्रत्येकानतिरि
क्ततया प्रत्येकमपि संबंधेन द्वित्वमस्त्येवेति पर्याप्त्यंगीकारे एको द्वावित्यप्रत्ययस्यैको न द्वाविति प्रत्ययस्य च
कथमुपपत्तिः यदि चैको न द्वाविति प्रतीतिबलाद्द्वित्ववद्भेदावच्छेदकत्वं स्वरूपसंबंधविशेषरूपमेकत्वे स्वी
क्रियते ननु द्वित्वावच्छेदकत्वमेको द्वावित्यप्रत्ययप्रत्ययादिति विभाव्यते. तदा समवायपक्षेपि तुल्यमिति प
र्याप्त्यंगीकारो निरर्थक इति चेन्नाहुः आकाशाविति वाक्यस्य प्रामाण्यापत्त्या पर्याप्त्यंगीकार आवश्यकः।
न च समवायेन व पर्याप्तिसंबंधेनापि द्वित्वस्याकाशे सत्वात्पर्याप्त्यंगीकारेपि न द्वाक्यस्य प्रामाण्यं दुर्नीरमि
ति वाच्यं उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेरेव द्वित्वसंबंधतोपगमात् आकाशत्वव्याप्यद्वित्वप
र्याप्तेरप्रसिद्धत्वात् पर्याप्ते द्वित्वस्वरूपतया तस्य घटादावपि सत्वात्. न चोद्देश्यतावच्छेदकव्याप्यत्वविशि
ष्टसमवायस्य द्वित्वसंसर्गतां स्वीकृत्याकाशाविति प्रयोगवारणसंभवादलं पर्याप्त्येति वाच्यं. तथा सति घ

दि०क० टावितिप्रयोगस्यप्रामाण्यानुपपत्तेः समवायस्यैकत्वेन घटत्वव्याप्यसमवायस्याप्रसिद्धेरित्यन्यत्रविस्तरः अपे
क्षाबुद्धिनाशाच्चैतेषां नाश इति मूलस्य तृतीयक्षणे अपेक्षाबुद्धिनाशाच्चतुर्थक्षणे द्वित्वादीनां नाश इति नार्थः परन्तु
चतुर्थक्षणे अपेक्षाबुद्धिनाशः पंचमक्षणे इत्यर्थ इति ज्ञापनाय वैशेषिकप्रक्रियां प्रदर्शयति. प्रथममित्यादिना
द्वित्वत्वप्रत्यक्षं विशिष्टप्रत्यक्षं द्वित्वत्वविशिष्टलौकिकप्रत्यक्षं. अन्यथा अपेक्षाबुद्धेर्द्विक्षणमात्रावस्थायि
त्वस्यैव नाश इति. द्वित्वस्य नाश एवेत्यर्थः ननु तदानीं द्वित्वाभावेपि तत्पूर्वक्षणे द्वित्वसत्वात् द्वित्वप्रत्यक्षानुप
पत्तिरत आह. विद्यमानस्यैवेति. संबद्धं वर्त्तमानं च गृह्यते. चक्षुरादिनेत्यनुरोधाल्लौकिकप्रत्यक्षंप्रतिद्वित्वा 175
स्पसं.१८ देर्विषयस्य कार्यसहभावेन हेतुत्वादिति भावः ननु योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवर्त्तिविशेषगुणत्वेन सं.२
हेतुतया अपेक्षाबुद्ध्युत्तरक्षणोत्पन्नस्मृत्या संस्कारेण वापेक्षाबुद्धिर्बुद्धेर्नाशः केन वारणीय इत्याशंकामुपहार
व्याजेन परिहरति. तस्मादिति. द्वित्वप्रत्यक्षादिकमिति. द्वित्वे द्वित्वत्वनिर्विकल्पकमित्यर्थः आदिना द्वित्वविशिष्टप्र
त्यक्षादिप्रत्यक्षपरिग्रहः योग्यविभुविशेषगुणत्वस्य स्वत्वस्य चानुगताभावेन स्वोत्तरोत्पन्नगुणत्वस्य ||४२||
स्य।

नुगतस्याभावान्नतद्व्यक्तित्वेनैवानाश्यनाशकभावस्यनाच्यतयाद्वित्वत्वविशिष्टप्रत्यक्षरूपकार्यानुरोधेनंद्वित्व
त्वनिर्विकल्पकस्यैवनद्व्यक्तित्वेनापेक्षोपेक्षाबुद्धिनाशकत्वंकल्प्येतनतुद्वितीयक्षणोत्पन्नस्मरणादेरितिभावः न
नुद्वित्वत्वविशिष्टद्वित्वप्रत्यक्षमुपनीतभानात्मकमेवास्तुश्रलंनतदुपपत्तयेत्रिक्षणावस्थायित्वकल्पनेनापेक्षाबु
द्धेः न चद्वित्वत्वांशेउपनीतभानसंभवेपिद्वित्वांशेनोपनीतभानत्वमुपनीतंविशेषणतयैवेतिनियमादितिवाच्यं.
यतोद्वित्वत्वविशिष्टद्वित्वप्रत्यक्षंहिजायमानंद्रव्यांशेद्वित्वप्रकारकमेवभवतिद्वेद्रव्येइत्याकारकं.निर्विकल्पको
त्तरक्षणेद्वेद्रव्येइत्याकारकंद्वित्वत्वविशिष्टद्वित्वप्रकारकंप्रत्यक्षंनसंभवतितत्पूर्वंविशेषणतावच्छेदकद्वित्वत्व
प्रकारकद्वित्वज्ञानासंभवादितितुनविशेष्येविशेषणमितिरीत्यैवद्वेद्रव्येइत्याकारकप्रत्यक्षसंभवादितिचेन्न.
निर्विकल्पकस्याप्रत्यासत्तितयाद्वेद्रव्येइत्युपनीतभानासंभवात्तस्यापनीतभावरूपत्वेनतदुत्तरद्वित्वंसाक्षात्क
रोमीत्यनुव्यवसायानुपपत्तेश्चतस्मात्त्रिक्षणावस्थायित्वमपेक्षाबुद्धेरितिवैशेषिकानामाशय.नव्यास्तुउत्प
त्स्यमानंद्वित्वत्वसामान्यलक्षणयापूर्वमनुभवाद्द्वित्वोत्पत्तिसमयएवद्वित्वत्वप्रकारकमुत्पद्यमानद्वित्वस्मरणं

वर

तेनन्तदुत्तरक्षणे इदानीं द्वे द्रव्ये इति विशिष्टवैशिष्ट्यावगाहि लौकिकप्रत्यक्षसंभवादलमपेक्षाबुद्धेस्त्रिक्ष
णस्थायित्वेन अन्यथा सुखाद्युत्पादकद्वितीयक्षणे सुखत्वनिर्विकल्पकमनन्तरक्षणे च सुखनाशादहं सुखी
ति लौकिकप्रत्यक्षं न संभवतीति सुखशब्दादेरपि त्रिक्षणावस्थानप्रसंगादिति प्राहुः नन्वपेक्षेक्षाबुद्धेर्द्वित्वो
त्पादकत्वे चैत्रीयापेक्षाबुद्धिजन्यद्वित्वस्यापेक्षाबुद्धिशून्येन मैत्रेणाग्रहणापत्तिः सन्निकर्षादिघटितसामग्र्याः
सत्वात्तद्वारणाविषयतासंबंधेन तत्पुरुषीयप्रत्यक्षेन भिन्नपुरुषीयापेक्षाबुद्धिजन्यद्वित्वादेस्तादात्म्येन प्रतिबं
धकत्वकल्पने च गौरवमत आह.-अत एवेति. पूर्वोक्तयुक्त्या अपेक्षाबुद्धेर्द्वित्वोत्पादकत्वस्यावश्यकत्वादेव तेनैव
गृह्यत इति कल्प्यत इति. तद्भिन्नेन न गृह्यत इति कल्प्यते इत्यर्थः तथा चान्यथानुपपत्त्या पूर्वोक्तप्रतिबध्यप्रतिबंधक
काभावकल्पनागौरवं तद्दोषायेति भावः ननु कालान्तरे द्वित्वप्रत्यक्षवारणाय द्वित्वं प्रत्येवापेक्षाबुद्धेर्हेतुत्वमस्तु.
ननु द्वित्वं प्रतीत्यायुंकेतेन चेति. लाघवेनेति. द्वित्वप्रत्यक्षत्वापेक्षया द्वित्वत्वस्य कार्यतावच्छेदकस्य लघुत्वादिति
भावः ननु द्वित्वप्रत्यक्षनिष्ठलौकिकविषयितया द्वित्वत्वमेव कार्यतावच्छेदकमिति न गौरवं. न चानन्तरेणाप्यपेक्षा ॥१५०॥

जन्यत्वनियमेन द्व्यणुकगतद्वित्वं विना त्र्यणुकपरिमाणानुत्पत्तेः परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणप

वुद्धिं द्वित्वप्रत्यक्षोपपत्तेरेतावताप्यवारितत्वेति वाच्यं. द्वित्वत्वाविषयकद्वित्वप्रत्यक्षस्यालोकनया व्यापकीभूत
द्वित्वत्वावच्छिन्नजनकसामग्रीविरहादेव तद्वारणादिति चेन्न. उत्पादकसामग्र्या व्यंजकत्वांगीकारे घटाद्युत्पाद
कसामग्र्यापि घटादिव्यंजकत्वापत्त्या सत्कार्यवादापत्तेरिति. नन्वपेक्षावुद्धेर्द्वित्वाद्युत्पादकत्वं न संभवति. द्व्यणु
कस्यास्मदीयप्रत्यक्षागोचरतया तत्रापेक्षावुद्ध्यसंभवेन तत्र त्रित्वानुत्पत्त्यापत्तेर्न चेष्टापत्तिः भावकार्यस्या
समवायिकारणं जन्यत्वनियमेन द्व्यणुकपरिमाणस्य तत्रासमवायिकारणत्वासंभवादत आह. अतीन्द्रिये द्व्य
णुकादाविति आदिना परमाणुपरिग्रहः सर्गादौ योगिनामभावादाह. ईश्वरीयेति. न चेश्वरीयापेक्षावुद्धेर्द्वि
त्वोत्पादकत्वेन द्वित्वस्यानश्वरत्वप्रसंगः ईश्वरीयापेक्षावुद्धेर्नित्यत्वेन तन्नाशनाश्यकत्वस्य तादृशद्वित्वे वक्तुमश
क्यत्वादिति वाच्यं. तद्द्वित्वे सेश्वरीयापेक्षावुद्धिसहकारिविशेषस्य क्षणविशेषस्य नाशादेव नाशोपपत्तेः क्षण.
विशेषस्येश्वरीयापेक्षावुद्धिसहकारित्वानंगीकारे सर्गाद्यकालीनपरमाणुद्वित्वोत्पत्तेः पूर्वं तद्द्वित्वोत्पाद
पत्तेः अपेक्षावुद्धिनाशाच्चेति मूलस्याश्रयनाशोपलक्षकत्ववदीश्वरापेक्षावुद्धिसहकारिविशेषक्षणवि

दि० क० शेषोपलक्षणत्वस्वीकाराच्च न तद्विरोधः एतेन घटाद्युत्पत्तिद्वितीयक्षणे भगवदपेक्षाबुद्ध्या तत्र द्वित्वाऽद्वित्वादि
कं जन्यत इति परास्तं· तदानीं सहकारिक्षणविशेषस्याभावेन भगवदपेक्षाबुद्ध्या द्वित्वादेरजननात् तदानीं
तत्र द्वित्वोत्पादे मानाभावाच्च· एतदस्वरसाद्धं अप्रमाणान्तरेति· इत्यत इत्याकांक्षातः नन्वेकत्वांशे निर्धर्मितावच्छेदकैकत्वज्ञानाद्द्वित्वाद्युत्पत्त्यापत्तिरतो व्याचष्टे· अयमेक इति· न तत्र घटमात्रनिष्ठद्वित्वाद्यवच्छिन्नविशेष्यतानिरूपितैकत्वप्रकारताशालिनी बुद्धिरपेक्षाबुद्धिपदार्थ इति नोक्तदोष इति भावः क्वचित्पुस्तके इदं तु बोध्यमित्याद्यवधेयमित्यतः पाठः स चैवं व्याख्येयः यथानियतैकत्वेति· एकत्वविशेष्यकसंख्यात्वानियतत्रित्वादिप्रकार 177
कज्ञानाऽन्यकालीनमनैकैकत्वज्ञानमित्यर्थः यद्वा एकत्वांशे निर्धर्मितावच्छेदकमेकत्वसंख्यायोगिनं इत्य
कारकज्ञानमित्यर्थः सेनावनादाविति· तत्र नियतैकत्वज्ञानाभावात्तस्यैव सहस्रत्वादिसंख्योत्पादकत्वादिति
भावः उत्पन्नेपीति· अनियतैकत्वज्ञानस्यापि त्रित्वाद्युत्पादकत्वादिति भावः दोषान्नियताप्रयनेकैकत्वज्ञाना ॥१५॥
भावात्· अनियतानेकैकत्वज्ञानस्य त्रित्वोत्पत्तिकारणत्वेपि त्रित्वांशे त्रित्वत्वप्रकारकप्रत्यक्षे नियतानेकैक

त्वा

त्वज्ञानस्यैव हेतुतया तं विना न त्रित्वादिप्रकारकं प्रत्यक्षमिति भावः उपपद्यत इति. इतो बहुतरेत्यत्र बहुत्वे
स्वसजातीयनिरूपितोत्कर्षः प्रतीयते तथा च चतुष्ट्वादिरूपे बहुत्वे त्रित्वादिरूपस्वसजातीयनिरूपितो
त्कर्षस्य सत्त्वात् तादृशप्रतीतिरुपपद्यत इति भावः संख्यान्तरत्वे. त्रित्वाद्यतिरिक्तसंख्यात्वेन तारतम्या
भावादिति. बहुत्वे स्वसजातीयोत्कर्षाभावात्तत्समवेतस्यैकरूपत्वादिति भावः न च बहुत्वे त्रित्वादिरूपत्वे
बहुत्वनिश्चये कथं त्रित्वादिसंशय इति वाच्यं. समानप्रकारकनिश्चयस्यैव संशयविरोधितया बहुत्वत्व
प्रकारकनिश्चयस्य त्रित्वत्वादिप्रकारकसंशयाविरोधित्वात्. अणुमहदित्यादि. यद्यप्यणुत्वमेव ह्रस्वत्व
मस्तु महत्त्वमेव दीर्घत्वमस्त्विति कुतश्चातुर्विध्यं तथापि तदवधिकाणुतया प्रतीयमानेऽपि तदवधिकह्रस्व
त्वाव्यवहारात् तदवधिकमहत्त्ववत्तया प्रतीयमानेऽपि तदवधिकदीर्घत्वाव्यवहाराच्च ह्रस्वत्वदीर्घत्वयोरति
रिक्तपरिमाणतया तच्चातुर्विध्यं बोध्यं. संख्याजन्यमुदाहरतीति. संख्यामात्रजन्यमुदाहरतीत्यर्थः न तु सजा
तीयमित्यनन्तरं विजातीयसंयोगरूपः प्रचयोऽस्तु. न द्यणुकादौ सत्त्वेऽपि वा तस्याकिंचित्करत्वादिति द्वित्वसंप्

दि०व० रणीयंसंख्याद्वित्वसंख्यामात्रे. एवमग्रेपि. परिमाणजन्यं. परिमाणमात्रजन्यं. कपालादिपरिमाणजन्यं. क
पालादिपरिमाणमात्रजन्यमित्यर्थः अप्रतीतमहत्वकपालद्वयारब्धघटेयन्महत्परिमाणंतत्रकपालग
तद्वित्वसंख्यानकारणं द्वित्वसंख्यायामहत्वाजनकत्वादन्यथाद्व्यणुकेपिमहत्वोत्पादापत्तेः नचोक्तापत्त्या
द्वित्वत्वेनपरिमाणाजनकत्वेपिघटगतमहत्वंप्रतिकपालगतमहत्वस्यकपालगतद्वित्वस्यवाहेतुत्व.
मित्यत्रविनिगमनाविरहइतिवाच्यं. कपालगतमहत्वोत्कर्षेणघटगतमहत्वोत्कर्षस्यानुभविकतया
कपालमहत्वस्यतत्रावश्यंहेतुतायावाच्यत्वात्. यत्रकपालेनप्रचयस्तँचयस्यापिहेतुत्वासंभवात्तत्रघट 178
परिमाणंकपालपरिमाणमात्रजन्यमितिभावः प्रचयइति. मूलेशिथिलाख्यइति. किंचिदवयवावच्छेदे
नावयवान्तरासंयोगिनिमहत्यवयवेवर्त्तमानः संयोगः प्रचयइत्येके. अत्रमहत्पदंनदेयंपरमाणुसंयो
गस्यप्रचयत्वेक्षतिविरहादित्यन्ये. भूयोवयवावच्छेदेनावयवान्तरासंयोग्यवयवेवर्त्तमानः संयोगः
प्रचयः तेनपरमाणुसंयोगोद्व्यणुकसंयोगोवानप्रचयइत्यपरे. अत्रप्रचयरहितैस्त्रिभिर्महावयवैरा ॥१५२॥

र्ब्धस्य यन्महत्परिमाणं तत्संख्यापरिमाणोभयजन्यमहदवयवारब्धमहत्त्वादतिशयितत्वात्. अल्पाऽ
वयवारब्धमहत्त्वादतिशयितत्वाच्च. प्रचिताभ्यां महावयवाभ्यामारब्धे यन्महत्परिमाणमतिशयितं. प्र
चयो न तत्परिमाणोभयजन्यं च. अप्रचितावयवारब्धात् त्र्यणुकमहत्त्वाच्चैतादृशातिशयादर्शनात्. प्रचि
तैर्महद्भिरारब्धस्य महत्परिमाणं संख्यापरिमाणप्रचयजन्यप्रचितमहावयवद्वयारब्धमहत्त्वादपित
स्योत्कृष्टत्वादिति बोध्यं. इदञ्चात्रस्य मूले प्रदर्शितत्वादित्यत्र विस्तरः. केचित्तु दीर्घमिति प्रतीतेरवयवसं
योगविशेषेणैवोपपत्तेर्दैर्घत्वं न परिमाणमन्यथा वर्तुलत्वे चतुरस्रत्वादीनां परिमाणान्तरत्वापत्तेरित्या
हुः. अर्थादिति प्रकरणादित्यर्थः. यद्वा अर्थात्परिशेषादित्यर्थः. न च परिशेषोऽसिद्धः रूपादेरप्याश्रयनाश
नाश्यत्वादिति वाच्यं. आश्रयनाशात् इति मूलस्याश्रयनाशमात्रादित्यर्थकतया रूपादेराश्रयनाशमात्र
नाश्यत्वाभावेन परिशेषसंभवात्. न च मूलस्यैतादृशार्थकत्वे प्रयोजनाभाव इति वाच्यं. क्रियाविभागादिक्र
मेण यत्किंचिदवयवविनाशेऽपि शरीरादिनाशस्य मीमांशकैरनभ्युपगमात्तत्र परिमाणनाशस्यानुभाविक

दि०क० त्वाच्चाश्रयमात्रनाशनाश्यत्वपरिमाणेतैरनंगीकारात्तन्मतनिराकरणाय मूलस्यतादृशार्थकत्वादितिध्ये-
यं. द्वितीयक्षणे चोत्पद्यत इत्यनन्तरं स्वाश्रयावयवगतैकत्वासमवायिकारणकं वेतिपूरणीयं. एकपृथ-
क्त्वं. एकसमवेतं. पृथक्त्वं द्वित्वादिवच्चेति. तथा च द्विपृथक्त्वादौ समानाधिकरणान्येकपृथक्त्वान्यसम-
वायिकारणानि. इदमेकं पृथगिदमेकं पृथगिति नानैकपृथक्त्वविषयिण्यपेक्षाबुद्धिर्निमित्तकारणं ताद्-
शबुद्धिनाशात्क्वचिदाश्रयनाशात्क्वचिदुभाभ्यां द्विपृथक्त्वं नश्यतीति भावः. अत्रोभयसमवेतं पृथक्त्वं द्वि-
पृथक्त्वं त्रितयसमवेतं पृथक्त्वं त्रिपृथक्त्वमितिरीत्या बोध्यं. ननु घटौ पटात्पृथगित्यादिप्रतीतेः पटावधि- 179
कैकपृथक्त्वद्वयादिनाप्युपपत्तेरुभयसमवेतपृथक्त्वादौ मानाभाव इति चेन्न. घटौ पटात्पृथगिति प्रतीत्या
उभयसमवेतपृथक्त्वसिद्धेस्तेनैव घटः पटात्पृथगिति प्रतीत्युपपत्तेरेकपृथक्त्वे प्रमाणाभाव इत्यस्या-
पि न क्लेशकत्वात्तस्माद्विनिगमनाविरहादुभयमंगीकार्यः. परंपरासंबंधः कस्य इति. सामानाधिकर-
ण्यरूपपरंपरासंबंधविषयकत्वमुक्तप्रतीतेः कस्यामित्यर्थः इदमुपलक्षणं प्रतीतेः सामानाधिकरण्यक ॥१५३॥

म४

रूपपरंपरासंबंधविषयकत्वमंगीकृत्यान्योन्याभावानंगीकारे एतद्घटरूपमेतद्घटात्पृथगिति
प्रतीत्यनुपपत्तेः एतद्रूपमेतद्रूपात्पृथगिति प्रतीत्यापत्तेश्च. अन्योन्याभावस्यातिरिक्तस्याभ्युपगमे तु पृ-
के१ थक्प्रत्ययस्यान्योन्याभावलक्षणया सर्वमुपपादनीयमिति. पंचमीप्रसंगादिति. अन्योन्याभावार्थकप-
दयोगस्य पंचमीप्रयोजकस्य तत्र सत्वादिति भावः अत्र नव्याः अन्योन्याभाव एव पृथक्त्वं न तु गुणांतरं.
न च घटो नेत्यत्र पंचम्यापत्तिरन्योन्याभावविशिष्टार्थकपदयोग एवान्यारादितरर्त्तेइत्यादिसूत्रेण पंचमी-
विधानात्. नन्वस्तु नान्योन्याभावविशिष्टार्थकत्वं. परं त्वन्योन्याभावार्थकत्वमित्यस्यान्यत्रसिद्धान्तितत्वात्.
यदि च घटाद्भेद इत्यादौ पंचम्यनुपपत्त्याभेदार्थकपदयोगः पंचमीप्रयोजकतयान्यारादितिसूत्रेण बोध्यत
इति. घटो नेत्यत्र पंचम्यापत्तिर्दुर्वारेति विभाव्यते. तथापि निपातातिरिक्तान्योन्याभावार्थकपदयोगस्यैव पंच-
मीप्रयोजकत्वं कल्प्यते. अनुशासनस्य प्रयोगानुरोधित्वादिति प्राहुः मूले प्राप्तयोरित्यादिना संयोगत्व-
रूपमुक्तं. तत्र प्राप्तिः संबंधः स च समवायोपीत्यत उक्तमप्राप्तयोरिति लक्षणे तु. संयोगत्वं जातिरिति. मू-

दि०कृ० लेआद्योन्यतरकर्मजइति.ननुसंयोगत्वेनान्यतरकर्मणःकार्यतावच्छेदकंउभयकर्मजसंयोगंसंयोगजसंयोगेच
व्यभिचारादितिचेन्न.विजातीयकर्मत्वेनविजातीयसंयोगत्वेनसमवायेनहेतुमद्भावात्.उभयकर्मजसंयोगा
दौचतादृशवैजात्याभावेनव्यभिचाराभावात्.एवमुभयकर्मणोःसंयोगस्यापिचसंयोगंप्रतिहेतुत्वंबोध्यंस्
लेभवेत्संयोगजोपरइति.ननुसंयोगजसंयोगेमानाभावःयत्रकपालक्रिययाकपालतरुसंयोगस्ततःकुं
भतरुसंयोगस्तत्रकपालक्रियाया एवकुंभतरुसंयोगंप्रतिकारणत्वं.ननुकपालतरुसंयोगस्येतिचेन्न.
समवायेनसंयोगंप्रतिसमवायेनतत्क्रियायाःकारणत्वात्कुंभेसमवायेनक्रियायाअभावेनकुंभतरुसंयो 180
गानुपपत्तेःक्रियायाःसामानाधिकरण्यसंबंधेनहेतुत्वान्तरकल्पनापेक्षयासमवायेनसंयोगस्यैवहेतुत्व
कल्पनौचित्यात्.वस्तुतोयत्रकपालक्रियाकपालान्तरेणतरुणाचैकस्मिन्क्षणेसंयोगस्तदुत्तरस्मिन्क्षणेघ
टोत्पत्तिःकपालक्रियानाशश्चनाशकस्यान्तरसंयोगस्यपूर्वसत्वात्.तदुत्तरक्षणेकुंभतरुसंयोगानुपपत्तिः
पूर्वक्षणेकपालक्रियायानाशात्.तस्मात्कपालसंयोगएवतत्रकारणमितिसंयोगजसंयोगसिद्धिरिति ॥१५४॥

वाधैवेति. अत्र केचित्. कपिसंयोगस्यत्रैविध्यमन्यतरकर्मजन्यसंयोगस्याप्रसिद्धेः यत्रेषुक्रियतेषु वृक्षयोः
संयोगस्तत्र संयोगाधिकरणवृक्षे क्रियाविरहेण व्यभिचारादन्यतरकर्मणः संयोगप्रतिकारणत्वस्यवक्तु
मशक्यत्वादित्याहुः तन्न. कार्याव्यवहितपूर्वक्षणावच्छेदेव कार्यतावच्छेदकावच्छिन्नं यत्किंचिद्व्यक्त्यधिकर
णीभूतयावद्व्यक्तिवृत्तिकाभावप्रतियोगितानवच्छेदकधर्मवत्त्वमेव कारणताघटकमेवं च कार्याव्यवहि
तपूर्वक्षणावच्छेदेन कार्यतावच्छेदकावच्छिन्नं यत्किंचिद्व्यधिकरणयावद्व्यक्तिषु कारणाभाववत्त्वमेव व्य
भिचारः न चैवंविधो व्यभिचारः प्रकृते इषोरपि तादृशयावदंतर्गततया तत्र क्रियायाभावासत्त्वादिति दि
वं४ क्. नन्वेयत्र हस्तक्रियानंतरद्वितीयक्षणे शरीरक्रिया तत्र चतुर्थक्षणे हस्ततरुसंयोगस्तस्मिन्नेव क्षणे शरी
रक्रियाजन्यशरीरपूर्वदेशसंयोगनाशस्तदुत्तरक्षणे शरीरतरुसंयोगो जायते तस्य च हस्ततरुसंयो
गजन्यत्वं शरीरक्रियाजन्यत्वं वेत्यत्र विरहः न चोभयमेव. ननु हेतुर्जातिशंकरप्रसंगादिति चेन्न. तत्र संयो
गद्वयस्यैवोपगमाद्द्वित्वाग्रहस्तु शादृश्यदोषादिसेको न तत्र चित्रसंयोगएवोत्पद्यते. कारणत्वं तु तत्र संयोग

कर्मोभयत्वेनेति चित्रसंयोगो विजातीय एवेति न सांकर्यमित्यपरे इत्यन्यत्र विस्तरः॥ पूर्ववदिति संयोगवदि
त्यर्थः तेनैव कपालविभागेनेति. तेन कपालविभागेनैवेत्यर्थः एवकारेण कर्मणो व्युदासः कपालस्याकाशा
दिविभागो जन्यत इति. अन्यथा कपालाकाशसंयोगस्य नाशकाभावेन नित्यत्वापत्तिरेवं कपालाकाशसंयोगस्य प्र
तिबंधकस्य सत्वेनोत्तरसंयोगानुत्पत्त्या कर्मणोपि नित्यत्वापत्तिः उत्तरसंयोगस्यैव स्वजनककर्मनिवर्त्तकत्वा
दिति भावः अमुमर्थं हृदि निधायाह. तत उत्तरदेशसंयोगस्ततः कर्मनाश इति. तेन कर्मणैवेति. कपालद्वयविभा
गजनककर्मणैवेत्यर्थः देशान्तरविभागः कपालाकाशादिविभागः आरंभकेत्यादि. आरंभकसंयोगः कपाल
द्वयसंयोगादिस्तत्प्रतिद्वंद्वी तद्विरोधी तन्नाशक इति यावत्. एवमग्रेपि. अनारंभकसंयोगः कपालाकाशसं
योगादिः अन्यथेति. आरंभकसंयोगप्रतिद्वंद्विविभागजनककर्मणोऽनारंभकसंयोगप्रतिद्वंद्विविभागजन
ककर्मणश्चैक्य इत्यर्थः विकल्पादिति. तत्राद्यावच्छेदेनानारंभकसंयोगप्रतिद्वंद्विविभागजनककर्मणः सत्वात्तेन
कर्मणा मूलावच्छिन्नारंभकसंयोगविरोधिविभागोत्पत्तिस्तेन चारंभकसंयोगनाशस्तेन कमलनाशः स्यादिति ॥१५५॥

भावः कारणविभागेन न कारणमात्रविभागेनैव कपालद्वयविभागादिनेति यावत्. पूर्वघटाद्यारम्भकद्रव्यनाशात्पूर्वं तथा च पूर्वोक्तेनैतेन घटनाशस्ततः कपालस्याकाशादिविभागो जन्यत इत्यसंगतमिति भावः ।सतिद्रव्येऽव्यनाशं विना देशान्तरविभागासंभवादिति. अन्यथा कारणमात्रविभागे कर्मलक्षणस्यातिव्याप्त्यापत्तेरिति भावः वस्तुतः कर्मलक्षणस्य न तत्रातिव्याप्तिस्तत्प्रकारकस्तु पाकजप्रक्रियायां सप्रपंचं प्रदर्शितोऽस्माभिर्द्वितीय इति.। कारणाकारणविभागजन्य इत्यर्थः यावद्द्रव्यवृत्तिकर्मनियतत्वादिति. क्रियाया व्याप्यवृत्तित्वनियमादिति भावः अत एव वक्ष्यमाणयुक्तेरेव शरीरे विभक्ते प्रत्ययो न स्यादिति यत्र हस्तक्रियया हस्ततरुविभागस्तत्र शरीरे विभागप्रत्ययः सर्वानुभवसिद्धः स चाविभागं विना नोपपद्यते. न च शरीरतरुसंयोगनाश एव तद्विषय इति वाच्यं विभागानंगीकारे शरीरतरुसंयोगनाशस्यैवासंभवात्॥ न हि तत्र हस्तक्रिया शरीरतरुसंयोगनाशिका व्यधिकरणत्वादतस्तत्र हस्ततरुविभागेन शरीरतरुविभागो जन्यते. ते न च शरीरतरुसंयोगनाशो जन्यतेऽस्तु पेयत इति विभागसिद्धिः ननु हस्ततरुसंयोगनाश एव शरीरतरुसंयोगनाशकोऽस्तु तरैतदुभयसामा

तरौ तदुभयसामानाधिकरण्यप्रसंगवारणात् १

न्या १

दि०कृ० नाधिकरणप्रसत्त्वात्. भास्तु विभागजविभागो हस्ततरुविभागस्तु कर्मजन्यः शरीरतरुसंयोगनाशकतया सि
द्धतीत्युपपन्न एवापास्तं. हस्ततरुसंयोगनाशेनैव तदुपपत्तेः किंच हस्तक्रियैव स्वसमवायिसमवेतत्वसंबंधे
न शरीरनिष्ठशरीरतरुसंयोगनाशे हेतुरस्तु वैयधिकरण्याभावादिति चेन्न. आश्रयनाशाजन्यगुणनाश
स्याविरोधिगुणजन्यत्वनियमेन शरीरकर्मजन्यशरीरतरुसंयोगं प्रति हस्ततरुसंयोगस्याकारणत्वेन व
शरीरतरुसंयोनाशो हस्ततरुसंयोगनाशस्याजनकत्वात्. यत्तोक्तं. हस्तक्रियैव स्वसमवायिसमवेतत्वसं
बंधेन तत्र कारणमिति. तदपि न. साक्षात्संबंधेन जनकत्वनियमस्यासति बाधके संकोचकल्पनानु 182
पपत्तेः वस्तुतस्तु. संयोगाभावो विभागो विभागाभावो वा संयोग इत्यत्र विनिगमनाविरहेणोभयोरतिरि
क्तत्वे. अत एव घटात्पटो विमुक्त इति प्रत्यय उपपद्यते. संयोगनाशात्मकत्वे नाशस्य सावधिकत्वाभावेन त
थाप्रत्ययानुपपत्तेरिति तदिदमभिप्रेत्योक्तमतः संयोगेत्यादि. मूले मूर्त एव तु दैशिकमिति. विभुद्वयोविप्रकृ
ष्टदेशमात्रवृत्तित्वमसन्निकृष्टदेशमात्रवृत्तित्वबुद्धेर्निमित्तकारणस्यादिक्संयोगस्यासमवायिकारण ॥१५६॥

स्यचाभावादिति भावः दैशिकपरत्वस्य निमित्तकारणमाह. बहुतरेति. बहुतरसंयोगान्तरितत्वं तदेव वि-
प्रकृष्टत्वं तद्विषयिण्यपेक्षाबुद्धिर्दैशिकपरत्वं प्रति निमित्तकारणमित्यर्थः. तदल्पीयस्त्वेति. अल्पसंयो-
गान्तरितत्वरूपसन्निकृष्टत्वविषयिण्यपेक्षाबुद्धिर्दैशिकापरत्वं प्रति निमित्तकारणमित्यर्थः. कालिक-
परत्वापरत्वे जन्य एवेत्यत्र जन्यपदं सम्भवमात्रं नित्ये न तत्पूर्वोत्पन्नत्वरूपज्येष्ठत्वबुद्धेः स्पन्दनान्तरोत्पन्नत्वरू-
पकनिष्ठत्वबुद्धेर्निमित्तकारणस्य कालसंयोगरूपासमवायिकारणस्य वाभावादिति भावः. मूले. अपे-
क्षाबुद्धिनाशेनेति. स्वनिमित्तकारणविप्रकृष्टत्वादिबुद्धीनां नाशेनेत्यर्थः. न वाः पुनर्बहुतरसंयोगान्तरि-
तत्वरूपविप्रकृष्टत्वाल्पसंयोगान्तरितत्वरूपसन्निकृष्टत्वाभ्यां दैशिकपरत्वादिव्यवहारस्य बहुतर-
स्पन्दान्तरितजन्मत्वरूपज्येष्ठत्वाल्पतरस्पन्दान्तरितजन्मत्वरूपकनिष्ठत्वाभ्यां च कालिकपरत्वादिव्यवहा-
रस्योपपत्तेर्न तयोर्गुणान्तरत्वं. यत्र च यत्काले ज्येष्ठत्वबुद्धिरुत्पद्यते. तत्कालमादाय स्पन्दन्यूनाधिकभाव
सेयोः. अतो न कनिष्ठेऽधिकजीविनि परत्वव्यवहारापत्तिरिति वदन्ति॥ तदभाववतीति. इदं च प्रमायामतिव्या

७२

दि०क० प्तिवारणाय तदभाववद्विशेष्यकतदभावप्रकारकप्रमायामतिव्याप्तिवारणाय तत्प्रकारकमिति.इच्छाया
मतिव्याप्तिवारणाय ज्ञानमिति.तदभावाप्रकारकमिति.संशयेतिव्याप्तिवारणाय.अत्र च तद्विशेष्यकत्वा
वच्छिन्नतदभावप्रकारताशून्यतद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववत् ज्ञानत्वं तत्र तन्निश्चयत्वमव
सेयं.ननु यथाभूतमहानसं वह्निमत्पर्वतो वह्निमानित्यस्य पर्वते वह्निनिश्चयत्वानापत्तेः ज्ञानपदं चे
च्छायामतिव्याप्तिवारणाय.एकधर्मिकेति.ह्रदपर्वतौ वह्नितदभाववन्ताविति ज्ञानेतिव्याप्तिवारणायैकधर्मि
केति.एकधर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नेत्यर्थः तेन पर्वतो वह्निमान् इत्थं वह्न्यभाववदिति ज्ञा 183
नव्युदासः वृक्षसंयोगवान् तदभाववांश्चेति.समुच्चयवारणाय विशिष्टेति.विरोधावगाहित्वं तदर्थः घटोऽयं
पृथिवी चेति ज्ञानवारणाभावाभावेति.इच्छाव्युदासार्थं विशेष्यभागः वस्तुतस्तु एकधर्मावच्छिन्नविशेष्यक
त्वनिवेशे विभिन्नरूपेणैकधार्मधर्मितावच्छेदकज्ञानस्य संशयत्वापत्तिः एकधर्मावच्छिन्नविशेष्यतावच्छेद
कताकत्वनिवेशे च निरवच्छिन्नविशेष्यतावच्छेदकताकसंशयासंग्रहप्रसंगः विभिन्नरूपेणधर्मितावच्छेद ॥५७॥

कतावच्छेदकावगाहिज्ञानस्य संशयत्वप्रसंगश्चेति स्वीयैककोटिप्रकारतावच्छिन्नप्रतिवध्यतानिरूपित
प्रतिबंधकतावच्छेदकीभूतापरकोटिप्रकारताशालिज्ञानत्वं संशयत्वमिति ध्येयं. यत्तु संशयत्वं जाति
विशेष इति. तन्न चाक्षुषत्वादिना शंकरप्रसंगात्. संदिग्ध इति क्रियापदं. संदेहवान्भवतीत्यर्थः एवम
ऽपि. समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरित्यादिसूत्रे विप्रतिपत्तिवाक्यजन्यशाब्दसंशयस्यानुक्तत्वात्सा
धारणधर्मासाधारणधर्मज्ञानजन्यसंशयवद्विप्रतिपत्तिवाक्यजन्यस्थलीयोपि संशय इति मतनिरासा
याह. विप्रतिपत्तिस्त्विति. व्याप्तिज्ञानादीनामित्यादिनाऽतिदेशवाक्यार्थज्ञानपरिग्रहः ननु तर्हि सूत्रस्थपं
चम्यनुपपत्तिरित्यत आह. किंचिदिति. तथा च सूत्रस्थपंचमी प्रयोजकतायामिति भावः एवं ज्ञानप्रामाण्यसं
शयाद्विषयसंशय इत्यत्र प्रामाण्यपदमप्रामाण्यस्याप्युपलक्षकं तेन प्रामाण्यसंशयस्याप्रामाण्यसंशय
स्य च. विषयसंदेहस्वातंत्र्येणाहेतुत्वमिति भावः एवं व्याप्येति. अथ व्याप्यसंशयस्य व्यापकसंशयहेतुत्वे किं
मानं. कोटिस्मरणादित एव तत्संभवात्क्वचित्तदनुविधानस्य तु व्याप्यतदभावयो व्यापकतदभावसाह

चर्यस्य गृहीतत्वेन तत्स्मरण एवोपक्षीणत्वात्तदग्रहे तु व्याप्यसंशयाद्व्यापकसंशयस्याप्यभावादिति चेद
त्राहुः महानसे कृतासनो नगलहृद इति स्मरतां पर्वतादिकमपि पश्यतां धूमादिसंशयभावाभावाभ्यां·
हुतासनसंशयभावाभावदर्शनात्तस्यापि तद्धेतुत्वं· अतएवोत्कटकोटिकव्याप्यसंशयाद्व्यापकस्याप्युत्कट
कोटिकः संशयः कारणोत्कर्षेणैव कार्योत्कर्षात्· नचैवङ्गवत्स्वच्छन्ददभिमतमिति वाच्यं· सूत्रस्थचका
रस्यानुक्तसमुच्चायकत्वात्तथाहि· समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च
विशेषापेक्षो विमर्शः संशय इति सूत्रं· तस्य चार्थमाहुर्भाष्यकृत्प्रमुखाः समानधर्मः कोटिद्वयसहचरितध 184
र्मः अनेकस्मात्सपक्षविपक्षाव्यावृत्तो धर्म अनेकधर्मः तयोरुपपत्तिर्ज्ञानं तस्माद्विप्रतिपत्तिर्विरुद्धकोटि
प्रतिपादकं वाक्यं· तस्मात्· अत्र पंचम्याः प्रयोजकत्वमर्थो न तु हेतुत्वं· उपलब्धिः प्रामाण्यविरोधिभ्रमत्वे
तयोरव्यवस्था संशयः एवंच प्रामाण्यसंशयजन्यो भ्रमत्वसंशयजन्यश्च विषयसंशयः चकारो व्याप्य
संदेहादिजन्यव्यापकसंदेहादेः संग्राहकः विशेषापेक्षो विमर्श इति तु न लक्षणं· एकधर्मिकभावाभा ||१५६||

वप्रकारकत्वरूपविशेषवान्. विमर्शोज्ञानमितितदर्थः इत्यादिकमित्यादिनासाधनाव्यापकव्याप्यत्वसंदे
हादितः साधनाव्यापकत्वसंदेहो वोध्यः साधारणज्ञानादेः कार्यतावच्छेदकेचाव्यवहितोत्तरत्वंदेयंतेनपर
स्परस्यनव्यभिचारः ननुसाधारणज्ञानादेरिवधर्मिज्ञानस्यापिसंशयहेतुत्वात्तत्कृतः संशयविभागः
कथंनप्रदर्शितइत्यतआह. संशयेधर्मिज्ञानमिति. संशये. संशयमात्रेतथाचधर्मिज्ञानजन्यतावच्छेद
कस्यसंशयत्वसमव्याप्यत्वान्ननतद्विभाजकतावच्छेदकमितिभावः ननुधर्मितौज्ञानस्यसंशयहेतुत्वेमा
नाभावः नचधर्मिज्ञानमन्तरेणसंशयःस्यादितिवाच्यं. सतिधर्मींद्रियसन्निकर्षइष्टत्वादतआह. धर्मींद्रि
येति. पित्तादीत्यादिनामण्डूकवसांजनादेः परिग्रहः अनुमानसिद्धत्वमेवप्रदर्शयतियथेति. भगवज्ज्ञाने
व्यभिचारवारणायहेतौजन्येति. अर्थान्तरंनिराकुरुते. नचेति. ननुपित्तात्मकदोषाभावः श्वैत्यप्रमायामेव
कारणं. नशंखत्वप्रमाणामतआह. विनिगमनाविरहादिति. प्रमायांदोषाभावः कारणंगुणोवाकारणमित्य
त्रविनिगमनाविरहादितिभावः वस्तुतोगुणहेतुतायामेवलाघवंचविनिगमनकमस्तीत्याह. अनन्तेति.

न्याय्यत्वादिति· अनुगतगुणस्याग्रे वक्ष्यमाणत्वान्न तद्धेतुत्वमतेयं दोष इति भावः तथा च दोषाभावा
नां हेतुत्वस्यावश्यकत्वे च गुणस्यापीति· तथा च पित्तादिदोषाभावसत्त्वेपि विशेषणवद्विशेष्यसन्निक
र्षरूपगुणाभावान्न शंखे श्वैत्यप्रमेति दोषाभावेन गुणस्यान्यथासिद्धिरिति भावः एवं· एवं सतीति· अत्र च
यव्यतिरेकसत्त्वेपि यद्यन्यथासिद्धत्वं तदेत्यर्थः गुणाभावः गुणाभाव एव न तु दोषः कारणं स्यादिति
भावः एवमपीति· उपमितौ शक्ये सादृश्यज्ञानं शाब्दबोधे योग्यताया स्तात्पर्यस्य वा प्रमैव गुण इति
भावः नन्वेवं रंगरजतयोरिमे रजते इति ज्ञानेतिव्याप्तिरत आह· तद्विशेष्यकत्वे सतीति· तद्विशे
ष्यकत्वावच्छिन्नतत्प्रकारकं ज्ञानमित्यर्थः इति सप्तम्या अवच्छिन्नत्वार्थकत्वात्· तत्प्रकारके भ्रमेऽतिव्याप्तेस्तत्
द्विशेष्यकेति· रजत एव इदमिति ज्ञाने रजतत्वप्रमात्वापत्तिरतस्तत्प्रकारकेति· ज्ञानपदं च· तथाविधेच्छा
यामतिव्याप्तिवारणाय· एवं सति तत्प्रकारकत्वस्य प्रमात्वघटकत्वे सति· भ्रमः प्रमा· स्यादिति· लक्षण
द्वयस्य तत्र सत्त्वादिति भावः नन्वेवं लक्षणाननुगम इत्यत आह· लक्ष्यस्येति· अयं पाकरक्ते घटे श्यामरू

वत्ववन४

मनोयद्दसाधारणंमहरिस्मालाघवहिर्गोचरप्रमाजनयतिनप्रमान्तरमितिनियमान२

पवत्ताप्रतीतेःप्रमात्वस्यादितिचेदिष्टमेवैतत्.घटस्यकदाचित्श्यामत्वात्.वर्त्तमानत्वस्यप्रमात्वाघटकत्वात्.
अत्रयद्यपिस्मृत्यन्यज्ञानत्वरूपानुभवत्वस्यनिर्वैशेवैयर्थ्यात्.ज्ञानत्वघटितमेवप्रमात्वंसुवचं.तथापि
तस्यस्मृतिसाधारणतयातत्करणस्यप्रमाणान्तरतापत्त्याशास्त्रेप्रमाणव्यवहारोपपादकरूपमनुभवत्वघ
टितमेवानुमन्यन्तेतान्त्रिकाः.वस्तुतस्तुविशिष्टवैशिष्ट्यानुभवेविशेषणतावच्छेदकप्रकारकनिर्णयस्यका
रणतयातज्जन्यतावच्छेदककोटिप्रविष्टतयानुभवत्वस्यजातिविशेषत्वेसिद्धेज्ञानत्वस्यानुभवत्वाघटकत्वे
नानुभवत्वस्यवैयर्थ्यमितिकृतंपल्लवितेन.प्रामाण्यंनस्वतोग्राह्यमितिमूलेनस्वतोग्राह्यत्वंनिषिध्यते.तत्र
स्वतएववादिनःकरस्याकांक्षायामाह.मीमांसकाहीति.स्वप्रकाशकत्वादिति.स्वविषयकत्वादित्यर्थः.तेनै
वगृह्यतइतिज्ञाने.गृह्यमानेतन्निष्ठज्ञानत्वादिधर्मवत्तन्निष्ठप्रामाण्यस्यापिग्रहेबाधकाभावात्.तन्मतेसर्वं
ज्ञानमयंघटोघटमहंजानामीत्याद्याकारकमितिभावः.तथाचेति.अयमत्रानुमानप्रकारः.इयंज्ञानताघटवि
शेष्यकघटत्वप्रकारकज्ञानजन्याघटवृत्तिघटत्वप्रकारकज्ञाततात्वात्.यायद्वृत्तियत्प्रकारिकाज्ञाततासात

ज्ञान।

दि.क० द्विशेष्यकतत्प्रकारकज्ञानसाध्या.यथापटेपटत्वप्रकारिकाज्ञानतेति.अनुव्यवसायेनेति.ननुज्ञानस्यवि
षयकत्वात्कथंविषययद्विषयघटितप्रामाण्यंतस्यविषयइत्यतोज्ञानज्ञानस्यविषयविषयकत्वेप्रमा
णमाह.विषयनिरूप्यमिति.विषयाविषयकप्रत्यक्षाविषयकइत्यर्थः.ज्ञानवित्तिवेद्योविषयइति.विष
यविषयकतानियतस्वविषयकताकप्रत्यक्षंज्ञानमित्यर्थः.अतोनसाध्यहेत्वोर्वैयधिकरण्यं.तथाचज्ञा
नविषयविषयकतानियतस्वविषयकताकप्रत्यक्षकंविषयाविषयकप्रत्यक्षाविषयत्वेसतिप्रत्यक्षविष
यत्वादित्यनुमानंज्ञानप्रत्यक्षस्यविषयविषयत्वेप्रमाणमितिभावः.अस्मन्मतेत्व.प्रत्यक्षस्यानभिषिक्ता 186
ज्ञानतालिंगकानुमितिरेवबोध्येत्यन्यत्रविस्तरः.अनभ्यासदशापन्नेति.अनवधृतप्रामाण्यसजातीयेत्य
र्थः.ज्ञानमेव.निश्चितमेव.गंधवतीति.व्याप्येति व्याप्यकप्रकारकत्वस्यव्यापकत्वेनिव्यापकप्रकारकत्वव्या
प्यत्वादितिभावः.ननुकथंतर्हिप्रामाण्यस्यानुमेयता.गंधवतिपृथिवीत्वप्रकारत्वस्यवपृथिवीत्ववतिपृ: ॥१६०॥
थिवीत्ववतिप्रकारकत्वादेरपिप्रत्यक्षसंभवादतआह.तत्प्रकारकत्वेति.संशयानुरोधादिति.यद्यपिज्ञा

व१

नैप्रामाण्यनिश्चयो धर्मितावच्छेदकसामानाधिकरण्येन जायते. संदेहस्तु धर्मितावच्छेदकसा-
मानाधिकरण्येन प्रामाण्याभावावगाही धर्मितावच्छेदकावच्छेदेन प्रामाण्यावगाहीति. नायं संश-
यानुपपत्ति तथापि प्रवृत्त्युपयुक्ते धर्मितावच्छेदकावच्छेदेन प्रामाण्यग्रहस्यास्वतस्त्वे संशयानुप- ९८
पत्तिर्दूषणमिति ध्येयं. न च प्रामाण्यग्राहकसामग्रीसत्त्वात्कथमग्निमसंशयानुरोधेन प्रामाण्य-
ग्रह इति वाच्यं. तत्राग्निमसंशयानुरोधेन संशयजनकदोषस्य प्रामाण्यनिश्चयप्रतिबंधकत्वक-
ल्पनादित्याशयात्. ननु यदि प्रामाण्यमनुमेयं तदा प्रामाण्यग्रहवैयर्थ्यं. तथाहि अयं पुरुष इति नि-
श्चये प्रामाण्यसंदेहे नासंदेहस्यायं पुरुषो न वेत्याकारस्योत्पत्त्या पुरुषार्थिनः प्रवृत्तिर्न्न संभवति. न
तु प्रामाण्यनिश्चये न तत्संशयाधीनोर्थसंदेह इति प्रामाण्यग्रहस्य प्रवृत्तावुपयोगः प्रामाण्यग्रह-
स्यानुमित्यात्मकत्वे च प्रामाण्यानुमापककरादिमतीरूषत्वप्रकारत्वादिग्रहे नुग्रहे न स्फुटकरतया

५३

१ दि०क० पुरोवर्त्तिनि पुरुषत्वे व्याप्यकरादिग्रहस्यावश्यकतया तेनैवायं पुरुषो न वेति संदेहप्रतिबंधकः संभवा
दतं प्रामाण्यानुमाने नेति चेन्न करादौ पुरुषत्वव्याप्यत्वग्रहं विनापि करादिमति पुरुषत्वप्रकारकत्वहे
तोः पुरुषत्वघटितप्रामाण्यव्याप्यत्वग्रहसंभवेन प्रामाण्यानुमानसंभवात्। एवं न्यायमते अनुमिते
रव्द्वितीयानुव्यवसायस्यापि प्रामाण्यग्राहकत्वमित्यन्यत्र विस्तरः। गुरुः शंकते। नाविति। व्यर्थमिति।
व्यावर्त्यीया अन्यथाख्यातेरभावादिति भावः। भ्रमजन्येति। न्यायनये भ्रमजन्याप्रवृत्तिस्तवमते न स्या
दित्यर्थः। भ्रमस्यान्यथाख्यातेः। नत्वरंगगोचरविसंवादिरजतार्थिप्रवृत्तौ। रजतेदं रजतमिति ज्ञानका
होरजतभेदाग्रहसत्वाद्विसंवादिप्रवृत्त्यापत्तिवारणाय दोषाधीनस्येत्युक्तं। न्यायनये दोषाधीनरज
तेभ्रमस्तत्स्थानाभिषिक्तरजतभेदाग्रहस्यैव तन्मते दोषाधीनतया रजते रजतभेदाग्रहस्य दोषा
धीनत्वादिति भावः। यत्ररंगगोचरमेतद्रजतवद्भूतलमिति ज्ञानं तत्र विसंवादिनादृशप्रवृत्तिकरणा ॥६॥
यस्वतंत्रोपस्थितेति रजतविशेषणं। मुख्यविशेष्यतयाउपस्थितत्वं तदर्थः। वस्तुतो रंगगोचररजतवद्भू

तलमितिज्ञानादपि प्रवृत्तिरिष्टेति. स्वतन्त्रोपस्थितत्वं नेदंयमेवेति ध्येयं. हेतुत्वादिति. न्यायनयेपीदं रजत
मिति भ्रमहेतुतया रजतभेदाग्रहस्य तत्रावश्यकतया तस्यैव हेतुत्वं युक्तं नेष्टधोरिति न्यायपादिति भावः कार्य
कारणभावद्वयकल्पनापेक्षया लाघवादाह. अस्तु चेति. तत्रापि सत्यरजतगोचरप्रवृत्तावपि अपितारंगगो
चरप्रवृत्तिपरिग्रहः रजतभेदाग्रहः रजतभेदासंसर्गाग्रहाभावः यथाशुक्तेरजते तेनेदं रजतमितिग्रहेति
प्रवृत्त्यापत्तेः प्राभाकरमते तत्र रजतभेदाग्रहाभावस्य सत्वादन्यथाऽन्यथाख्यात्यापत्तेरिति यद्यपि पुरोवर्त्तिवि
शेष्यकस्य रजतभेदासंसर्गाग्रहस्य समवायेनाभावो विशेषतया आत्मनिष्ठः प्रतिबंधकस्तदभावः कारंमिति १८५
फलितं तथा च. रंगे नेदं रजतमितिग्रहेपि प्रवृत्त्यापत्तिः रंगविशेष्यकरजतभेदासंसर्गाग्रहस्यान्यथाख्यात्य
नंगीकर्तृमते अप्रसिद्धत्वेनैतदभावस्य प्रतिबंधकत्वासंभवा तथापि विषयतासंबंधेन प्रवृत्तिं प्रति रजतभे
दासंसर्गाग्रहस्य विशेष्यतासंबंधावच्छिन्नं प्रतियोगिताकोऽभावः सविशेषणतासंबंधेन प्रतिबंधक इति विष
यनिष्ठतया प्रतिबध्यप्रतिबंधकभावकल्पनानोक्तदोषः एवं च तत्पुरुषीयत्वं प्रतिबध्यप्रतिबंधकतयोर

दि०क० वच्छेदककोटौ निवेशनीयमतो न पुरुषभेदमादाय दोषः। न चैवं रंगे इदं रजतमिति भ्रमानन्तरं न प्रवृत्तिर्न
स्यात्. रजतभेदासंसर्गाग्रहस्यान्यथाख्यातिपक्षे तत्रानंगीकारेण तदभावरूपस्य प्रतिबंधकस्य सत्त्वादि
ति वाच्यं. रजतभेदोपस्थितिविशिष्टस्यैव रजतभेदासंसर्गाग्रहस्य प्रतिबंधकत्वोपगमात्. न चैवमपि रं
गे इदं रजतं घटो न रजतमिति ज्ञानानंतरमप्रवृत्त्यापत्तिरिति वाच्यं. रजतभेदग्रहप्रतिबंधकदोषस्यो
त्तेजकत्वकल्पनात्. ननु रंगे रजतभेदाग्रहानुत्पत्त्या तत्प्रतिबंधकदोषस्य स्वीकृते सत्त्वेन न रंगे रंगभेदाग्रहस्य २५
रजते रजतभेदाग्रहस्येति पूर्वं न स्यात्त्वत्वादित्यनेनान्वयः। अनेन रंगे अनिष्टभेदाग्रहरूपानिवृत्तिसामग्री
रजते इष्टभेदाग्रहरूपा प्रवृत्तिसामग्री प्रदर्शिता रंगे रजतभेदाग्रहस्येत्यादिना च रंगे इष्टभेदाग्रहरूपा 188
प्रवृत्तिसामग्री रजतेऽनिष्टभेदाग्रहरूपा निवृत्तिसामग्री च प्रदर्शिता. दोषादेवेति नन्मते न्यायमतसिद्धम
मस्य लाभिषिक्तभेदाग्रहं प्रति दोषस्य हेतुत्वादिति भावः। इदं चेष्टभेदाग्रहः प्रवृत्तिकारणमनिष्टभेदाग्रहो
निवृत्तिकारणमिति. यथाश्रुताभिप्रायेण इष्टभेदोपस्थितिविशिष्टेष्टभेदासंसर्गाग्रहः प्रतिबंधकस्तदर्शं ॥१६२॥

कृ

कारणीयत्वात्. न च रंगे रजतभ्रमजनने दोष एवोत्तेजकोऽस्तु किं रजतभेदग्रहप्रतिबंधकदोषस्योत्तेजकत्वस्वीकारेण. एवं च रजतभेदोपस्थितिवैशिष्ट्यमपि प्रतिबंधके विशेषणं न देयं रजतभेदानुपस्थितिकाले रंगे इदं रजतमिति ज्ञानाद् प्रवृत्तिप्रसंगाभावात् न च रजतभेदासंसर्गाग्रहस्य प्रतिबंधकस्य रंगे रजतभ्रमजनकदोषरूपोत्तेजकविशिष्टत्वादिति वाच्यं. रंगे इदं रजतमिति भ्रमस्यान्यायमते सिद्धस्य तन्मते अभावेन तत्र तादृशदोषस्यानंगीकारात्. संभवतीत्यत्र नन्त्र रंगे न विसंवादिप्रवृत्तौ नेष्टसाधनत्वे स्यादिति पूरणीयं. सन्निकर्षाभावादिति. ज्ञानलक्षणायाः प्रत्यासत्त्येतरस्य कल्पनं तु गौरवदोषदुष्टमित्यभिमानः हेतुताया इत्यस्यान्वयव्यतिरेकाभ्यामिति शेषः. अन्यत्रापि. रंगगोचररजतार्थिप्रवृत्तावपि तत्कल्पनात्. विशिष्टज्ञानहेतुत्वकल्पनात्. न चानुमानाभाव इति वाच्यं. रंगे रजतार्थिप्रवृत्तिरिष्टप्रवृत्तिविषयविशिष्टज्ञानसाध्या प्रवृत्तित्वात् रजते रजतत्वप्रकारकप्रवृत्तिवदनुमानस्यैव मानत्वात्. अत्राप्रयोजकत्वमाशंकते. न चेति. लाघवेनेति. संवादिविसंवादिभेदेन कार्यकारणभावद्वयमपेक्ष्य प्रवृत्तिमात्रे विशिष्टज्ञानैकहेतुत्वकल्पना लाघवेनेत्यर्थः. न चावे. लाघवज्ञानरूपानुकूलतर्कस्य सत्त्वान्नाप्रयोजकत्वमिति भावः. रजतांशे सन्निकर्षाभावात् अन्यथाख्यातिः संभवतीति प्राभाकरोक्तं दूषणमुद्धरति. रत्वं चेति. प्रवृत्तिमात्रे विशिष्टबुद्धेर्हेतुत्वसिद्धौ चेत्यर्थः. फलमुखेति. कार्यकारणभावग्राहकफलात्पूर्वं गौरवस्यानिर्णयाद्गौरवसंदेहस्य चाप्रतिबंधकत्वादिति भावः. न चास्तु संवादिविसंवादिप्रवृत्तित्वावच्छिन्ने प्रत्येकं भेदाग्रहः कारणमिति न कार्यकारणभावद्वयकल्पनागौरवं. न च विशिष्टज्ञानत्वापेक्षया रजतभेदाग्रहाभावत्वस्य कारणतावच्छेदकत्वे गौरवमिति वाच्यं. रजतत्वविशिष्टानुमित्यादौ रजतभेदाग्रहत्वेन कारणत्वे तत्रैव साधारणरजतत्वविशिष्टविषयत्वस्यैव कार्यतावच्छेदकत्वकल्पनेनैव निर्वाहात्

न्या। लौ।

(मीमांसकमतेनु. रंगे इदं रजतमिति ज्ञानकाले रंगे रजतार्थिप्रवृत्तिनिर्वाहाय रजतभेदोपस्थितिविशिष्टमवश्यं निवेश्यं. न च रजतभेदरूपविशेषणज्ञानविरहादेव न[illegible]र्मणि रजतभेदग्रहाभावनिर्वाहे तत्प्रतिबंधकदोषाकल्पनादिति भावः।

न्यायनयेन । प्रवृत्तित्वावच्छिन्नं प्रति विशिष्टज्ञानत्वेन हेतुत्वान्तरकल्पने गौरवमिति तदनुरोधेन कल्पनीयं प्रमात्मक
रजतज्ञानार्थं ज्ञानलक्षणाप्रत्यासत्त्यादर इति कारणबाधाद्बाधितमेव मिथ्याज्ञानमित्याशंकां मनसि निःस्थलवि-
शेषकारणबाधाभावादनिवार्यमेव मिथ्याज्ञानमित्याह । किं चेत्यादिना यत्र रजते नरजतभेदग्रहो न तारंगे र
जतभेदग्रहस्तत्र सति युगपदिन्द्रियसन्निकर्षे रजतरंगयोः इमे रजते इति ज्ञाने न किमपि बाधकं रजतत्वेन
५स समं संयुक्तसमवायस्य सत्त्वात् । तादृशं च ज्ञानं रंगांशेन प्रमात्मकं विशेषणावन्तद्विशेष्य[illegible] सन्निकर्षरूपप्रमा
सामग्र्यभावात् किं त्वन्यथाख्यातिरेवेति भावः । ननु । तत्तद्विशेष्ये तत्तद्विशिष्टबुद्धिं प्रति तत्तद्विशेषणे तत्तद्वि
शेष्यघटितसन्निकर्षो हेतुरन्यथाख्यातिप्रसंगात् । तथा च । कथं रजतघटितसंयुक्तसमवायेन रंगे रजत
त्वग्रह इत्यत आह । अपि चेति । अन्यथाख्यातिमयापि पत्र १६२ द्वितीयपृष्ठे पंक्तौ ५ मूले त्रुटितं पत्रमिदं —

त्वन्मतरत्वनन्तरं दोषादेवेति पाठः १
पाठान्तरकोऽस्यनिकमित्यभिप्रायः १

वःकारणमितिदर्शितनिष्कर्षेतुरजतभेदोपस्थितिविशिष्टरजतभेदासंसर्गाग्रहस्यप्रतिबंधकस्यरंगे
ऽभावादितिरीत्यासामग्रीवोध्या.ननुरंगेरजतभेदाग्रहप्रयोजकदोषस्यप्रतिबंधकत्वान्नरंगेनिवृत्तिरे
वंरजतेरंगभेदाग्रहप्रयोजकदोषस्याप्रतिबंधकत्वान्नरजतेप्रवृत्तिरितिकथंयुगपत्प्रवृत्तिनिवृत्त्योरापा
दनमित्यतआह.किंचेति.भेदाग्रहस्यव्याप्यवह्नेदाग्रहस्यअनुमितिर्निराबाधेति.सानिराबाधाभावे.अन्यथा
ख्यातिरूपानुमितिर्निराबाधेत्यर्थः आपन्नितमिति.अन्यथाख्यातिरूपमापन्नितमित्यर्थः ननुह्रदेवह्निव्याप्य
धूमवह्नेदाग्रहात्ह्रदोवह्निमानित्यन्यथाख्यातिरूपानुमितिः.परंत्वगृहीतासंसर्गकज्ञानद्वयमेवोत्पद्य
तेनचैतत्रविशिष्टनैवैज्ञानोत्पत्तौबाधकाभावःव्याप्यवह्नेदाग्रहस्यह्रदोवह्निमानित्यन्यथाख्यातिरूपानु.
मितिकारणत्वादितिवाच्यं.अन्यथाख्यातौप्रमाणाभावेनतादृशकार्यकारणभावस्याकल्पनादतस्त
त्रप्रमाणंप्रदर्शयति.इत्थंचेति.यद्वानन्वनुमितिप्रतिविशिष्टज्ञानस्यैवहेतुत्वंयत्रचनतादृशविशिष्टबो
धसामग्रीतत्रलिंगासंसर्गाग्रहात्लिंग्यसंसर्गाग्रहस्यैवपरैरुपगमान्नायःपिंडेवह्न्यनुमित्यनुरोधादन्य

त्वे२

दि०क० थाख्यातिसिद्धिरित्यत आह· इत्थं चेति· चकारोप्यर्थः· ननु तादृशानुव्यवसायो नेदं विशेष्यकज्ञाने रजतत्व
प्रकारकं विशिष्टबुद्धिरूपः· परं तु रजतत्वप्रकारकत्वासंसर्गाग्रहरूप एवेत्यत आह· संदेहापत्तेरिति· विद्यमा
नेपि भेदाग्रहे आचार्यप्रत्यक्षोत्पादादिच्छायाउत्तेजकत्वं वाच्यं· इच्छानामुत्तेजकत्वानुरोधेन चानुमितिर्वे
दीनामेव कार्यतावच्छेदकत्वात्प्रवृत्तित्वावच्छिन्नं प्रति भेदाग्रहाभावत्वेन पृथक्कारणत्वे गौरवापत्त्या वि
शिष्टज्ञानत्वेनैव तत्र हेतुता कल्पनीयेति विसंवादिप्रवृत्त्यनुरोधेनान्यथाख्यातिर्दुर्वारैति भावः· ननु प्रा वे५
माण्यमनुमानगम्यं तदा भवेद्यद्यनुमानं प्रमानं भवेत्तदेव न संभवति व्याप्तिग्राहकाभावेनाज्ञानादित्यत: 110
प्रामाण्यानुमितिप्रयोजकतेयाव्यभिचारस्याग्रहो[illegible]सहचारग्रहस्य चेति· मूलेन व्याप्तिग्रहोपायो दर्श्य
ते सन्नायुक्तः· स्वकारणाद्भूतव्याप्तिस्वरूपाज्ञानाभावादित्यत आह· पूर्वं व्यासेनेति· व्यभिचाराग्रहस्य व्या
प्तिग्राहकतामुपपादयति· व्यभिचारग्रहस्येति· सहचारग्रहस्य तामुपपादयति· एवमिति· भूयोदर्शनस्य
कारणत्वं खंडयति· भूयोदर्शनं त्विति· व्यतिरेकव्यभिचारमाह· सकृद्दर्शनेपीति· भूयोदर्शनस्याहेतुत्वे ॥१६२॥

प्ति२

पिक्कचित्प्रयोजकत्वेयानदादरइत्याह. क्वचिदिति. तर्कोपेक्षितत्वेति शंकापनयनार्थं तर्कोपेक्षितत्वस्य
र्थंतद्दर्शयति. तथाहीत्यादिना. यद्युपमिति. अयंधूमवान्पर्वतः कारणंविनेति. तथाच धूमो वह्निव्य-
भिचारी स्याद्वह्निजन्यो न स्यादिति तर्काकारो बोध्यः यथाश्रुते वह्निमात्रस्याद्धूमवान्न स्यादिति तर्कस्य नि-
षयंपरिशोधकस्य व्याप्तिग्रहानौपयिकतया संगतेः. तत्रापि. तादृशतर्ककारणीभूतकार्यकारणभावग्र-
हेपि आशंकाभवेत्. आशंकाप्रतिबंधिकाभवेत्. व्याघातमेवदर्शीति. यद्यदीत्यादिना. ननु तर्कप्रत्याय-
यव्याप्यापादकवत्तानेकारणं तत्र व्याप्तिज्ञानप्रतिबंधकव्यभिचारशंकानिवर्तकस्तर्कोपेक्षित एवमग्रे-
पित्यनवस्थेत्यत आह. यत्रेति. स्वत एव शंकासामग्रीविरहादेव तर्कोपेक्षेत्यनन्तरं मतोनानवस्थेतिशे-
षः. ननु तर्कस्य कथं व्यभिचारशंकानिवर्तकत्वं. तर्ककारणीभूतव्याप्तिज्ञानेनिरासासंभवेनव्याहार्यशंका-
यास्ततोनिवृत्तिर्न संभवति. आहार्यः ज्ञानस्या प्रतिबध्यत्वात्किंतु तर्केणैव. तथा हि. अनिष्टप्रसंजना-
त्मकेन तर्केणापादकज्ञाने आपाद्यज्ञानरूपानिष्टसाधनत्वज्ञानजननद्वारा आपादकज्ञाने द्वेषो जन्यते. तेन हि
त्वेनैवतन्निवृत्तेः संभवादकेचित्. अनाहार्यशंकायास्तर्ककारणीभूतव्याप्तिज्ञानेनरे
व्यभिचाररूपापादकांशे आहार्यमेव ज्ञानं तर्ककारणम् आहार्यत्वं च बाधकालीनेच्छाजन्यत्वं बाधश्च व्यभिचाराभावज्ञानं तेनैव२

दि० क० न चापादकज्ञानेनेच्छाप्रतिबंध क्रियते. एवं चेच्छारूपकारणविरहादेव नाहार्यशंकोत्पत्तिरित्यर्थवश
संपन्नमेव तर्कस्य तन्निवर्त्तकत्वमिति. केचित्तु. तर्कस्य शंकानिवर्त्तकत्वं व्याप्तिज्ञानकारणीभूतो व्यभिचार
शंकाविरहस्तत्संपादकत्वं. एवं च व्यभिचारसंशयप्रतिबंधकतया तर्कस्योत्तेजकतयानुत्तेजकाभा
वविशिष्टव्यभिचारसंशयविरहसंपादकत्वमक्षुण्णमेव तर्कस्येत्याहुः. परे तु. यदापादकापत्तित्वेनाहा प४
र्यानाहार्यसाधारणं तद्विशिष्टबुद्धित्वावच्छिन्नं प्रति प्रतिबंधकतया तर्कस्य व्यभिचारशंकानिवर्त्तक
त्वमित्याहुः. तर्कश्चाहार्यारोपविशेषः. तत्त्वं च मानसत्वव्याप्यो जातिविशेषस्तर्कयामीत्यनुभवात्. क्रिया 191
साविशेषनिवर्त्तकतया वा सिद्ध इति. तर्कश्च द्विविधो विषयपरिशोधको व्याप्तिग्राहकश्चेति. तत्र विष
यपरिशोधको निर्वह्निः स्यान्निर्धूमः स्यादित्यादिः. धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादि
त्यादिश्च व्याप्तिग्राहकः. विस्तरस्त्वन्यत्रानुसंधेयः. इदानीं व्याप्तिग्रहोपायनिरूपणोत्तरं व्याप्तिनिश्चयाभा ॥१६४॥
वप्रयोजकव्यभिचारशंकाकारणज्ञानविषयत्वेनोपाधेः स्मरणे सति तथा च प्रसंगसंगत्योपाधिनि

रूपसाधनत्व

रूपणमिति भावः सिद्धिविषयत्वरूपसाध्यत्वस्यासिद्धिजनकत्वस्य च सोपाधावभावादभिमतेति. यो
यदवच्छिन्नव्यापकत्वे सति यदवच्छिन्नाव्यापकः स तदवच्छिन्नसाध्यकतदवच्छिन्नहेतावुपाधिरित्य
र्थः यथाश्रुतेऽभिमानस्य विशेषणत्वे यत्र न तदभिमानस्तत्राव्याप्तिः स्यात्. यदवच्छिन्नत्वविधैवक्ष
णाद्गुणकर्मान्यत्वविशिष्टसत्तावान् जातिमत्वादित्यादौ संयोगी गुणकर्मान्यत्वविशिष्टसत्वादित्या
दौ नाव्याप्त्यतिव्याप्ती. व्यापकत्वाव्यापकत्वे एवप्रकारेणैकसंबंधेन च विवक्षिते. तेनाद्रव्यत्वेन सम
वायसंबंधेन च वह्निं प्रत्यव्यापकस्य द्रव्यत्वस्य ध्वत्वादिना संयोगादिसंबंधेन वा धूमं प्रत्यव्यापकत्वे
पि वह्निमान् धूमादित्यत्र द्रव्यत्वादौ नातिव्याप्तिः सस्याम इति. काकः श्यामो मित्रातनयत्वादित्यादावित्यर्थः
तेन न वक्ष्यमाणेन ध्वंसो विनाशी जन्यत्वादित्यनेन पौनरुक्त्यं. अस्य साधनावच्छिन्नसाध्यव्यापकत्वादग्निम
स्य साधनरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वात्. साध्यव्यापकत्वाभावमुपपादयति. श्यामत्वस्येति. ननु
साधनावच्छिन्नसाध्यव्यापकत्वं विवक्षणीयमतो नोक्ताव्याप्तिरतो पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधाव.

दी०रु० व्याप्तिमाह. एवंवायुरिति. अत्र पक्षसंप्रत्युद्भूतरूपस्य व्यापकत्वेरूपस्य सुतरां व्यापकत्वमित्युद्भूतप
दं व्यर्थं. न चाप्युपाधेः असाध्यव्यापकत्वे कार्यकारणभावलक्षणानुकूलतर्कप्रदर्शनार्थं तदिति ध्येयं.
पक्षधर्मावच्छिन्नसाध्यव्यापकत्वोक्तौ नु पूर्वोक्तशाकपाकजत्वाव्याप्तिरिति भावः. अव्याप्तिं परिहरति.
मित्रातनयत्वेत्यादिना. अंततइति. तादृशधर्मान्तरस्यास्फूर्तावित्यर्थः. न च साध्यव्यापकत्वं साध्यनि
ष्ठव्याप्तिनिरूपकत्वं न या च शुद्धसाध्यव्यापके धूमादिनिष्ठव्याप्तेः केवलधूमत्वावच्छिन्नत्वात्कथं तं
दृशधर्मान्तरावच्छिन्नधूमनिष्ठव्याप्तिनिरूपकत्वमार्द्रेन्धनादीनामिति वाच्यं. तद्धर्मोधिकरणीभूत 192
साध्याधिकरणनिष्ठाभावाप्रतियोगित्वरूपस्यैव तद्धर्मावच्छिन्नसाध्यव्यापकत्वस्य लक्षणप्रवेशो
न तु तद्धर्मावच्छिन्नसाध्यनिष्ठव्याप्तिनिरूपकत्वस्येत्याशयात्. धूमवान्वह्नेरित्यादावयःपिंडमहानसा
न्यतरत्वावच्छिन्नसाध्यव्यापकत्वं जनकत्वादिकं संग्राह्यमेवेति ध्येयं. व्यभिचारिणीत्यादि. वायुःप्र
त्यक्षोरूपवत्वादित्यादेः पक्षत्वरूपसाध्याधिकरणमात्मा उद्भूतरूपासमकोपाधिश्शून्यं साध्यव्यभिचा ॥१६५॥

नार

राधिकरणं गगणं तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वाभावादुक्तरूपें व्याप्तिरत उपाध्यधिकरणमिति. उक्तरूपाधिकरणा परमात्माकाशान्यतरत्वावच्छिन्नसाध्याप्रसिद्ध्या तत्रैवाव्याप्तेः साध्याधिकरणमिति. उक्तरूपाधिकरणा यत्प्रत्यक्षत्वाधिकरणं घटादितन्निष्ठद्रव्यत्वाद्यात्मकधर्मावच्छिन्नसाध्यव्यापकत्वाभावादव्याप्तिरतो यत्त्वेत्यादिना तत्रापि साध्यव्यभिचाराधिकरणं परमाणुघटान्यतरत्वावच्छिन्नद्रव्यत्वाद्यात्मकसाधनव्यापकत्वात्तदवस्थैवाव्याप्तिरत उपाधिशून्यमिति. तत्रैवोपाध्यधिकरणं साध्याधिकरणं घटः उपाधिशून्यमधिकरणमात्मादेतेन्यतरत्वावच्छिन्नसाध्यव्यापकत्वाभावादुक्तरूपेव्याप्तिरतः साध्यव्यभिचाराधिकरणमिति. उक्तरूपं धिकरणं यत्प्रत्यक्षत्वाधिकरणं घटः यद्वोक्तरूपशून्यं यत्प्रत्यक्षत्वाभावाधिकरणमतीन्द्रियं रूपादि तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वसाधनाव्यापकत्वयोः सत्त्वादुक्तरूपेतिव्याप्तिरतः साध्याभावाधिकरणमिति परित्यज्य साध्याव्यभिचाराधिकरणमित्युक्तं. तदर्थश्च साधननिष्ठसाध्यव्यभिचारनिरूपकाधिकरणत्वं. अनन्तरइति तादृशधर्मान्तरस्यास्फूर्त्तावित्यर्थः अत एव यद्धर्मावच्छिन्नत्व

१ स्यात्साध्यविषय छो ६

दि०क० घटितनिरुक्तस्य लक्षणंत्वादेव. एतदनुसारेण. निरुक्तलक्षणानुसारेण स्वस्य साध्यमिति षष्ठीतत्पुरुषभ्रमं व्यावर्तयितुमाह। स्वं चेति. न व्याप्तस्तु यदभावेन यद्वदन्यत्वेन वा साधनवति साध्याभावद्वृत्ती येन स उपाधिर्लाघवात्. अत एव जलत्वतेजस्त्वयोस्तदुभयत्वेन रूपेण क्वचिदप्युपाधित्वमित्याहुः. तद्धर्मवति उपाधिव्यभिचारेण. तद्धर्माधिकरणीभूतं यदुपाध्यभावाधिकरणं तद्वृत्तित्वेन वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ तु प्रमेयत्वं प्रत्यक्षत्वव्यभिचारि वाह्यइवोद्भूतरूपव्यभिचारित्वादित्याद्युक्तं. ननु पक्षेतरत्वेति व्याप्तिः न च तस्य लक्ष्यत्वमेव. एकाश्रयेषामित्यादिमूले प्रदर्शितस्य लक्ष्यतावच्छेदकस्य तत्राभावात्. तत्रहेतौ पक्षेतरव्यभिचारस्य पक्षमादायैव संभवात् साध्यव्यभिचारस्य तमादायासंभवादत आह. वाधोन्नीतेति. स्वव्याघातत्वादिति. उपाधिमात्रस्य दूषकत्वव्याघातत्वादित्यर्थः. पक्षेतरस्योपाधित्वे सर्वत्रानुमाने पक्षेतरत्वोपाधेः संभवादनुमानमात्रोच्छेदापत्त्या व्यभिचारानुमानाधीनस्योपाधेर्दूषकत्व. ॥६६॥ स्यासंभवादिति भावः. ननु तथापि यत्र साध्यव्यापकताग्राहकं प्रमाणमस्ति तत्र पक्षेतरत्वे लक्षण

191

२ ननु जलस्नेहवद्भूयस्त्वादित्यत्र जलत्वतेजस्त्वोभयमुपाधिः स्यात् उभयत्वाश्रयीभूतजलत्वस्य साध्यात्याभावानधिकरणावृत्तित्वरूपहेतोर्यत्किंचिदधिकरणे पृथिव्यादौ च साध्योपाध्योर्व्यभिचारादत आह. न व्याप्तिमिति न यत्राधोभयाभावेन तद्वदन्यत्वेन वा साध्याभावोन्नयनं जलेऽन्वयाभावेऽपि साध्याभावावृत्त्युभयवतोः प्रसिद्धत्वात्
वर्ते

तिव्याप्तिर्दुर्ग्रहेत्यत आह. बाधोन्नीतस्त्विति. बाधेन पक्षे साध्याभावग्रहत्तयोन्नीतः साध्यव्यापकत्वेन।
निश्चित इत्यर्थः. संदिग्धोपाधिरपीति. पक्षे साध्यसंदेहे न साध्यव्यापकतासंदेहस्य पक्षेतरत्वे संभवा
दिति भावः. न च स्वव्याघातकत्वेनानुपाधित्वेद्वानुत्थानसंभवे संप्रदायमात्रस्यातद्धेतुत्वे कथन
मसंगतमिति वाच्यं. यत्र साध्यव्यापकताग्राहकतर्कावतारस्तत्र व्यापकव्यभिचारेण व्याप्यव्यभि
चारावश्यंभावेन व्यभिचारानुमापकत्वरूपदूषकत्वस्य व्याघातासंभवान्न. सत्प्रतिपक्षोन्नायकत्वेनोपा
धेर्दूषकतावादिनां मतमाह. केचित्त्विति. इत्थं चेति. सत्प्रतिपक्षोत्थापकतया दूषकत्वे चेत्यर्थः. अत्र च सत्प्रति
पक्षोत्थापकत्वकत्वे च. पक्षावृत्तिरिति. पक्षवृत्तित्वे तु पक्षे तदभावेन साध्याभावादिति भावः. गुरुमते लौकि
कशब्दोनुवादकः वैदिक एव प्रमाणं तन्मतनिराकरणाय वैदिकेति. अत्र स्वर्गकामो यजेतेत्यादिपदत्वेन पक्ष
ततेन विशेषतः संसर्गसिद्धिरिति हेत्वं. तात्पर्यविषयेति. अत्र ब्राह्मणो विद्वंसादौ यदधिकरणत्वसंसर्गे. ता
त्पर्यं तदविषयत्वादिसंसर्गेणार्थान्तरवारणाय तात्पर्यविषयत्वे संसर्गे विशेषणं. तात्पर्यज्ञानेतरपदा

सं २ ति ५ ने २ साधना ४

नासर्वपदितयत्वेदन विनाप्रयत्नेसाकांक्षानिवेशो नाऽ
संसर्गः

दि०१० र्थत्वेनेतरपदार्थस्याप्रवेशात्घटत्वादिनास्य तस्य संसर्गो न सिद्ध्येदतः स्मारितेति स्मारितत्वं च वृत्त्याबोध्यं तेन व
स्तुपदात्समवाये वाकाशत्वादिनोपस्थापिते न रूपेण संसर्गसिद्ध्यभावेपि न क्षतिः कुतो वायमेति पुत्रो राजपुर
षोपसार्यतामित्यादौ राज्ञः पुरुषः इत्यादिभागे राजपुरुषयोर्योग्यार्थयोः तात्पर्याभावेन साध्याभावाद्व्यभिचा
र इत्याकांक्षाविशेषणं ननु इदं पदमनेन पदेन [illegible] सहान्वयसंसर्गेणैतदर्थान्वितस्वार्थबोधं जन
यत्वितिपदतात्पर्यार्थकं तेन नाकांक्षायाः इतरांशवैयर्थ्यप्रसंगः वह्निना सिंचतीत्यादिवाक्ये संसर्गप्रमापूर्व
कत्वसाध्याभावेन व्यभिचारवारणाय हेतौ योग्यतापदं नीलो घटोऽस्त्वयं पटे इत्यादौ नीलं पटः इत्यादिभागे नी
लपटयोराकांक्षायोग्यतासत्वेन हेतुसत्वाद्व्यभिचारवारणाय सन्निपदं चाकांक्षादीनां परस्परप्रतियोगिक
त्वलाभाय अन्यथा साध्यस्य परस्परार्थघटितत्वेन व्यभिचारप्रसंगात् नन्वितत्वावच्छेदकप्रकारकप्रवृत्तिः 192
विषयविशेष्यकज्ञानस्य प्रवर्तकतया संसर्गज्ञानपूर्वकत्वानुमितेरेतादृशतया कथं प्रवर्त्तकत्वं अनुमिते
र्व्यापकतावच्छेदकप्रकारकत्वनियमेन प्रमापूर्वकत्वेन प्रमापूर्वकसिद्धावपि पुरोवर्तिविशेष्यकरजतत्वा ||६१||

नीलपदं घटपदार्थान्वितस्वार्थबोधयत्विति शाब्दपूर्वकेपि येन पटत्वादिरूपेण स्मारितत्वं तेन रूपेणाहृत्य कदं व पदं
पदार्थानां परस्परसंसर्गज्ञानाभावेन व्यभिचार इति भावः ५

ष्ठैनतत्रिश्रितंवैषष्ठप्रसंगनाशविरोभावः५

दिप्रकारकज्ञानस्यतस्मादनुपपत्तेस्तदर्थंशब्दाभ्यामापस्वीकारआवश्यकइत्यतआह. यद्वेति. मिथःसंसर्गि
वन्तइति. तात्पर्यविषयपरस्परसंसर्गवन्तइत्यर्थः. तेनतात्पर्यविषयसंसर्गमादायार्थान्तरं. ननुदृष्टान्तेसा
ध्यप्रसिद्ध्यभावात्कथंव्याप्तिग्रहइत्यतआह. दृष्टान्तेपीति. ननुसर्वत्रशब्दश्रवणानन्तरमनुमितिरूपका
र्यान्यथानुपपत्त्याव्याप्तिज्ञानंकल्पनीयमित्यतआह. किंचेति. पदज्ञानंकल्पयित्वेति. पदस्मरणंकल्पयि
त्वेत्यर्थः. वह्न्यादिनिष्ठेनार्थस्येववह्न्यादिरूपेणार्थेनापिवह्न्यादिपदस्मरणसंभवाद्वाच्यत्वादिवद्वाच
कत्वादिसंबंधस्यापिस्मारकत्वादितिभावः. इदमुपलक्षणं. आकांक्षादिज्ञानंकल्पयित्वेत्यपिबोध्यं. म
णिकृतस्तु एतेपदार्थाः परस्परसंसर्गवन्तः योग्यतादिमत्पदोपस्थापितत्वादित्यनुमानेयोग्यतानालिंग
विशेषणं. लिंगस्यनिश्चितस्यैवनिर्श्वकतयायोग्यतायाश्चसंशयेपिशाब्दबोधदर्शनादतःपृथगेवशा
ब्दोपमानमितिवदन्ति. मिश्रास्तु. अनुमानमुख्याशब्दस्यबोधकत्वेघटमानयेतिस्वरूपयोग्यंघटःकर्मत्व
मानयनं. कृतिरितिच. स्वरूपायोग्यमितिनस्यात्. अनुमानस्याभयत्रापिसंभवात्. नचाकांक्षाघटितहे.

त्वभावान्नानुमितिस्तत्रेति वाच्यं. आकांक्षाभ्रमेणानुमितिसंभवात्. विषयाबाधाच्च तस्याः प्रमात्वात्. शाब्दप्रमा
णे च स्वभावान्न तादृशशब्दस्य बोधकत्वमित्याहुः परे तु. घटात्पृथगित्यादौ घटावधिकपृथक्त्वप्रकारेणानि
रवच्छिन्नविशेष्यताकः पृथक्त्वाश्रयस्य शाब्दबोधः सर्वानुभवसिद्धः स चास्माकं तादृशानुपूर्विकपदज्ञान
त्वेन तादृशशाब्दबोधं प्रति हेतुत्वादुपपद्यते वैशेषिकानां तु पृथक्त्वं घटावधिकं घटपदसाकांक्षपृथक्प
दस्मादिति त्वादित्यनुमानेन तन्निर्वाहः पक्षविधया पृथक्त्वस्य माने पि तदाश्रयस्याभावात्. न च पदं पक्षीकृ
त्य घटो घटावधिकपृथक्त्ववानित्यनुमित्या तन्निर्वाहायेति वाच्यं. घटादिनिष्ठविशेष्यतायास्तत्र पक्षता
वच्छेदकीभूतपदत्वावच्छिन्नतया निरवच्छिन्नविशेष्यताकतादृशशाब्दबोधसमानकारत्वस्य तथाप्यनिर्वा
हादित्याहुः तत्र तेषु मध्ये. असद्विपक्षा इति. अत्यन्ताभावाप्रतियोगिसाध्यक इत्यर्थः यथाश्रुते सिद्ध्यसिद्धिव्या
घातात्. अत्यन्ताभावाप्रतियोगित्वस्य च प्रमेयत्वादौ सत्वाल्लक्षणासमन्वयः न चैतत्संभवति प्रमाविषयत्वस्व
रूपस्य तस्य नानात्वेनानुगमादिति वाच्यं. प्रमात्वस्यैव परंपरासंबंधेनानुगतत्वात्. इत्थं च प्रमेयत्वादेर्व्यतिरे ।।।१६८।।

त्वाधिकरणप्रकारत्वानवच्छिन्नविशेष्यताकत्वं च प्रमात्वमनुगतमेवेति बोध्यं १

Nepal Sanskrit University, Balmeeki ... Kathmandu

नद्देवनत्वेतद्द्वयमिति पाठे तु सामानाधिकरण्यं मत्वर्थः २

लं२ न४

८

भूत१

किंत्वग्रेमेपि केवलान्वयित्वमेवेति मन्तव्यं. असत्सपक्ष इति सिद्ध्यसिद्धिव्याघातादन्वयाग्रहीतहेतुंसहचारं
यद्व्यतिरेकिसाध्यं तत्त्वमर्थो वाच्यः सत्सपक्षेति. गृहीतान्वयव्यतिरेकिसाध्यक इत्यर्थः यत्संबंधेन यदवच्छि
न्नं प्रतीति. यत्संबंधावच्छिन्नयद्रूपावच्छिन्नव्याप्यतानिरूपितव्यापकता गृह्यत इत्यर्थः इतरव्याप्यतेति उत
रस्य व्याप्यतेत्यर्थः तादात्म्येनेतर व्यापकतेति पाठे तादात्म्यसंबंधावच्छिन्नाया इतरनिष्ठव्याप्यतानिरूपि
तव्यापकतेत्यर्थः तादात्म्यसंबंधेनेति. तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावः सिद्ध्यतीत्यर्थः येन संबंधे
न व्याप्यता गृह्यत इत्यनुक्तौ तु तादात्म्येनेतरस्य व्याप्यता यत्र गृहीता तत्रेतरात्यंताभावस्यासिद्धिस्यादिति
भावः संयोगसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावेनेति सावधारणं. तेन संबंधान्तरावच्छिन्नप्रतियोगि
ताकेन न सिद्धिरित्यर्थः अनेन च येन संबंधेन व्यापकता गृह्यत इत्यस्यापि फलं सूचितं प्रदर्शितरीत्यैव येन रूपे
ण यदवच्छिन्नेत्यनयोरपि प्रयोजनमूह्यं. ननु साध्यसाधनसहचारज्ञानाभावात्कथं व्यतिरेकव्याप्तिज्ञान
मित्यत आह. अत्र चेति. तथा च व्यतिरेकसहचारेणैव व्यतिरेकव्याप्तिग्रहान्नान्वयसाहचारग्रहापेक्षेति

दि०का० भावः ननु विनासाध्याप्रसिद्धिं तदभावाज्ञाने व्यतिरेकव्याप्तेर्दुग्रहत्वं स्यात्साध्याप्रसिद्धौ च सिद्धसाध
नमिति चेन्न. साध्यस्य घटादेरेव प्रत्यक्षसिद्धत्वात्. पृथिवीतरभिन्नेत्युद्देश्यप्रतीतेरसिद्धत्वान्न सिद्धः
साधनं. पक्षतावच्छेदकनानात्वे एवांशतः सिद्धसाधनस्य दोषत्वात्. अत एव वा नित्ये वाङ्मनस इत्यत्रानि
त्यावागिति बुद्धेरदृश्यायाः सिद्धत्वेनांशतः सिद्धसाधनमिति. ननु तथापि घटः कथं पक्षः साध्यस्य निश्चये
न तत्संदेहसिषाधयिषयोरभावादिति चेन्न. यतः सर्वा पृथिवी इतरभिन्ना न वेति संशयस्य तत्प्रकारक
सिसाधयिषायाश्च घटविषयत्वात्. घटत्वेन विशेषदर्शने सिद्धौ वा तेन रूपेण संशयसिसाधयिषे न भ
वतः पृथिवीत्वेन तु भवत एवेति. ननु पृथिवीतरभिन्ना पृथिवीत्वात्घटवदित्यत्र चापि नैवेतरभेदसि
द्धेर्व्यतिरेकिवैयर्थ्यमिति चेन्न. अन्वयव्याप्तेरग्रहे व्यतिरेकव्याप्तिस्फूर्तिदशायां व्यतिरेकानुमितिज
ननसंभवेन व्यतिरेकानुमानप्रवृत्तेर्निष्प्रत्यूहत्वात्. आचार्य्यमतमाह. केचित्त्विति. व्यतिरेकसहचारेण ॥१६६॥
अन्वयसहचारनिरपेक्षव्यतिरेकसहचारेण. अन्वयव्याप्तिरेवेत्येवकारेण व्यतिरेकव्याप्तेर्व्युदासः 194

पे१

नन्वेवं व्यतिरेकव्याप्तिज्ञानरूपकारणाभावात्कथं व्यतिरेक्यनुमितिरित्यत आह· नन्विति· व्यतिरेकव्याप्तिज्ञानभिन्नस्यानुमितानिसौं: नन्वयव्याप्तिज्ञानस्यैव हेतुत्वे कथं व्यतिरेकीति व्यवहार इत्यत आह· यत्रेति· ननु पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ साध्यस्येतरभेदादेरप्रसिद्धत्वात्कथं व्यतिरेकसहचारग्रह इत्यत आह· साध्यप्रसिद्धिस्त्विति· ननु घटादौ साध्यानिर्णीते कथं तत्रेतरभेदानुमितिरत आह· पक्षादिति· अवच्छेदकावच्छेदेनानुमितौ सामानाधिकरण्येन साध्यसिद्धेरप्रतिबंधकत्वादिति अथवान्वयव्याप्तिघटकतावत्पदार्थज्ञानादेवान्वयव्याप्तिज्ञानोत्पत्तौ व्यतिरेकसहचारज्ञानस्यानहेतुत्वे मानाभावः· नन्व व्यतिरेकसहचारेणात्र प्रयोजकत्वं तृतीयार्थः तच्चनानुपपन्नं अन्वयव्याप्तिज्ञानप्रतिबंधकव्यभिचारशंकानिरासद्वाँ व्यतिरेकसहचारज्ञानस्य तत्र प्रयोजकत्वादिति वाच्यं· व्यतिरेकसहचारग्रहेप्यधिकरणांतरे व्यभिचारशंकातावदस्त्येव. तदधिकरणीयव्यभिचारशंकानिरासद्वारात्र तस्याप्रयोगित्वमित्यपि न· तदधिकरणे साधनाभावग्रहमात्रेणैव तदधिकरणीयव्यभिचारशंकानिवृत्तेरित्य

दि०क० स्वरसोवदतीत्यनेनसूचितः केचन. मीमांसकाः तदपि. अर्थापत्तेः प्रमाणान्तरत्वमपि. दिवानभुंक्ते इत्यादा
वित्यादिनामयूरः पर्वतेतरस्मिन्ननृत्यति चेत्यस्यासंग्रहः नचैतद्वाक्यात् मयूरः पर्वते नृत्यतीति ज्ञानमुत्पद्य
तेनचतद्व्यतिरेकिणः संभवति पर्वतेनृत्यस्य साध्यस्याप्रसिद्धौ व्यतिरेकव्याप्तिनिरूपणादिति कथं नार्था.
पत्तिः प्रमाणान्तरमिति चेन्न. मयूरनृत्यपर्वताधिकरणं पर्वतेतरानधिकरणत्वेसति साधिकरणत्वाद्य
वनत्ववदित्यन्वयव्यतिरेकिणैव पर्वताधिकरणत्वकमयूरनृत्यज्ञानसंभवात्. धर्मत्वेनेति. इदं च प्राचां म
तेनोक्तं. नवीनमतेतु नित्यंविज्ञानमानन्दंब्रह्मेति श्रुत्या भगवति नित्यसुखसिद्धौ धर्मस्य कार्यतावच्छेदकं 195
जन्यसुखत्वं. सुखत्वावान्तरजातिर्वेतिबोध्यं. तत्र तयोर्मध्ये ज्ञातएव फलज्ञानस्य फलेच्छाप्रतिहेतुत्वादेवापु
रुषार्थः संभवतीति. सुखंदुःखाभावश्च पुरुषार्थः संभवतीत्यर्थः. ननु यज्ज्ञानमित्यादेः स्वविषयकज्ञान
जन्येच्छाविषयकत्वमर्थस्तथाचोपायेतिव्याप्तिस्तस्यापि स्वविषयकेष्टसाधनताज्ञानजन्येच्छाविषयत्वादत
आह. इतरेच्छेति. कृतिसाध्यताज्ञानमिति. ननु कृतिसाध्यताज्ञानस्य स्वातंत्र्येण चिकीर्षाप्रतिहेतुत्वेमानाभा. ॥१२०॥

वः तद्धर्मावच्छिन्नविशेष्यकेष्टसाधनताज्ञानस्य तद्धर्म्मितद्धर्मप्रकारकेच्छां प्रति हेतुतायाः क्लृप्तत्वात् कृतिसाध्य
ताकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानादेव चिकीर्षायाः संभवादिति चेन्न. यत्र कृतिसाध्यपाकत्वेनेष्टसा
धनत्वं न गृहीतमपि तु सुद्धपाकत्वेन कृतिसाध्यत्वं शुद्धपाकत्वेन चेष्टसाधनत्वं गृहीतं. तत्रापि पाकगोचरप्र
वृत्तेरानुभविकतया तदनुरोधेन चिकीर्षाया अप्यावश्यकत्वेन तन्निर्वाहाय कृतिसाध्यताज्ञानस्य स्वातन्त्र्येण हे
तुताया आवश्यकत्वात्. अथ कृत्यसाध्यताज्ञानस्य प्रतिबंधकत्वादेव न वृष्ट्यादौ चिकीर्षानुत्पादात् कृतिसाध्यता
ज्ञानस्य चिकीर्षां प्रति हेतुत्वे एव मानाभाव इति चेन्न. कृतिसाध्यत्वाभावव्याप्यतदवच्छेदकधर्मज्ञानानां प्रति
बंधकत्वकल्पनापेक्षया कृतिसाध्यताज्ञानहेतुत्वे लाघवात्. इष्टसाधनताज्ञानमिति. अन्यथा निष्फलत्वज्ञाने
पि चैत्यवंदनादौ चिकीर्षापत्तेरिति भावः. अत्रेदं बोध्यं. पाकविशेष्यकेष्टसाधनताज्ञानस्य कार्यतावच्छेदके न
पाकगोचरचिकीर्षात्वे कृतिसाध्यत्वप्रकारकत्वनिवेशप्रयोजनविरहात्. तेनेष्टज्ञानशून्यकालेपि चिकीर्षा
निर्वाहः. अत एव कृतिसाध्यताज्ञानस्याहेतुत्वादेव. बलवद्द्विष्टेति. द्विष्टे द्वेषविषयीभूते. द्वेषश्च दुःखतादूप्ये

२ पाको जायतामितीच्छायाः तत्र हेतुत्वे न भ्रम. किंतु पाकत्वावच्छिन्नमुख्यविशेष्यकेच्छात्वे पाकसाध्यत्वे सुखं जायतामितीच्छायां व्यभिचारवारणा
भोजनत्वप्रकारकेच्छाविशिष्टं यद्भोजनावच्छिन्नसाधनसाधनत्वप्रकारतानिरूपितपाकत्वावच्छिन्नविशेष्यताकज्ञानत्वं च कारणतावच्छेदकं तेन चैत्र
स्य भोजनं भवत्वितीच्छायां मैत्रस्य यदिच्छाशून्यस्य भोजनसाधनं पाकस्तज्ज्ञानतोऽपि न चैत्रस्यापत्तिः कालिकमपि सामानाधिकरण्यमत्र वाच्यं नानात्वे मैत्रस्ये

यत्रेति. इष्टसाधनेऽस्य त्र [illegible] रूपसत्वे विशेषणां २
कातानंतरं येच्छा [illegible] तयत्नद्वेषनादवस्थं विशेष्यविशेषणभावे विनिगम
काभावेन ज्ञानानयोर्हेतुहेतुमद्भावद्वयमिति [illegible] स्फुटमेव १

दि०कं०

णाज्ञानात्.सर्प्पादौ तत्साधनताज्ञानात्.द्वेषे वलवत्वंच जातिविशेषः प्रतिवंधिकेति. ननु वलवद्द्वेषविषयसा
धनत्वज्ञानस्य प्रतिवंधकत्वे चैत्रस्यागम्यागमनजन्यनरके यदा वलवान्द्वेषस्तदा मैत्रस्य तादृशद्वेषसत्वे
स्यागम्यागमने तादृशनरकजनकत्वज्ञानवतश्छाप्रसक्तेरनुपपत्तिः एवं चैत्रस्यैव कालान्तरे तादृशद्वेषसः
त्वेपि न च तत्कालीनतत्पुरुषीयें गप्रवृत्तिं प्रतिं तत्कालीनतत्पुरुषीयवलवद्द्वेषजनकत्वज्ञानस्य प्रतिवंध
कत्वं कल्प्यते. तत्पुरुषस्य यदा नक्कापि द्वेषस्तत्कालतत्पुरुषान्तर्भावेन तादृशज्ञानप्रतिवंधकत्वस्याकल्पनात्तत्र
तत्र तादृशप्रतिवंधकाप्रसिद्ध्या तदभावरूपकारणस्याभावात्प्रवृत्त्यनुपपत्तिरिति वाच्यं. तत्पुरुषस्य यदा
गम्यागमनजन्यनरके वलवान्द्वेषस्तदा तत्पुरुषस्य तत्रेच्छानुदयादगम्यागमनगोचरतत्पुरुषीयतत्काली
नेच्छायाप्रसिद्ध्या तत्पुरुषतत्कालान्तर्भावेन तादृशकार्य्यकारणभावस्याभावेन तत्र तत्पुरुषीयागम्यागमन
गोचरेच्छानुत्पादप्रयोजकस्य दुर्न्निक्षापत्तेरिति चेन्न. तद्धर्मप्रकारकद्वेषविशिष्टस्य तद्धर्मावच्छिन्नजनकत्व ||१२२||
ज्ञानस्य तद्धर्मप्रकारकद्वेषानुत्तरतादृशेच्छायां तादृशद्वेषाभावतः तादृशद्वेषान्तरतद्गोचरेच्छायां तद्धर्माव
तत्प्रतिवंधकत्वकल्पने नोक्तापत्त्यभावात्.१

ननु विशिष्टस्य प्रतिवंधकत्वं कारणीभूताभावप्रतियोगित्वं. विशिष्टाभावश्च द्वेषाभावं निरुक्तज्ञानाभावाभ्यां नातिरिक्तस्तथा च द्वेषाभावो निरुक्तज्ञानाभावश्च चिकीर्षा
कारणमिति निर्गलितं न च नसंभवे[illegible]ति तथा सति द्वेषनिरुक्तज्ञानान्यतरसत्वे चिकीर्षानुपपत्तेरतो द्वयोः कार्यतावच्छेदकत्वं दर्शयति. तद्धर्मेत्यादिना २

कार्यकालेपीत्यर्थः सत्प्रतिपक्षत्वप्रतिवंधाभावेइष्टापत्तिकाले द्वेषोस्त्वितो कार्यकाले द्वेषोस्तीति ब्रूयात् इति तद्दु पं ४

च्छिन्नजनकत्वज्ञानाभावः कारणं. तत्र प्रतिवंधकत्वकल्पने लाघवसभावाद् बलवद्द्वेष इति. पाकादिगोचरे
च्छायां बलवद्द्वेषविषयसाधनत्वज्ञानजन्यः पाकादिगोचरो द्वेषप्रतिवंधकः पूर्वोक्तप्रतिवंधकद्वय
कल्पनापेक्षया लाघवादिति भावः. अत्रावोत्कटसुखोत्कटदुःखजनकत्वमेकस्मिन्कर्मणि गृहीतेत
त्र सत्प्रतिपक्षस्थले इच्छाद्वेषयोरनुत्पत्तेस्त्वन्मते तत्रैव कार्यकाले द्वेषाभावस्य सत्वेनेच्छोत्पादापत्तिः
न च यत्र बलवद्द्वेषस्य साधनत्वज्ञानं न तृतीयक्षणे द्वेषाजनितत्वादुत्तरक्षणे इच्छोत्पादापत्तिस्तत्र वा
पीति वाच्यं. तत्रेच्छोत्पादस्येष्टत्वात्. क्षणविलंबस्य शपथनिर्णेयत्वादित्यन्य इत्यनेनास्वरसः सूचि
तः. बलवदनिष्टाजनकत्वज्ञानमिति. अत्रापि तद्धर्मप्रकारकद्वेषोत्तरेच्छायां तद्धावच्छिन्नाजनकत्वज्ञानं र्म ५
कारणं तादृशद्वेषानुत्तरेच्छायां तु तद्धर्मप्रकारकद्वेषाभावः कारणमिति निष्कर्षो बोध्यः. मूले कस्यचिन्मत
इत्यनेनास्वरसः सूचितः. स च बलवदनिष्टाननुवंधित्वज्ञानत्वस्याहेतुतावच्छेदकत्वे बलवदनिष्टजन
कत्वप्रकारतानिरूपिताभावविशेष्यताशालित्वादेस्तादृशनिरूप्यनिरूपकभावघटितत्वेन गौरवात्.

अप्रामाण्यसंदेहास्कंदिताधिष्ठानजनकत्वनिश्चयकाले तद्विषयसंदेहेन निश्चयरूपकारणविरहानानालंदेहस्वाधारणाप्रामाण्यज्ञानानास्कंदितत्वं कारणतावच्छेदकमि
च ४
संशयः २

दि०क०

तदघटितबलवदनिष्टसाधनताज्ञानाभावत्वेनैव हेतुत्वे युक्ते नच प्रामाण्यज्ञानानास्कन्दितबलवदनिष्टान
नुबंधित्वज्ञानत्वापेक्षया प्रामाण्यनिश्चयानास्कन्दित तदनुबंधित्व ज्ञानत्वस्य प्रतिबंधकतावच्छेदकत्वे गौ
रवमिति वाच्यं. युक्तादेबलवदनिष्टजनकत्वसंशयेपीष्टप्रवृत्त्योरुदयाद्बलवदनिष्टानुबंधित्वनिश्चयस्यै
वेष्टप्रतिबंधकतयास्तदनुबंधित्वसंशयस्यापि कारणतायाश्च वाच्यतया च विपरीतगौरवादिति न च बल
वदनिष्टाननुबंधित्वज्ञानस्य प्रवर्त्तकत्वे तद्विषयस्याविधेयर्थत्वाभावान्नकरेजंभक्षयेदित्यादिवाक्यानामप्र
माण्यापत्तिरिति वाच्यं. तज्ज्ञानस्य प्रवृत्तिजनकत्वाभावेपि प्रवृत्तिप्रतिबंधकबलवदनिष्टसाधनत्वज्ञानवि
घटकत्वेन प्रवृत्तिप्रयोजकत्वात्प्रवृत्तिप्रयोजकज्ञानविषयस्य बलवदनिष्टाननुबंधित्वस्य विधेयत्वानपाये
न. अत्रेदमपि यत्र प्रथमक्षणे द्वेषः द्वितीयक्षणे फलेच्छा तृतीयक्षणे फलसाधनताज्ञानं तत्र तृतीयक्षणे द्वे
षनाशाद्भवतैव चतुर्थक्षणे यत्र उपायेच्छा फलेच्छा तृतीयक्षणे फलसाधनताज्ञानं तत्र तृतीयक्षणे द्वेषनाशे ॥१७३॥
द्भवत्येव चतुर्थक्षणे उपायेच्छा यत्र फलेच्छादिक्रमेणोपामुत्पत्तिस्तत्र फलेच्छारूपकारणाभावादेव नोपायेच्छा

197

अदृष्टफलसाधनताज्ञानं च नोद्देश्यो दुःखेसुखेच्छा वा तत्रैव साधनताज्ञानं तत्रादर्शनेऽपि यथा। सिद्धो जातिविशेषः ५

एवमन्यत्राप्यात्मविशेषगुणानां यौगपद्यानंगीकारादिति बलवदनिष्टाननुबंधित्वज्ञानस्य द्वेषस्य वा प्रति
बंधाप्रतिबंधकत्वेन युक्तं च. बलवदनिष्टाननुबंधित्वज्ञानस्य हेतुत्वे. तथापि द्वित्रिक्षणानंतरितेपि. द्वेषे इच्छा
प्रवृत्त्योरनुदयस्यानुभविकतया ज्ञानयोरेव न यौगपद्यमित्यभ्युपगमाद्वा पूर्वोक्तप्रतिबंधकत्वस्य हेतु
त्वस्य वावश्यकत्वमिति ध्येयं. तेन द्वेषबलेन त्वविशेषणेनाप्रवृत्तिरित्यादि. प्रवृत्तित्वं च रागजन्यतावच्छेद
कतया सिद्धो जातिविशेषः निवृत्तित्वं च द्वेषजन्यतावच्छेदकतया जीवनयोनियत्नत्वं च साहजिकमोप्राणसं
चारविषयकयत्नत्वँर्णनावादिति. चिकीर्षाप्रतिबलवदनिष्टाननुबंधित्वज्ञानाभावस्य हेतुत्वादिति भावः
कृतिसाध्यताज्ञानादिवदिति. अन्यथा कृतिसाध्यताज्ञानादेरपि. चिकीर्षायामेव हेतुत्वे स्यान्न तु प्रवृत्तौ व्यापारे
ण व्यापारिणा नान्यथासिद्धत्वमिति तु प्रवृत्तेपि समानमिति भावः प्राभाकरमतमाह. कार्यताज्ञानमिति चि
कीर्षा च. तद्द्वारा कृतिसाध्यत्वप्रकारकेच्छाद्वारा द्वयोरेवेति. एवकारोप्यर्थः स्वविशेषणेति. स्वं प्रवर्त्तमानपुरुषः
तद्विशेषणं काम्यकामनानित्यैकालशौचादिः तद्वतापक्षे तत्संबंधं तस्य प्रतिसंधानेज्ञानमित्यर्थः तस्य का
५ ननु. बलवदनिष्टाननुबंधित्वज्ञानाभावस्य हेतुत्वादिति भावः कृतिसाध्यताज्ञानादि प्रवृत्तहेतुत्वे मधुविषसंपृक्तान्नभोजनेप्र

सापत्तिरित्यत आह· मविति। प्रकी ५

न५ स्प२

दि०क० यैताज्ञाने हेतुतालिंगज्ञानविषयता तथाहि. पाको मत्कृतिसाध्यः मत्कृतिं विनाशत्वे सति मदिष्टसाधनत्वा
दित्यनुमानं. अत्र मदिष्टसाधनत्वमात्रोपादाने वृष्ट्यां व्यभिचार इति सत्यन्तं. मदिष्टसाधने परकृत
पाकादौ व्यभिचारवारणाय मत्कृतिं विनेत्यत्र मत्पदं. भ्रमे व्यभिचारवारणाय मदिष्टसाधनत्वादिति.
मदीयभ्रमस्य मच्छत्रोरिष्टसाधनत्वात्तद्दोषतादवस्थ्यमतस्तत्रापि मदिति. न च स्वेच्छाधीनकृतिसा
ध्यताज्ञानमेव प्रवर्तकमन्यथा नान्तरीयकभ्रमे प्रवृत्त्यापत्तेस्तच्चोक्तानुमानान्न सिद्धमिति वाच्यं. स्वेच्छा
धीनकृतिसाध्यत्वस्यैव साध्यत्वादेवं च हेतावपि मत्कृतिं विनेत्यत्र स्वेच्छाधीनत्वं मत्कृतिविशेषणं देयं.
अन्यथाऽस्वेच्छाधीनमत्कृतिसाध्ये मदिष्टसाधने नान्तरीयकजलसंयोगादौ व्यभिचारापत्तेः एवं सति
स्वेच्छाधीनकृतिघटितहेत्वभावादेव भ्रमे व्यभिचारवारणासंभवाद्विशेषादलप्रयोजनं यद्यपि न सं
भवति. तथापि नीलधूमादिवद्धेत्वन्तरत्वाददोषः एवमहमिदानीं मत्कृतिसाध्यसंध्यावंदनः द्विजातित्वे ॥१२४॥
सति विहितसंध्याकालीनशौचादिमत्वादित्यनुमानं यो द्विजातित्वे सति विहितसंध्याकालीनशौचा.

धूमत्वरूपव्याप्यतावच्छेदकघटितनीलधूमत्वरूपव्याप्यतावच्छेदकावच्छिन्नहेतुतावच्छेदकघटितहेतुतावच्छेदकत्वे तत्र यदि च स्वार्थानुमाने दोषाभावेऽपि परार्थस्थले अधि
कमापन्नं तदा न तादृशनीलधूमाभावाभावपरिग्रहः तत्र च हेत्वन्तराद्भिन्नहेतुता. तथा च. यन्निरा व्याप्तिरिति सूचितं. द्विजातित्वे सति विहितसंध्याकालीनशौचादिमत्वात् २ २२

[illegible]

दिमात्मतत्कालीनकृतिसाध्यसंध्यावन्दनइतिसामान्यतोव्याप्तेरिति. नचैवंरीत्येष्टसाधनत्वहेतुकानुमान
संभवेपिपक्षस्यविशेषणावत्ताप्रतिसंधानजन्यंकार्यताज्ञानंनसंभवतिइष्टसाधनत्वस्ययागनिष्ठत्वेन
पुरुषविशेषणत्वाभावात्. इच्छायाश्चपुरुषविशेषणत्वेपितस्यालिंगत्वासंभवात्. लिंगघटकत्वेपि
पक्षेतद्वत्ताज्ञानंनिर्वाहकत्वादितिवाच्यं. काम्यसाधनस्यापिपक्षेयागादौस्वविषयसाधनत्वरूपका
मनासंबंधाज्ञानात्मकत्वाद्वस्तुतस्तद्वत्ताज्ञानंतत्संबंधज्ञानंतत्ज्ञानमेववाननुपक्षोपितत्रातन्मूत:
इतिकाम्यसाधनताज्ञानस्यापिकामनासंबंधज्ञानात्मकतयाकामनाज्ञानात्मकतयाचानुपपत्त्यभावा
त्. ननुस्वविशेषणावत्ताप्रतिसंधानजन्यकार्यताज्ञानस्यप्रवर्त्तकत्वइष्टसाधनताज्ञानशून्यकालेपिपा
केस्वविशेषणकृत्यादिघटितहेत्वन्तरायत्रकार्यतानुमितिर्यथापाकस्वेच्छाधीनमत्कृतिसाध्यःक्रमादि
मत्त्वेसतिमत्कृतिव्यतिरेकप्रयुक्तव्यतिरेकप्रयोगित्वात्. यद्वास्वेच्छाधीनमत्कृतिंविनासत्त्वादिति. तत्रा
पिप्रवृत्त्यापत्तिरतआह. काम्येहीति. कामनायागपाकादिगोचरकामनाक्वचित्तथैवपाठःतथाचस्वविशे

दि०कृ० षणोस्यत्र विशिष्य तादृशकामनारूपमेव स्वविशेषणं वा-च्यमेवं विशेषणत्वमपि स्वविषयसाधनत्वरूपं
वाच्यं.तेन न स्वेच्छाधीनेत्यादि द्वितीयहेतुज्ञानजन्यकार्यतानुमितिस्थले प्रवृत्त्यापत्तिरिति भावः ननु का
म्यसाधनताज्ञानजन्यकार्यताज्ञानस्य प्रवर्त्तकत्वे मधुविषसंपृक्तान्नभोजने प्रवृत्त्यापत्तिरित्यत आह.
ततश्च बलवदनिष्टेति.तथा च स्वविशेषणवत्ताप्रतिसंधाने बलवदनिष्टाननुबंधित्वविषयकत्वविशे
षणं देयमिति भावः ननु तृप्तस्यापि भोजने प्रवृत्त्यापत्तिस्तस्याप्यतीतभोजनकामनाघटितलिंगजन्यका
र्यताज्ञानसत्वादत आह.तृप्तस्येति.तदानीमिति.कामनायास्तदानीं पुरुषविशेषणत्वाभावादित्यर्थः त 199
था च.स्वविशेषणोस्यत्र तदानीन्तनत्वं स्वविशेषणे देयमेवमिति ननु स्वेच्छाधीनेन मत्केति व्यतिरेकप्रयु
क्तव्यतिरेकप्रयोगित्वादिलिंगज्ञानजन्यकार्यताज्ञानात्संध्यावन्दने प्रवृत्त्यापत्तिः कृतेरपि स्वविशेषण
त्वादत आह.नित्यशौचादिकमिति.आदिना विहिततत्तत्कर्मकालस्य परिग्रहः न च कालस्य कथं पुरुषविशे
षणत्वमिति वाच्यं.स्ववृत्तिजीवनवत्त्वसंबंधेन तस्य पुरुषविशेषणत्वात्.विहितकालजीवित्वादेर्वादिपदे ॥१६५॥

भाव:४

स्वकृतिजीवनत्वं ३ः यथार्थः स्वप्रयत्नार्थस्य च प्रत्येकाभिसंबंधः सोनतलोत्तेगी विस्वमुचि त्वविकोल्प

ननुबंधि ४

नग्रहात्. तथाच निसर्गोचरप्रवृत्तिस्थले स्वविशेषणपदेन विशिष्यतत्कालीनरुचित्वादिरूपविशेषण
मेवग्राह्यमिति न पूर्वोक्तातिप्रसंग इति भावः नैयायिकः शंकते नचेति. तदपेक्षया बलवदनिष्टाननुबंधि
त्वविशिष्टेष्टसाधनताज्ञानजन्यकृतिसाध्यताज्ञानापेक्षया. लाघवेनेति. नियमादिघटितजन्यत्वापेक्षः
याविषयत्वस्य लघुत्वादिति भावः ननु बलवदनिष्टाजनकत्वज्ञानं न हेतुः क्वचित्कृत्यासाध्ये बहुतर
स्यापि दुःखस्याबलवत्त्वात्. क्वचिदल्पस्य दुःखस्य बलवत्त्वादननुगतस्याबलवत्त्वस्य दुर्वचत्वादित्यत आ
ह. बलवदनिष्टाननुबंधित्वं चेति. इष्टोत्पत्तीति. इष्टोत्पत्तिनान्तरीयकं यद्दुःखं तदजनकत्वमर्थः एतेन मधु
विषसंपृक्तान्नभोजने प्रवृत्त्यापत्तिरपास्ता इष्टोत्पत्तिनान्तरीयकदुःखातिरिक्तस्य मरणदुःखस्य तेन जन
नात्. अत्र केचित्. सुखमात्रजनके कर्मणि इष्टोत्पत्तिनान्तरीयकदुःखप्रसिद्धमिति तत्र प्रवृत्त्यभावप्रसं
ग इति तदयुक्तं. कष्टं कर्मेति न्यायेन सुखजनके कर्मणि दुःखजनकत्वनियमेनाप्रसिद्ध्यभावात्. मिश्रास्तु
इष्टोत्पत्त्यनान्तरीयकदुःखाजनकत्वमुक्तस्यार्थ इति नाप्रसिद्धिरित्याहुः नचैवं सति नरकसाधनत्वेन प्रमि

दि०क०

तेपरदाराभिगमनादौ रागौत्कट्यात्प्रवर्त्तितेनारद्वेषोत्पत्तानान्तरीयकनरकदुःखजनकत्वेन तस्यानि-
श्वयादिनात आह. बलवद्द्वेषेति. द्वेषे च बलवत्त्वं जातिविशेषः अत एव रागांधस्यापदोऽगम्यागमनादि-
जन्यदुःखेन नादृशो द्वेषः तदा तदुर्बलविषयप्रवृत्तिः साध्यत्वसाधनत्वयोर्विरोधमुपपादयति. असिद्धस्य
हीति. आद्यक्षणवृत्तित्वविशिष्टस्य पाकादेरित्यर्थः सिद्धस्यानाद्यक्षणविशिष्टस्य कृत्यव्यवहितोत्तर-
क्षणसंबंधित्वघटितस्य कृतिसाध्यस्य पाकोत्पत्तिक्षण एव पाकवृत्तित्वात्कालान्तरभाव्योदनादिफलसा- 200
धनत्वस्योदनाव्यवहितपूर्वक्षणसंबन्धित्वघटितस्य चोत्पत्तिक्षणे पाकावृत्तित्वात्तयोरेकक्षणावच्छेदे-
नैकत्रावृत्तित्वरूपविरोधादिति भावः यद्यपि कालान्तरभाव्योदनाव्यवहितपूर्वक्षणवृत्तित्वावच्छेदकधर्म-
वत्त्वरूपमोदनसाधनत्वमाद्यक्षणवृत्तित्वविशिष्टेपि पाके संभवतीति कथं विरोधस्तथापि स्वरूपयोग्यमिद-
न फलोपधायकमिति ज्ञानादृत्यनुदयेन फलोपधायकत्वरूपेष्टसाधनस्यैव संशयसाधारणप्रवृत्तिकार-
णत्वं वाच्यं. पूर्वोक्तं फलोपधायकत्वं चाद्यक्षणविशिष्टे यागादौ न संभवतीति भावः साध्यत्वसाधनत्वयो ॥१६६॥

विरोधित्वेव्युत्पाद्यतयोरेकज्ञानविषयत्वं न संभवतीत्याह. न चैकमेकेनैकदेति. अव्याप्यवृत्तिपदार्थस्य स्व-
स्यावच्छेदकानवगाहिज्ञानं न संभवति. मूले वृक्षः संयोगीत्येव प्रतीतेः. तथा च साध्यत्वसाधनत्वयोः स्व-
स्यावच्छेदकासिद्धत्वसिद्धत्वविषयकमसिद्धः पाकः कृतिसाध्यः सिद्धश्च पाकइष्टसाधनमिति ज्ञानं समू-
हालंबनरूपं वाच्यं. तच्च न संभवति सिद्धत्वासिद्धत्वज्ञानयोः परस्परं विरोधित्वादित्यभिमानः तस्मा-
त्कालभेदादिति. न चेदानीमसिद्धः पाकः कृतिसाध्यः अग्रे च सिद्धः पाकइष्टसाधनमिति ज्ञानादेव प्रवृत्ति-
रस्त्विति वाच्यं. इदानींतनाग्रेतनकालयोरननुगमात्. प्राणित्वस्यापि पुरुषविशेषणत्वेनाहमिदानींतन-
कृतिसाध्यविषभक्षणः प्राणित्वादित्याद्यनुमितिसंभवात् विषभक्षणसाधारणं स्वविशेषणवत्ताप्रति-
संधानजन्यकार्यताज्ञानमिति वलवदनिष्टाननुवंधीष्टसाधनताज्ञौ चाद्यन्यतरलिंगप्रतिसंधानजन्यं.
कार्यताज्ञानं प्रवर्तकं वाच्यं. तदपेक्षया वलवदनिष्टाननुवंधीष्टसाधनताविषयककार्यताज्ञानमतिल-
घ्विति तदेव काम्यनिस्साधारणं कारणत्वेन कल्प्यत इति मिश्रप्रायेण प्राभाकरमतं दूषयति. सैवमिति.

२ वि २

दि०क० साध्यत्वसाधनत्वयोर्विरोधं दूषयति. न चेति. न ह्यस्यार्थः यदा कदाचिदिति. यत्किंचित्कालीनस्यासाध्यत्व
स्य यत्किंचित्कालीनेन साधनत्वेन विरोधाभावादित्यर्थः तथा चैककालीनकृतिसाध्यत्वेष्टसाधन-
त्वयोर्विरोधेपि न क्षतिः स्यात् ज्ञानस्यास्माभिः कारणत्वानंगीकारात्. किं तु निर्विशेषितयोः सामान्यतःऐ
कालीकृतिसाध्यत्वेष्टसाधनत्वयोर्ज्ञानस्यैव हेतुत्वांगीकारादिति भावः तादृशे च ज्ञाने संभवतीत्याह.
एकदेति. इदं च ज्ञानाच्चयिज्ञानात्. ज्ञानसंभवात्. मूलाद्यनवगाहिनोपि वृक्षः संयोगीति ज्ञानस्य 201
उभविकतयाऽव्याप्यवृत्ते ज्ञानं स्वावच्छेदकविषयकमेवेति नियमे मानाभावान्न पूर्वोक्तदोष इति ध्येयं.
प्राभाकरानुयायिनवीनमतमाह. नव्यास्त्विति. ज्ञानमशक्यत्वादिति. सामान्यलक्षणप्रत्यासत्त्यनंगीकारे-
ण प्रत्यक्षस्य पक्षज्ञानाभावेनानुमितेश्चासंभवादिति भावः तदभावात्. यादृशस्य पुंसः कृतिसाध्यो य-
दृष्टं तादृशत्वे ज्ञानाभावात्. नन्विष्टसाधनताज्ञानस्य प्रवृत्तिजनकत्वे भावियौवराज्ये प्रवृत्त्यापत्तिरतआ ||१६७||
ह. इदं तु बोध्यमिति. इष्टसाधनत्वादीत्यत्रादिपदोपगृहीतस्यदानीं तु न कृतिसाध्यत्वस्याघटकत्वं

विदानीतनत्वविशेषणस्याप्रयोजनमाह. तेन भावीति. इष्टसाधनत्वघटकेच्छायां तद्विशेषणस्याप्र
योजनमाह. एवं चन्नईष्टेइति. वलदनिष्टेत्यत्र वलवद्द्वेषेतद्विशेषणंप्रयोजनमाह. प्रवर्त्तते चेति.
प्रवृत्तौ प्रवृत्तेः पूर्वं नरकसाधनत्वज्ञानादिति. नरकरूपवलवदनिष्टसाधनत्वज्ञानादित्यर्थः. उ
त्कटरोगादिनेति. आगम्यागमनादीनां सुखे उत्कटरोगादिनेत्यर्थः. नरकेति. वलवदनिष्टेत्यर्थः.
तिरोधानात्अनुत्पादनात्. तादृशसुखे उत्कटरोगसत्वे आगम्यागमनजन्यनरके वलवद्द्वेषानुद
याद् इति भावः. प्रवृत्तिरूपेति. कृतिसाध्यताज्ञानमित्रप्रवृत्तित्वेन कृतेः प्रवेश इत्यर्थः. इत्थं च. तद्व्यापा
रीभूताइच्छापि प्रवृत्तिसाध्यत्वप्रकारिका बोध्या ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुमद्भावादि
ति. तेन प्रवृत्तित्वनिवेशेन प्राणपंचकसंचारेति. न प्रवृत्तिरिति. न च प्राणानामतीन्द्रियतयाउपा
दानप्रत्यक्षाभावादेव प्राणोपादानकसंचारसाध्यकप्रवृत्त्यापत्तिरिति वाच्यं. प्राणवहनाड्युपादा
नकप्राणसंचारसाध्यकप्रवृत्त्यापत्तिवारणायेव प्रवृत्तिसाध्यताज्ञानहेतुत्वांगीकारात्. यद्यपि

दि०क० यद्यपि प्राणसंचारावृत्तिविशेष्यतासंबंधेन कृतिसाध्यताज्ञानहेतुत्वांगीकारादेव तथाप्रवृत्तिवा
रणं संभवति. तथापि घटादौ जीवनयोनियत्नसाध्यत्वभ्रमात् प्रवृत्त्यापत्तिवारणाय प्रवृत्तिसाध्यत्व
त्वेनर ज्ञानं हेतुत्वमावश्यकमिति ध्येयं. एतेन प्राणसंचारे प्रवृत्तिवारणाय प्रवृत्तिसाध्यताज्ञानस्य हेतुत्वे
पि प्रवृत्तिसाध्यत्वभ्रमात् प्राणसंचारे प्रवृत्त्यापत्तिरित्यपास्तं. न च प्रवृत्तिसाध्यताज्ञानस्य हेतुत्वे
पि भोजननान्तरीयके भ्रमे साध्यतया प्रवृत्त्यापत्तिर्दुर्वारेति वाच्यं. तादृशभ्रमे चिकीर्षाविरहादेव प्रवृ 202
त्त्यनुत्पत्तेः तत्र चिकीर्षाविरहश्च भ्रमस्य दुःखरूपतया दुःखत्वज्ञानस्य इच्छाप्रतिबंधकतया इच्छासामा
न्यसामग्र्या विरहादेव. एतेन नान्तरीयकभ्रमे प्रवृत्तिवारणाय स्वेच्छाधीनकृतिसाध्यताज्ञानस्य हेतुत्वं नै
वाच्यमिति मणिमतमप्यपास्तं. न च सुखे प्रवृत्तिसाध्यताज्ञाने इच्छयोः सत्त्वात्तत्रसाध्यताख्यविषयता-
संबंधेन ज्ञानं प्रति तत्तद्धर्मभेदस्य हेतुतायां प्रवृत्त्यापत्तिरिति वाच्यं. साध्यतया प्रवृत्तिं प्रति फल ॥१७७॥
त्वज्ञानस्य प्रतिबंधकत्वात्. वस्तुतस्तु. तत्तद्धर्मान्यवृत्तिविषयतासंबंधेन ज्ञानं प्रति तद्धर्मभेदस्य हे

३ ताख्यविषयतावच्छेदक
३

तुतायास्तत्र तत्र व्यवस्थापितत्वात्तत्र च कार्य्यतावच्छेदककोटौ ज्ञानत्वस्थाने गुणत्वमेव निवेशनीयं. एवं च. सुखत्वान्तावृत्तिविषयतासंबंधेन गुणत्वस्य कृतिसाध्यताज्ञानजन्यतावच्छेदकीभूतेष्टसाध्यताख्यविषयतासंबंधेन प्रवृत्तित्वं न व्यापकतयातदवच्छिन्नजनकस्य सुखत्वभेदस्य सुखत्वेऽभावादेव न तत्र साध्यंतया प्रवृत्त्यापत्तिः व्याप्यधर्मावच्छिन्नजनकसामग्र्याः फलंजनने व्यापकधर्मावच्छिन्नजनकसामग्र्या अपेक्षितत्वात् अनयैव रीत्या प्राणसंचारित्वे श्रमत्वे च साध्यताख्यविषयतावच्छेदकतासंबंधेन प्रवृत्तिवारणं बोध्यं. तदेव हृदि निधाय प्राणसंचारस्य प्रवृत्त्ययोग्यत्वादेव न तत्र प्रवृत्तिरिति मिश्रैरभिहितमिति दिक्.२ थं चेति. प्रवृत्तिं प्रतीष्टसाधनत्वादिधियो हेतुत्वे चेत्यर्थः इष्टसाधनत्वादीत्यादिना बलवदनिष्टाननुबंधित्वकृतिसाध्यत्वयोः परिग्रहः अत्र च निष्फले प्रवृत्त्यभावादिष्टसाधनत्वेष्टसाधनेपि मधुविषसंपृक्तान्नभोजने प्रवृत्तेर्बलवदनिष्टाननुबंधित्वस्यासाध्ये सुमेरुशृंगाहरणादावप्रवृत्तेः कृतिसाध्यत्वस्य च ज्ञानं प्रवृत्तिहेतुः तच्च विधितद्वतीष्टसाधनत्वादिकं विध्यर्थ इति भावः ननु भावियौवराज्यादौ प्रवृत्तेर्या.

स्य

ख्यविषय
ता..५

रा४

दि०क० रणायेदानींतनकृतिसाध्यताज्ञानादेः प्रवर्त्तकत्वं वाच्यं. तत्त्वं न विधिवाक्यान्ततः शक्यकृतिसाध्यत्वेष्टसा
धनत्वप्रकारकज्ञानस्यैवोत्पत्तेरिति कथं प्रवर्त्तकं ज्ञानं विधिनेति. अत्र वदन्ति. न विधिः साक्षात्प्रवर्त्तकं
ज्ञानमुत्पादयति. किंतु विधिवाक्यादिष्टसाधनत्वे कृतिसाध्यत्वे चावगते किमिष्टमित्याकांक्षायां स्वर्गक
र्मादिपदसमभिव्याहारात्स्वर्गस्य साधनमिति ज्ञानमानुमानिकं मानसं वोत्पद्यते अन्यथाविशेषरूपेण ज्ञान४
फलज्ञानाभावात्प्रवृत्त्यनुपपत्तेरेवमिदानींतनत्वान्तर्भावेण कृतिसाध्यत्वादिज्ञानमनुमानादिति. अ 203
तएवोक्तं मणिकृतापि एवं विधिजन्यज्ञानजन्यं ज्ञानं प्रवर्त्तकमिति. अत्र भट्टपादाः लोके प्रवृत्तिर्द्विधा. स्वे
१२४ च्छाधीना परप्रेरणाजन्या च तत्र आद्यायां प्रवर्त्तनायामुपयोगो द्वितीयप्रवृत्तौ साप्रयोजिका आचार्यप्रेरणये या४
दं करोमीति व्यवहारात्. प्रवर्त्तना च प्रवर्त्तयितुः प्रवृत्त्यनुकूलव्यापारविशेषः स च चेतनस्याभिप्राय एव अचे
तनस्य तु वेदस्याभिधानात्मकः कश्चिच्छब्दसमवेतः तथा चाभिप्रायज्ञानाद्यथा शिष्यः प्रवर्त्तते तथा
भिधानाद्विधिस्थले प्रवृत्तिरिति सैवा लिङर्थः सैव च शाब्दभावना लिङंशेनोच्यते आर्थभावना त्वाख्यात ॥१२८॥

ऽंशेन तदुक्तं· अभिधाभावनामाहुरन्यामेव लिङादयः अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचर इति
अभिधाशब्दस्तन्निष्ठा भावना अभिधाभावना अर्थो यागादि रात्मा वा अर्थात्मकत्वं चार्थगोचरत्वमर्थाः
श्रितत्वं वा तथा च योगादिगोचरा आत्माश्रिता प्रवृत्तिरर्थभावना अत्र च शब्द[illegible]भावनाया अर्थभा
वनैव भाव्या अर्थभावनाया [illegible]फलं स्वर्गादीति बोध्यं· तदुक्तं लिङोऽभिधानस्यैव च शब्दभावनाभाव्या·
च तस्याः पुरुषप्रवृत्तिः संबंधबोधः करणं तदीयप्ररोचना चांगतयोपयुज्यत इति अस्यार्थः लिङोऽभिधा·
वाच्या तस्यां किं भाव्यमित्याकांक्षायामुक्तं भाव्या च तस्या इति केन भाव्येत्याकांक्षायां संबंधेति संबंधबो
धलिङादिपदशक्तिज्ञानं· तत्रालस्येन निवर्त्तमानं पुरुषस्तुतिरुत्तेजयतीति सा सहकारिणी साह· प्ररोच·
नेतीति वदन्ति तत्र लोके स्वेच्छाधीनप्रवृत्ताविष्टसाधनताज्ञानस्य हेतुत्वेन क्लृप्तत्वादन्यत्रापि प्रवृत्तौ तदे
व हेतुरस्तु· किमतिरिक्तप्रवर्त्तनाज्ञानस्यातिरिक्तहेतुत्वेन अत एव वेदेपि न प्रवर्त्तनाज्ञानं हेतुः शब्दशक्ति·
भिन्नायामभिधायां मानाभावाच्च· अत एव मंडनमिश्राः पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्त्तकः प्रवृ

दि॰क॰ त्तिरेतु धर्मं च प्रवदन्ति प्रवर्त्तनामित्यादिना प्रवृत्त्यनुकूलत्वेनेष्टसाधनत्वमेव प्रवर्त्तते इत्युक्तवन्त इ
ति। नन्वेवं विश्वजिता यजेतेत्यादौ फलाश्रवणेनेष्टसाधनताज्ञानाभावात्प्रवृत्तिर्न स्यादत आ
ह॰ इत्थं चेति॰ इष्टसाधनत्वादेर्विध्यर्थत्वे चेत्यर्थः ननु नित्ये संध्योपासनादौ फलाभावान्नेष्टसा-
धनत्वज्ञानं प्रवर्त्तकं न वा तद्विषयो विध्यर्थ इत्यभिप्रायेण शंकते॰ नन्विति॰ न चार्थवादिकमिति॰ स
न्ध्यामुपासते ये तु सततं संशितव्रताः। विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनमित्यर्थवादिबोधित 204
मित्यर्थः नित्यत्वहान्यापत्तेरिति॰ नित्यत्वकाम्यत्वयोर्विरोध इत्यभिप्रायः ननु तयोर्विरोधे मानाभा
वः अहरहः संध्यामुपासीतेत्यादिश्रुतिसंध्यामुपासत इत्यर्थवादयोरेकवाक्यतावलेन तत्कालजी
विफलकामस्य संवलिताधिकारः कल्प्यत इत्यत आह॰ कामनामा इति॰ अकरणापत्तेरिति॰ अक
रणप्रत्यवायानुत्पत्त्यापत्तेरित्यर्थः कामनारूपाधिकाराभावादनधिकृतना करणस्य प्रत्यवायज
नकत्वाभावादिति भावः ननु तथापि नित्यस्य लीयफलश्रुतेर्वैयर्थ्यमित्याशंक्यार्थवादतयास्तु ॥१२॥

तिमात्रे तात्पर्य्यकस्यात इत्याहुः इत्थं चेति. कल्पनादिति. इदमुपलक्षणं. अर्थवादोपस्थितकामनायाः
अधिकारेपि अकुर्वन्विहितं कर्मेत्यादिनाशौचे सति विहिताननुष्ठानस्य प्रत्यवायजनकत्वबोधनात्का
मनासंवलितस्याशुचित्वादेरधिकारत्वं किंतु नित्यस्थले फलकामनाशुचित्वयोरधिकारयोः संवल
नं तथा च. कामनाशुचित्वादिरूपाधिकारसत्वात्तदा संध्याद्यकरणे प्रत्यवायजनकत्वमेव. कामना
या अधिकारत्वेपि तदधिकारवतः शौचादिविरहितः संध्याद्यकरणस्य प्रत्यवायजनकत्वेन कल्प्यते. शु
चितत्कालजीवित्वरूपाधिकारैकदेशवतोप्यकरणे प्रत्यवायजनकत्वं कल्पनेन संवलिताधिकारत्वेपि क्ष
तिविरहाच्चेत्यपि द्रष्टव्यं. एतेन तत्र नियमेन फलकामनासत्वे मानाभावेपि न क्षतिरिति. ननु नित्यगोचर
प्रवृत्ताविष्टसाधनताज्ञानं कारणमेव नेत्यनेनैवोपपत्तौ किमर्थं नित्यस्यापि काम्यत्वं कल्पनीयमत आ
ह. नन्विति. स्वेष्टसाधनत्वमिति. अन्वयव्यतिरेकाभ्यां प्रवृत्तित्वावच्छिन्नं प्रतीष्टसाधनताज्ञानस्य हेतुत्वा
दिति भावः अत एव कुसुमांजलौ संध्योपासनमफलमपि क्रियते वेदबोधितत्वादित्याशंक्य गुरुमतमेव.

अकुर्वन्विहितं कर्म निन्दितं च समाचरन् ॥
प्रसक्तश्चेन्द्रियार्थेषु नरः पतनमृच्छति ॥२

भवनस्मा
वान ५
वचनस्ज
वान.६

दि०कं० न्नष्टोन्मतमित्यभिधायैवोपेक्षितमाचार्यैः यच्चपंडापूर्वंस्वतः प्रयोजनं नित्यस्य कर्म्मण इति प्राभाकर
मतं तदपि दूषयति. यदपीति. कामनाभावेपंडापूर्वात्मकफलकामनाभावे रात्रिसत्रन्यायादिति. य
थाहि. रात्रिसत्रशब्दवाच्यानां ज्योतिर्गौरित्यादिनाकोत्पन्नकर्मणां फलजिज्ञासायामत्यन्नाश्रुतत्स्वर्गा
दिकल्पने गौरवाद्विश्वजिन्न्यायापवादेन प्रतितिष्ठन्तिप्रत्यवाय एव. रात्रीरुपयन्तीत्यर्थवादश्रुतप्रति
ष्ठैव फलमिति सिद्धान्तितं. तथात्राप्यर्थवादिकं ब्रह्मलोकफलं लाघवानै.दित्यर्थः अन्यथाफलाभावे
तेनःआर्थवादिकफलकल्पने लाघवेन. तत्र तत्रार्थवादिकं फलं प्रदर्शयति: अनुत्पन्नमित्यादिना. 205
अतएव पितृप्रीतेः श्राद्धफलत्वादेव. उत्सर्ग इतीति. श्राद्धादिफलस्य कर्तृमात्रगतत्वे तु व्यभिचाराभावा
न्नियम एव स्यादिति भावः पंडापूर्वस्वीकारेपि तत्साधनताज्ञानस्याप्रवर्तकत्वं न संभवतीत्याह. पंडा
पूर्वार्थमिति. न वा तत्साधनमिति. तथा चेच्छाविषयत्वाभावेन फलत्वाभावान्न तत्साधनताज्ञानप्रव
र्तकमिति भावः ननु त्वन्मतेपि प्रत्यवायानुत्पत्तेः कथं फलत्वं. स्वतः पुरुषार्थत्वाभावात्. न वा दुःखानुट ॥१८०॥

स्य३ तदभावःप्रत्यवायाभावस्याभावः४

प्तिरूपपुरुषार्थसाधनत्वेन तत्रेष्टविषयत्वं दुःखानुत्पत्तेः प्रागभावरूपायास्तदजन्यत्वादिनाशंकापरिहरति
प्रत्यवायेत्यादिना अनुत्पत्तावित्युद्देश्यकत्वं सप्तम्यर्थः कथं प्रवृत्तिरिति पूर्वोक्तरीत्या प्रत्यवायानुत्पत्तेः फ
लत्वाभावेन तत्साधनताज्ञानं प्रवृत्तिहेतुत्वात्संध्यावन्दनादौ कथं प्रवृत्तिरित्यर्थः प्रत्यवायाभावः प्रत्यवा
यप्रागभावः तदभावे संध्यावंदनादिनित्याभावे. तदभावे प्रत्यवायाभावस्याभावे तदभावः दुःखप्राग-
भावाभावो दुःखरूपः योगक्षेमसाधारणेति. योगः अप्राप्तस्य प्राप्तिः क्षेम सिद्धस्य संरक्षणं प्रवृत्तिप्रती
ष्टसाधनताज्ञानस्य हेतुतायां साधनतायाः क्षेमसाधारण्या एव प्रविष्टत्वादिति भावः प्रागभावस्य प्रति
योगिविकल्पग्रासेन फलत्वासंभवात्प्रत्यवायोत्पत्त्यभाव एव नित्यस्य फलं स्वरूपसंबंधविशेषात्मकक्षे
मसाधारणाजन्यताया अन्यत्राभावे सत्त्वादिति तु नव्याः एवमेव योगक्षेमसाधारणमेव. ननु न कलंजमि
ति. अकलंजभक्षणाभाव इष्टसाधनमित्यन्वयबोधाभ्युपगमे बाधकाभावादाह. विध्यर्थे कथं नञर्थे
ति. विध्यर्थनञर्थयोः कथमन्वयः विध्यर्थेष्टसाधनत्वाद्यन्वितनञर्थात्यन्ताभावस्य कलंजभक्षणे कथं

दि०क

सन्चयइत्यर्थः अभक्ष्यत्वादिति. कलंजभक्षणे तस्याबाधादिति भावः बलवदनिष्टाननुबंधित्वमात्रमि-
ति. ॰ष्टे॰ कृतिसाध्यत्वादिषु त्रिषु शक्तिस्वीकारेण कश्चित्कस्यचित्कश्चित्कस्यचिदर्थस्य बोधस्वीकारादि-
ति भावः प्रवृत्तिं प्रति कृतिसाध्यत्वविशिष्टबलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वज्ञानत्वेनैक-
मेव हेतुत्वं लाघवात् न तु कृतिसाध्यत्वादिप्रत्येकविषयकज्ञानत्वेन गौरवात् तो विधेरपि विशिष्टमेव.
शक्यं वाच्यं. एवं च निषेधस्थलेपि विशिष्टाभावो विधिसमभिव्याहृतनञा बोध्यत इत्यभिप्रायवानाह अ- 206
थवेति. विशेषणाभावे विश्राम्यतीति. एवं चेष्टसाधनत्वादि कलंजभक्षणादौ विशिष्टाभावो बोध्यमाने
बलवदनिष्टाननुबंधित्वाभावे पर्यवस्यतीति भावः विशिष्टस्य विध्यर्थत्वे श्येने बलवदनिष्टाननुबंधि-
त्वरूपविशेषणाबाधात्कथं विशिष्टस्य विध्यर्थस्य बोध इत्याशंकते. ननु श्येनेनेति. श्येनेति कर्मनामधेयं.
अभिचरन्. वैरिमरणं कामयन्. कथमिति. श्येने तस्य बाधितत्वाभावात् अर्थः विधिजन्यबोधविषयः वैध-
त्वान्न निषेध इतीति. यज्ञीयपश्वालंभनानुरोधेन माहिंस्यादिनिषेधस्य वैधहिंसेतरहिंसापरत्वादिति ॥१६१॥

मतिप

भावः अभिचार इति. तथाभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहतीति तत्र प्रायश्चित्तोपदेशाद्वैयर्थ्यापत्त्या.
निषेधस्य विधेस्तदतिरिक्तपरत्वं न संभवतीति भावः नचैवं यज्ञीयपशुहिंसाया अपि प्रत्यवायाजनक
त्वापत्तिरिति वाच्यं. अनुपदिष्टप्रायश्चित्तहिंसेतरहिंसापरत्वान्माहिंस्यादिति निषेधविधेरिति. साक्षा
न्मरणानुकूलव्यापार एव हिंसा न हि श्येनस्तथेति. श्येनस्य माहिंस्यादिनिषेधाविषयत्वादस्यैव बलवद
निष्टाननुबंधित्वमित्यभिप्रायेण साक्षात्परंपरासाधारणमरणानुकूलव्यापारमात्रस्य हिंसात्वे दोषमा
ह. मरणानुकूलव्यापारमात्रं यदि हिंसा तदेति. साक्षात्परंपरासाधारणः सर्वोपि व्यापारो यदि हिंसा तदेत्य
र्थः ननु मरणोद्देश्यकत्वनिवेशेन्योद्देशेन प्रक्षिप्तनाराचेन यत्र ब्राह्मणमृतिस्तत्र प्रायश्चित्तं न स्यात्. तस्य
हिंसात्वाभावेन माहिंस्यादिनिषेधाविषयत्वादत आह. अन्योद्देशकेति. वाचनिकमिति. ननु माहिंस्यादि
निषेधाविषयतयेति भावः अदृष्टाद्वारकत्वेनेति. श्येनस्यादृष्टद्वारैव मरणसाधनत्वादिति भावः ननु.
श्येनस्याहिंसात्वे किमदृष्टद्वारकत्वविशेषणेनेत्यत आह. अत एवेति. अदृष्टद्वारकत्वविशेषणादेवेत्यर्थः नहि

वैरि२

दि०के० सात्वमिति. तथा च तादृशशिवपूजनादेर्हिंसात्ववारणायावश्यकेनादृष्टाद्वारकत्वविशेषणेन श्येनस्यापि हिंसात्ववारणमिति भावः. ननु साक्षान्मरणजनकत्वविशेषणादेव तादृशशिवपूजनश्येनादेर्वारणे किमदृष्टाद्वारकत्वेन गुरुविशेषणेनेति तटस्थः शंकते न च साक्षादिति. अदृष्टाद्वारकत्वविशेषणं विनैव श्येनबलवदनिष्टाननुबंधित्वमुपपादयितुं मतमाह. केचिदिति. हिंसाफलमिति. साक्षान्मरणफलको व्यापारः फलमित्यर्थः. तस्य खड्गाभिघातादेः पापजनकत्वमिति. अभिचारमहीनं चेत्यादिना [illegible] अभिचारस्य पापजनकत्वबोधनात् साक्षान्मरणजनकव्यापारस्यैवाभिचारपदार्थत्वादिति भावः. न च पूर्वेन श्येनेत्यादिना साक्षान्मरणजनकव्यापारस्यैव हिंसात्वमित्यस्याशंकितत्वात्तेन पौनरुक्त्यमिति वाच्यं. पूर्वं साक्षान्मरणजनकस्य श्येनजन्यापूर्वस्य हिंसात्वमाशंकितमिह च तथाभूतस्य खड्गाभिघातादेरिति भेदात्. न चादिपदेन श्येनजन्यापूर्वस्य तथाभूतस्याग्रहणात्कथं भेद इति वाच्यं. श्येनजन्यापूर्वस्यैतन्मते खड्गाभिघातं प्रत्येव व्यापारतया तस्य मरणजन्यकत्वाभावात्. न च साक्षान्मरणजनकव्यापारस्य हिंसात्वे ख 207 ॥१६२॥

ङ्गघातेन ब्राह्मणो व्रणपाकपरंपरया मृते हिंसात्वानुपपत्तिस्तदवस्थैवेति वाच्यं. तत्र खड्गघाताद्युत्तरमेव सन्नि
पातादिदोषस्योत्पत्त्या मरणोत्पत्तेस्तस्य व्यापारतया व्यापारेण व्यवधानासंभवात्. कुतस्तर्ह्यास्तिकानां श्येनेन प्र
वृत्तिरत आह. अस्तिमेति. तथा च पापप्रयोजकत्वान्न तत्रास्तिकानां प्रवृत्तिरिति भावः. अत्र नव्याः. मास्तु श्येनस्य
माहिंस्यादिनिषेधाविषयत्वं तथाप्यभिचारतया पापजनकत्वं सर्वसम्मतं. अभिचारस्योपपातकमध्ये मनुनाप
रिगणितत्वादिति कथं तस्य बलवदनिष्टाननुबंधित्वं. यद्वा तत्र श्येनजन्यखड्गाभिघातादेरेवाभिचारतया पाप
जनकत्वेन श्येनस्येति न दपिन अभिचारमहीनं चेत्यत्राभिचारपदेन तज्जनकश्येनादेर्ग्रहणादन्यथा प्रत्य
भिचारेण यत्र न खड्गघाताद्युत्पत्तिस्तत्र प्रायश्चित्तं न स्यात्. एवमपि श्येने पापप्रयोजकतया बलवदनिष्टाप्रनु
योजकत्वोपपादनस्याशक्यत्वाच्च. प्रवृत्तिं प्रति बलवदनिष्टाप्रयोजकत्वज्ञानस्यैव जनकतया तद्विषयस्यैव वि
ध्यर्थत्वात्. तथा च श्येनस्य बलवदनिष्टाननुबंधित्वमुपपाद्य विधेर्बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाध
नत्वविशिष्टकृतिसाध्यत्वे शक्तिरयुक्ता किंतु त्रिषु शक्तित्रयं स्वीकृत्य क्वचित्कस्यचिदर्थस्य बोध इत्यंगीकरणीयं
श्येनेनेष्टादेर्बलवदनिष्टाननुबंधित्वस्य बोधो न भवत्येव परं त्विष्टसाधनत्वकृतिसाध्यत्वयोरेवेति. किं

दि०कु० द्विशेषणाविशेष्याभावे विनिगमनाविरहेणापि विशिष्टे शक्तिर्न युक्ता. न च प्रत्येकं शक्तिमभ्युपेत्य कस्यचिदर्थस्य बोधोपगमे नियामकाभाव इति वाच्यं. तात्पर्यस्यैव नियामकत्वात्. प्रत्येकशक्तिपक्षेऽगम्यां गच्छेदित्यादिवाक्यानामिष्टसाधनत्वादिभ्रमाजनकतया प्रामाण्यापत्तिरित्यपि न. उक्तापत्तेः तत्राप्रामाण्यव्यवहारस्तु कदाचिद्बलवदनिष्टाननुबंधित्वभ्रमजनकत्वनिबंधनः. न च बलवदनिष्टाननुबंधित्वे सतीष्टसाधनत्वे सति कृतिसाध्यः पाक इत्येव बोधो न तु कृतिसाध्यत्वे सतीत्यादिरूप इति विशिष्टशक्तिपक्षेऽपि न विनिगमनाविरह इति वाच्यं. तथैव बोधो नान्यथेत्यस्य शपथनिर्णेयत्वात्. तस्माद्बलवदनिष्टाननुबंधित्वादिषु प्रत्येकं शक्तिरिति. प्रथमकल्प एव युक्तः. तत्रापि बलवदनिष्टाननुबंधित्वे नार्थः. यागादिजन्यनान्तरीयकदुःखस्यापि यदा कदाचिद्यस्य कस्यचिद्बलवद्द्वेषविषयतया यजेतेत्यादीनामप्रामाण्यापत्तेः श्व. अश्वमेधादौ यदा यः पुरुषः प्रवर्त्तते तत्कालीनतत्पुरुषीयबलवद्द्वेषविषयाजनकत्वमर्थ इति न सत्. कालभेदेन पुरुषभेदेन च विधिविधिशक्तिकल्पने गौरवात्. कालविशेषपुरुषविशेषाणाविशिष्य ज्ञातुमशक्य ॥१८३॥ 208

२ नकत्वं जामित्यादिनिषेधविधिवदश्वमेधेन न यजेतेत्यादीनामप्रामा

३ माण्यापत्ते

पुष्येनोद्धरे
त्–यांप

तथाकालविशेषपुरुषत्वेशेषान्नर्मोवेगाशक्केईग्रहत्यास्वनाश्वमेधेनयजेतेत्यादिनिषेधविधिवन्नकलं
जंभक्षयेदितिनिषेधविधीनामप्रामाण्यापत्तिश्च.यत्रयदायःपुरुषःप्रवर्त्ततेतत्कालीनतत्पुरुषीय
बलवद्द्वेषविषयाजनकत्वस्यतत्रापिसत्वात्.किंतुवैदिकविधेःपाकाजनकत्वमर्थःतदभावएवन
कलंजंभक्षयेदित्यादौबोध्यतेशाकंनभुंजीतेत्यादिवाक्यस्यप्रामाण्येनिर्वाह्यरोगाजनकत्वमप्यर्थः.एवं
पुष्येनोद्धरेन्नैवपर्वतमारोहेत्यादावपितत्तदनिष्टाजनकत्वमर्थोबोध्यः.नचशास्त्रानंस्यनरकत्वेरोग
त्वादीनांद्वेषविषयतावच्छेदकत्वेनोपलक्षणीभूतेनानुगमनमपितदच्छिन्नप्रतियोगिताकाभावकूटे
एवशक्त्युपगमात्.रोगा[illegible].जनकत्वादौलौकिकलिङ्.लक्षणाभ्युपगमादितिवदन्ति.विध्यर्थस्याप्राणि
प्रायःस्वचस्वेष्टसाधनतानुव्यापिकइष्टसाधनताज्ञानंचप्रवर्त्तकमित्युदयनाचार्यमतमाह.आचार्याउ
स्त्विति.पाकंकुर्य्याइत्यादौत्यादिनापाकंकुर्यामित्युत्तमपुरुषपरिग्रहः.आज्ञादीत्यादिनामध्यमपुरुषपरिग्र
हः.त्वयावपाकंकुर्याःपाककुर्यामितिमध्यमोत्तमपुरुषयोराज्ञाध्येषणारूपेच्छावाचित्वंक्लृप्तेनदृष्टान्तेनप्रथम

पुरुषेच्छावाचित्वमनुमेयमितिभावः लाघवादिति बलवदनिष्टाननुबन्धीष्टसाधनत्वापेक्षयाऽइष्ट
दि०कृं० त्वेऽतिशिष्टशक्तौ लाघवादित्यर्थः इत्यर्थः इति बोध्यः अनुमायेतेति. यागो मम स्वर्गकामस्य बलवदनिष्टान
नुबंधीष्टसाधनं मत्कृतिसाध्यतया आप्तेनेष्यमाणत्वात्. मन्मात्रकृतिसाध्यतयेष्टमामिन्द्रोजनव
दित्यगुणमाणमवधेयं तदभावात्. आप्तेष्टत्वाभावेन न तदुक्तेष्टसाधनत्वज्ञानाभावात्. ननु वेदवक्तुरभा
वात्कस्येच्छा लिङा बोधनीयेत्यत आह. यस्मादिति. विधिरेवेति. वक्तृभिन्नेच्छाबोधने विधेः सामर्थ्याभावा १०१
द्विधिरेव वेदवक्तरीश्वरे मानमिति भावः. न च कर्तुः स्मरणमिति. ननु वेदकर्तुरस्मरणं स्मृतिनिर
बोधनं. तथा च वेदो न पौरुषेयो स्मर्यमानकर्तृकत्वादित्यनुमानं बाधकमित्यर्थः कपिलकणादेति. क
पिलकणादगौतमादिभिस्तच्छिष्यैश्चाद्यपर्यन्तमित्यर्थः कर्तृस्मरणस्य सकर्तृकत्वबोधकस्येत्य
र्थः ननु ईश्वरस्य वेदकर्तुः सर्गादौ केनचित्साक्षाददृष्टत्वादननुभवे स्मरणं न तदभावे ऋषीणां स्मृति
प्रणयनं च न संभवतीति चेन्न. पौरुषेयत्वानुमानेन वेदकर्तारमनुभूय तन्मूलकस्मरणस्मृतिप्रण ॥१६४॥

यनयोः संभवात्. अन्यथा वेदे सकर्तृकत्वानंगीकारे. तत्रैव स्मृतिष्वेव वेदस्यासकर्तृकत्वे श्रुतिं प्रदर्श्य
स्मृतिमपि प्रदर्शयति. एवमिति. ननु वेदस्य नित्यत्वबोधकं भारताद्येव तस्याकर्तृकत्वे प्रमाणं भविष्यती
त्याशंकते. स्वयंभूरिति. नित्येत्यस्यार्थः एषः भगवानित्यपि वेदविशेषणं. स्तुतिमात्रमिति. तथा च पूर्वोक्त
श्रुतिस्मृत्योर्विरोधे नास्य भारतस्य तस्यार्थे तात्पर्यमपि तु स्तुतिपरत्वमिति भावः. भ्रमादिसंभवात्. पु
रुषस्य भ्रमप्रमादादिदोषसंभवादित्यर्थः. नित्यसर्वज्ञेति. नित्यसर्वविषयकज्ञानवत्वेनेत्यर्थः. निर्दो
षात्. भ्रमादिशून्यत्वात्. अत एव नित्यसर्वज्ञत्वाभावादेव. ननु नित्यसर्वज्ञपुरुषप्रणीतत्वापेक्षया नि
त्यनिर्दोषत्वं वेदे स्वीकृत्य तदेव वेदप्रामाण्यप्रयोजकमस्तु. तथा च सकर्तृकत्वानुमाने बाधः इत्यतो वेदस्य नि
त्यत्वे बाधकमाह. किं चेति. तत्संदर्भस्येति. तन्निष्ठानुपूर्वीविशेषस्येत्यर्थः. आनुपूर्व्या नित्यत्वे त्वनित्यस
मवेतानेत्यस्य जातित्वेन आनुपूर्व्या जातित्वापत्तेरिति भावः. अत्र चापीच्छाविषयत्वस्येश्वरेच्छाविषयत्वरू
पस्याकेवलान्वयिनः कलंजभक्षणेपि सत्वाद्बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वरूपसाध्यस्य

दिनक०

चतत्त्वाभावेन व्यभिचारात्. कथं तस्मात्तदनुमापकत्वं. वलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्व
प्रकारकेच्छायालिङर्थत्वेच लाघवाद्बलवदनिष्टाननुबंधीष्टसाधनत्वमेव लिङर्थोस्तु. कृतप्राप्ते
छयेत्यास्वरस आचार्यास्त्वित्यनेन सूचितः नन्विष्टसाधनत्वस्य न विधितो बोधः स्वर्गसंभवतिसाधन स्वर्ग
त्वस्यायोगे बाधात्. गंगास्नानादिजन्यस्वर्गे व्यभिचारात्स्वर्गनिष्ठवैजात्यावच्छिन्नसाधनत्वस्ययोगेस
त्वेस्ययोगिसंत्वेपि तद्वैजात्यस्य विधिबोधितस्वर्गसाधनत्वान्यथानुपपत्त्या कल्पनीयस्याप्यनुपस्थि
त्यातत्घटितकारणत्वे विधिशक्तिग्रहायोगादिति चेन्न स्वरूपसंबंधविशेषरूपाया एव कारणतायाः 210
विध्यर्थत्वोपगमादित्येके. अन्यथासिद्धिनिरूपकतानवच्छेदकनियतोत्तरवर्त्तितावच्छेदकधर्मव
त्त्वमेव स्वर्गकारणत्वं. न च यागेन बाधितं स्वर्गनिष्ठवैजात्यरूपस्वर्गधर्मावच्छिन्नं प्रति यागस्य व्यभि
चाराभावात्. ननु विधेरिष्टसाधनत्वेशक्तत्वेपि स्वर्गसाधनत्वस्य कथं ततो बोधः स्वर्गसाधनत्वादेर्वि ॥१८५॥
विधिशक्तिकल्पने तु शक्यानंत्यं. न च विधिप्रत्ययोपस्थितेष्टे स्वर्गपदोपस्थितस्वर्गस्याभेदेनान्वया
त्स्वर्गकत्वमेव स्वर्गकारणमित्यन्ये. वस्तुतस्तु. स्वर्गनिष्ठधर्मावच्छिन्ननिरूपितनियतपूर्ववर्त्तितावच्छेदकधर्म२

ने

स्वर्गाभिन्नेष्टसाधनत्वस्यैवबोधःसंभवतीतिवाच्यं.स्वर्गपदस्यसमासान्तर्गततयातदर्थस्यान्यत्रान्वयासंभवादितिचेन्न.स्वर्गसाधनत्वादेःविधेशक्तिकल्पनेनतथाबोधनिर्वाहात्.नचैकैकस्यबोधेविनिगमकाभावः स्वर्गादिसमभिव्याहाराधीनतत्तद्धर्मघटितसाधनत्वेनास्यार्थग्रहस्यैवविनिगमकत्वात्.नचैवंविधिशक्त्यानन्त्यं.स्वर्गत्वादिधर्मावच्छिन्ननिरूपितसाधनत्वेषुएकशक्त्युपगमात्.नचशक्यतावच्छेदकभेदाच्छक्तिभेदःइष्टतावच्छेदकत्वेनस्वर्गत्वादीन्यनुगतीकृत्यदेतेवच्छिन्ननिरूपितसाधनत्वेएकशक्त्युपगमात्.नचेष्टतावच्छेदकत्वेनशाब्दबोधेस्वर्गत्वादीनांभानंस्या[illegible]तुस्वरूपतइतिवाच्यं.इष्टतावच्छेदकत्वस्योपलक्षणतयाशक्तिविषयत्वाद्विशेषणस्यैवशाब्दबोधेभानोपगमात्उपलक्षणत्वंच.तत्पदजन्यबोधविषयत्वेनशक्यविषयत्वं.तत्पदजन्यबोधविषयत्वेनशक्तिविषयत्वमेवचविशेषणत्वमित्यन्यत्रविस्तरः.समवायिकारणस्येति.तत्साध्यकप्रवृत्तिंप्रतितत्समवायिकारणात्मकतदुपादानगोचरलौकिकप्रत्यक्षस्यहेतुत्वं.नचशब्दसाध्यकप्रवृत्तिर्मृदंगादौनस्यात्तदुपादानस्यगगनस्यातीन्द्रियत्वादेवंध्वंससाध्यकप्रवृत्तिरपितत्समवायिनोप्रसिद्धेरि

तिवाच्यं.इत्यापत्तेःशब्दसाक्षात्कारसाध्यकप्रत्यक्षान्तरेव मृदंगादिगोचरायाउपगमादितिप्राचीनमतानुसा
रेण.नवीनमतेत्वधिष्ठानमात्रमुपादानंबोध्यं.तेनयागादेर्हविःशब्दस्यमृदंगादेःप्राणसंचारादेश्चप्राणव
हनाद्यादिरूपादानमितिबोध्यं.मूलेद्वेषादिति.फलगतोद्वेषोद्विष्टसाधनताज्ञानंचनिवृत्तिप्रतिकारण
मित्यभिप्रायेणोक्तं.प्राणसंचारोहीति.अधिकश्वासादिरूपःप्राणसंचारोयत्नसाध्यःप्रत्यक्षयत्नसाध्य
तयादृष्टः:धावतःप्रयत्नोत्कर्षेणश्वासक्रियोत्कर्षदर्शनादितिभावः.इत्थंचेति.दृष्टान्तसिद्धावित्यर्थः.सर्वस्ये. 211
ति.एकत्रयत्नसाध्यत्वस्यानुभविकत्वेनतद्दृष्टान्तेनप्राणसंचारत्वावच्छेदेनभोक्तृयत्नजन्यत्वानुमानादि
तिभावः.सएव.प्राणसंचारहेतुत्वेनानुमीयमानएव.नचास्तुजीवनयोनियत्नेमानाभावःप्राणक्रियायाअ
दृष्टउक्तानुमानस्याचाप्रयोजकत्वादन्यथाएकत्रयत्नेज्ञानजन्यत्वदृष्टान्तेनजन्ययत्नत्वावच्छेदेनज्ञानजन्
न्यत्वकल्पनापत्त्यासुषुप्तौज्ञानादेरप्यतींद्रियस्यकल्पनापत्तेरितिप्राहुः.पतनसमवायिभिन्नत्वरूपंपतना।।१६।।
समवायित्वंरूपादानवतिव्याप्तमतोव्याचष्टे.असमवायिकारणमिति.द्वितीयादिपतनस्यवेगासमवायिकं
विशेषाप्रयोज्यात्ममनोयोगरूपाज्जीवनान्नप्रयोजकादृष्टाद्यसंभवात्.२

रणत्वादाह. आद्येतिएवंच। संयोगासमवधानकालीनाक्रियागुणासमवायिकारणिकाक्रियात्वा
द्संयोगजन्यक्रियावद्वृत्त्यनुमानेनगुरुत्वसिद्धिरितिभावः. अग्निसंयोगजन्यमिति. अग्निसंयोगासम
वायिकारणमित्यर्थः वक्ष्यमाणेति प्रसंगादाह. स्नेहसहितमिति नच सांसिद्धिकमेव न याच सांसि
द्धिकद्रवत्वत्वेन हेतुत्वान्नसुवर्णादिद्रवत्वेन संग्रह इति भावः नचावश्यकस्नेहहेतुत्वे नैवाद्रवप्रसंगे सं
सिद्धिकद्रवत्वत्वस्य संग्रहे हेतुत्वे मानाभाव इति वाच्यं. स्नेहत्वेन सांसिद्धिकद्रवत्वत्वेनावा हेतुत्वमित्यत्र. वि.
निगमनाविरहेणोभयस्यापि हेतुत्वात्. आद्ये तैले प्रतीयमानः जलीयः तैलान्तर्गतजलभागनिष्ठः तथा
सति. तैलान्तर्गतभागस्वीकारे दहनप्रातिकूल्यप्रसंगात्. दहननाशप्रसंगात्. दहननाशं प्रति संयोगेन ज
जस्य हेतुत्वादिति भावः वेगोजन्यतर इति. वेगत्वं तु जातिविशेषः प्रत्यक्षासिद्धः तेन चेति. कर्मनाशकस्यान्तर
संयोगस्य तदानीमभावाद्वेगस्यैव कर्मनाशकत्वं कल्प्यत इति भावः तत इति. पूर्वकर्मनाशानन्तरमित्यर्थः ए
वमग्रेपीति. उत्तरकर्मणापि पूर्ववेगनाशान्नतो वेगान्तरोत्पत्तिरित्येषादिगित्यर्थः विनाचवेगमिति. वे

जल४ स्नेहः५

ननुतस्यनयात्वेमानाभावः लक्ष्यसंयोगान्तरमपिक्रियासत्वा
पत्तेः३

याइतुक्तकर्मणो द्विक्षणावस्थायित्वप्रवादस्याघातोः स्वरसः ४

क४

जनक४

दि०क०

गं विना कर्मनाशो न स्यादित्यस्यान्वयः नाशकान्तराभावादिति भावः ननु पूर्वकर्मणो नाशाभावे का क्षतिरत आ
ह। कर्मोत्पत्तिश्च न स्यादिति। अत्र हेतुः कर्मणः प्रतिबंधकत्वादिति। अत्र केचित् उत्तरसंयोगेनैव पूर्वकर्म्म
नाशोत्तरकर्म्मणः संभवात्तत्पूर्वकर्मनाशकर्मोत्पत्तिस्वीकारे प्रयोजनाभावादलं वेगेन तस्माद्वेगेन गच्छ।
तीति कर्मजननेयाप्रत्यक्षमेव वेगे प्रमाणमित्याहुः पुनर्गमनस्येति। यथापूर्वसंयोगं क्रियाया इत्यस्यार्थः स्थि
तिस्थापकसाधारणत्वादिति। वेगस्यान्तरदेशसंयोगजनकक्रियाजनकत्वं ननु तथापूर्वसंयोगजनकक्रि
याजनकत्वमिति न वेगेन स्थितिस्थापकस्यान्यथासिद्धिरिति भावः स्थितिस्थापकत्वं जातिविशेषः क्रिया 212
विशेषजनकतावंछ्छावच्छेदकतयासिद्धः स्थितिस्थापकश्च क्रियाविशेषजन्यः क्रियाविशेषजनकः स्वज
न्यक्रियानाश्यः। इयञ्चेति मूले उक्तप्रायं इत्थं च उक्तप्रकारेणापेक्षाज्ञानास्मृतिवारणाच। वस्तुतः संस्कारंप्र
त्युपेक्षान्यनिश्चयत्वेन हेतुत्व एव विनिगमकमस्तीत्याह। किं चेति। संस्कारकल्पनया गुरुत्वादित्यस्य स्मृतिप्र ॥१६७॥
त्येवोपेक्षान्यनिश्चयत्वेन हेतुत्व इत्यादिः सिद्धत्वादित्यग्रिमस्यापि पंचम्यन्तस्य नेत्यनेनान्वयः उद्देश्यवाच

नौ२

अपिर विनिगमकमुन्नायकः।

इति चेन्नेत्यस्यान्वयो हेतुरिति भावः।

ने

कपदस्य प्रागपेक्षितत्वात्तथान्वयप्रदर्शनार्थमुदीच्यस्याप्यसावित्यस्य प्राग्धारणमिति वाच्यं. न च
संस्कारे अतः संस्कारकल्पनेति अथानुभवस्य ध्वंस एव व्यापारोस्तु. प्रतियोग्यभावयोरेकत्राजनक-
त्वमिति तस्याप्रयोजकत्वात्. न चानुभवस्य स्मृतिप्रतिबंधकत्वापत्तिरिति वाच्यं. संसर्गाभावत्वावच्छिन्न-
कारणतानिरूपी भूताभावप्रतियोगित्वस्यैव प्रतिबंधकतापदार्थत्वादिह च संसर्गाभावत्वेनाजनक-
त्वात्. न चानुभवद्वितीयक्षणोत्पन्नसंस्कारेण तृतीयक्षणे स्मरणं संभवात्. ध्वंसस्य व्यापारत्वे न संभ-
वति. फलस्य प्राक्काले ऽनुभवध्वंसस्याभावादिति वाच्यं. तत्रापि क्षणविलंबेनैव स्मरणाभ्युपगमादि-
ति चेन्न. संस्कारानंगीकारे कदाचिदनुभूतस्य सर्वदा स्मरणापत्तेरनुभवध्वंसात्मकव्यापारस्य सर्व-
दा सत्वात्. उद्बोधकाभावादस्मरणमिति वाच्यं. यत्र वस्तुविशेषज्ञानात्मकोद्बोधकेन दशपंचवाघटादेः
स्मरणानि न त्वधिकानि तत्र घटादिस्मृतौ तु वस्तुज्ञानस्यैवानियतोद्बोधकतया तत्सत्वे उद्बोधकाभाव-
स्य वक्तुमशक्यत्वात्. वस्तुतस्त्वनुपदं वक्ष्यमाणापूर्वसाधकयुक्त्या संस्कारसिद्धिर्निराबाधेति ध्येयं. स्व

नच३

कीर्त्तिनवबंदुपेक्षात्वमायायेति प्रतीयते १

। दि.क०

स्वव्यापारान्यतराभावे. कार्य्योत्पत्त्यव्यवहितपूर्वक्षणे स्वस्वव्यापारान्यतराभावे. कारणत्वासंभवादिति. कार्याव्यवहितप्राक्क्षणवृत्तिस्वस्वव्यापारान्यतरकत्वस्यैव कारणतापदार्थत्वादिति भावः. अप्रयोजकत्वादिति. संस्कारजन्यत्वस्य स्मृतित्वप्रयोजकत्वाभावादित्यर्थः. मणिमतं प्रदर्शयति. परे त्विति. तन्मते तत्तद्व्यक्तीयस्मृतिव्यक्त्यावुद्बुद्धसंस्कारस्य हेतुकल्पनमस्मन्मते तु प्रत्यभिज्ञायां तद्धेतुत्वकल्पनमिति समानमन्नया स्मृतिव्यक्तिकल्पने प्रत्यभिज्ञायां तद्धेतुत्वकल्पने च न बाधकं गौरवमित्याहुरित्यस्वरसः सूचितः. स्वर्गादीत्यत्र स्वर्गपदेन सुखमात्रस्यादिपदेन शरीरेंद्रियादेः परिग्रह इति प्रदर्शयति। स्वर्गादिसकलेत्यादिना अग्रे नरकादीनामित्यत्राप्येवं. तत्र धर्मे. यागादीति. आदिना होमदानपरिग्रहः. यागत्वं च देवतोद्देश्यकस्वस्वत्वध्वंसवद्द्रव्यविशेष्यकेच्छात्वं. देवतोद्देश्यकत्वं देवतास्वत्ववद्विशेष्यकत्वं. शब्दमयी देवतेति पक्षे चतुर्थ्यादमित्यारोपज्ञानविषयत्वमुद्देश्यत्वं होमत्वं. चाग्निसंयोगानुकूलक्रियानुकूलघृतादिवृत्तिनोदनादिव्यापारत्वं. दानत्वं च. मूल्याग्रहणं विनास्वस्वत्वध्वंसपरस्वत्वजनकत्यागत्वमिति संप्रदायः. यागत्वे हो ॥१८६॥

213

मत्वादयो मानसप्रत्यक्षागम्या जातिविशेषा इत्यन्ये. श्राद्धस्य पित्रपेक्षया यागत्वेन ब्राह्मणापेक्षया दान
त्वेन न तत्र सांकर्यान्नेदं युक्तमित्यपरे. अन्यथा धर्माभावे चिरतिनष्टस्याप्यनुभवस्य स्मृतिजनकत्वोद
ह. निर्व्यापारतयेति. चिरध्वस्तमिति. चिरकारं नष्टं कर्मेति शायमपूर्वं विना फलाय फलजननायऽस
मर्थमित्यर्थः तथात्वे. ध्वंसप्रतियोगिनोरेकत्र जनकत्वापत्तेर्भावे. एकमेवापूर्वं कल्प्यत इति. वस्तुतस्तु.
यागस्यापि ध्वंसो न व्यापारः तथात्वे कीर्तितयागात्स्वर्गोत्पाद.वारणाय स्वर्गजनकतावच्छेदककोटौ की
र्तितभेदो निवेशनीयः तत्र च कीर्तितत्वस्यैकस्याभावेन कीर्तितत्वावच्छिन्नप्रतियोगिताकभेदनिवेशन
मशक्यमतः कीर्तितव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताक एवं भेदो निवेशनीयः एवं च. दशकीर्ति
तयागस्थले परस्परं तत्तद्व्यक्तिभेदसत्त्वेन स्वर्गोत्पादवारणाय भेदकूटस्यैव कारणतावच्छेदकत्वमुपगन्त
व्यं. तत्र च. विशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावानन्त्यमपूर्वस्वीकारे तु क्षणिक
तया कीर्तितयागानां मेलनासंभवेन भेदानामेकत्र निवेशप्रयोजनाभावः यादृशकीर्तितयागादपूर्वा.

दि०क० नामापादनीयं तद्विदावच्छिन्नयागव्यक्तेस्तदानीमभावात्. न चापूर्वसंबंधेन कीर्त्तितयागव्यक्तीनां मेल
नेसंभवत्येवेति. स्वर्गजनकतावच्छेदककोटौ कीर्त्तितभेदनामेकत्र निवेशश्चावश्यक इति वाच्यं. अपूर्वा
नुत्पत्त्यैवं स्वर्गसंभवे स्वर्गजनकतावच्छेदककोटौ कीर्त्तितभेदानामनिवेशात्. कीर्त्तितयागात्. ध्वंसो
त्पादेन ध्वंसजनकतावच्छेदककोटौ कीर्त्तितभेदनिवेशस्यासंभवादित्यन्यैरपरिशीलिनः पंथाः कारणत्व
इति. घटकत्वं सप्तम्यर्थः एवमग्रेपि. कार्यकालवृत्तित्वमिवेति. यथासमवायिकारणस्य कारणत्वेका
र्यकालवृत्तित्वं घटकं नत्वसमवायिकारणं कारणत्वेनेत्यर्थः तेन कर्मनाशाजलस्पर्शादिना. तस्य या 214
गादेपूर्वं कर्मनाशाजलस्पर्शादितः पूर्वं वृत्तत्वादिति. उत्पन्नत्वाद्विनष्टत्वाच्चेत्यर्थः योग्यविभुविशेषगु
णानां स्वोत्तरोत्पन्नगुणनाश्यत्वादिच्छात्मके यागस्य तृतीयक्षण एव नष्टत्वादिति भावः एवमग्रेपि. धर्मः
क्षरतीत्यस्य धर्मो यागादिः क्षरति फलभाङ् भवतीत्यर्थकतया कर्मनाशाजलस्पर्शादेः स्वध्वंससंबंधेन
स्वर्गादिफलं प्रतिबंधकत्वमेव युक्तमिति नसहत. एकाश्वमेधानंतरमश्वमेधः कृत इति कीर्त्तनेन. उत्तरं ॥१८२॥

स्याप
अनायस्यापरमाणुसंयोगनाशत्वेन द्व्यणुकनाशं प्रति कारणत्वे घटनाशं प्रति कपालनाशत्वेनैव कारणत्वं कल्पने लाघवादित्यभिप्रायः२

पुनरश्वमेधकरणेपि स्वर्गानुदयापत्तेः नच तदश्वमेधजन्यस्वर्गत्वावच्छिन्नं प्रति तत्कीर्त्तनत्वेन प्रतिवंधकत्वान्नाश्वमेधानन्तरा स्वर्गानुदयप्रसंग इति वाच्यं. यदश्वमेधस्य कीर्त्तनं कृतं तदश्वमेधजन्यस्वर्गप्रसिद्ध्या तादृशप्रतिवध्यप्रतिवंधकत्वाभावस्य कल्पयितुमशक्यत्वात्. तच्चापूर्वं दर्शपूर्णमासयोर्द्विविधं. परमापूर्वं कलिमापूर्वं चेति. तथाहि. यदाग्नेयोष्टाकपालोमावास्यायां पूर्णमास्यां चाच्युतो भवति. उपांशुयागमन्तरा यजति. ताभ्यामेवमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्. ऐन्द्रं दध्यमावास्यायां. ऐन्द्रं पयोमावास्यायामिति. पंचभिर्वाक्यैर्विहितेभ्यः षड्भ्य आग्नेयादिभ्यः षडुत्पत्त्यपूर्वाणि तान्येव कालिकापूर्वाण्युच्यन्ते. तेभ्यश्च परमापूर्वमिति. ननु षडपूर्वाण्यवश्यकानि साक्षादेव स्वर्गहेतवः सन्तु. किं परमापूर्वेणेति चेन्न. दर्शपूर्णमासाभ्यां यजेतेत्यत्रेनोभयत्वावच्छिन्नस्य स्वर्गसाधनत्वावगमादुभयत्वावच्छिन्नस्यैकव्यापारकल्पनादुत्पत्त्यपूर्वाणां चोभयत्वावच्छिन्नजन्यत्वात्. दर्शपूर्णमासाभ्यामिति. विधिप्रवृत्तिसमये चिरविनष्टस्य दर्शपूर्णमासस्य व्यापारतयैकस्यैवापूर्वस्य क

७५

दि०क० स्यनाशः.नन्वेवमनन्तरंषण्णांयागानांक्षणिकत्वेतानेषडपूर्वकल्पनागौरवं.तस्यफलमुखत्वात्:नच
पंचभिःपंचापूर्वद्वाराषष्ठेनचसाक्षाद्देवपरमापूर्वंजन्यतामितिकिंषष्ठेनकलिकापूर्वेणेति.वाच्यं.
षष्ठेनाप्युत्तरांगदक्षिणासहकारेणैवपरमापूर्वंजननात्तावत्कालंषष्ठस्ययागस्यानवस्थित्वात्.अन्त्यं
पूर्वस्यावश्यकत्वात्:अत्रपरमापूर्वप्रतिस्वर्गंप्रतिचदर्शत्वपूर्णमासत्वव्यापकेनदर्शपूर्णमासोभय
साधारणैवजात्येनकरणत्वमित्येके.दर्शत्वेनपूर्णमासत्वेनचकारणं.इदंचक्षवक्षिलितानांफलो
पधानमित्यपरे.अत्र.त्रयात्मकदर्शत्वजन्यमपूर्वमेकंकलिकापूर्वत्रयव्यापारकं.एवंत्रयात्मक 215
पूर्णमासजन्यमेकमपूर्वंकलिकापूर्वत्रयव्यापारकं.ताभ्यांस्वर्गजनकापूर्वोत्पत्तिस्त्वेचपरमापूर्वंफ
लशिरस्कापूर्वमित्युच्यतइति,नवापूर्वापक्षाइत्येके.तन्नैवफलशिरस्कापूर्वमानाभावाद्द्वापूर्वेत्य
न्ये.कलिकापूर्वषट्केनैवपरमापूर्वसंभवात्व्यापारीभूतापूर्वद्वयेमानाभावात्पूर्वोक्तापूर्वक्लृप्तिरयुक्तेति ॥१०॥
नव्याःइदंचापूर्वंजातेष्टिपितृयज्ञादौकर्तृनिष्ठमुत्पद्यतइत्येके.भोक्तृनिष्ठमितितुसंप्रदायः.प्राभाक

रास्तु·यागक्रियासर्वात्मनानैवनश्यति·किंतुसूक्ष्मरूपेणस्वर्गदेहारंभकेषुयागसंबंधि·ऽपूर्वारंभ
केषुयागकर्त्तायात्मनिवावस्थायफलमारभत इत्याहुः·तत्र·ज्ञानेच्छादिरूपस्ययागस्यात्मनोयोग्य
विशेषगुणतयाक्षणचतुष्टयानवस्थायित्वनियमात्·ज्ञानेच्छादीनांसदोतुभवेनसमानाधिकरण
स्वोत्तरवर्त्तिगुणनाश्यत्वस्वीकारात्·अन्यथैवंरीत्याजगतएवसूक्ष्मरूपतयासर्वदावस्थानप्रसं·
गादित्यलंविस्तरेण·ननुगंगादिदर्शनादिनाईश्वरेकुतोनधर्मादेरुत्पत्तिरत·आह·मूलेईमौतुवास
नाजन्याविति·ईश्वरेमिथ्याज्ञानजन्यवासनाविरहेन्नधर्मादेरुत्पत्तिरितिभावः·ननुधर्माधर्मौप्रति
वासनायाहेतुत्वेमानाभावइत्यतआह·मुक्तावप्यामतमिति·तानितानि·तत्त्वज्ञानवतां·वचनविरोधा
दिति·तेनादृष्टनाशमात्रेभोगस्याहेतुत्वेप्रतिपादनादितिभावः·इत्थंचेति·कर्मणांभोगेनाशश्च·चे
चेत्सार्थः·अन्यथा·उपलक्षकत्वाभावे·सर्वकर्माणीति·सर्वकर्मजन्यादृष्टानीत्यर्थः·भस्मसात्कुरुतेर्न
शयति·श्रुतिंदर्शयित्वास्मृतिंप्रदर्शयति·क्षीयन्तेचेति·तदभिप्रायमेव·प्रारब्धकर्माभिप्रायमेवगो

रत्वादिति॰ दशशब्दानां तत्प्रागभावानां तद्धेतुहेतुसद्भावानां चैकल्पने गौरवादित्यर्थः उत्प्रतीतिविरोधा
दिति॰ उत्पादविनाशशालिप्रत्ययविरोधादित्यर्थः इत्थं चेति॰ प्रत्यभिज्ञानस्य सजातीयविषयत्वे चेत्य
र्थः द्वयोरपीति॰ उत्पादप्रतीतिप्रत्यभिज्ञयोरित्यर्थः अत्र मीमांसकाः स एवायं गकार इति प्रत्यभिज्ञया
गकारादेस्तावत्कालावस्थानस्य विषयीकृतत्वेनान्तराभूतशब्दादिनानाशेनाशकाभावाद्वर्णानि
त्यत्वसिद्धिः न च प्रत्यभिज्ञानात्तज्जातीयत्वविषयिणी॰ बाधकाभावात्॰ अन्यथा सर्वत्रापि तथाभावे॰
भेदोच्छेदापत्तिः न च तारत्वमन्दत्वरूपविरुद्धधर्माध्यासो बाधकः प्रत्यभिज्ञानबलेन तस्य नित्यत्व-
सिद्धौ तारत्वादेर्व्यंजकवायुधर्मत्वस्य कल्पनात्॰ श्रोत्रेणैव वायुधर्मस्य तारकत्वादेरपि ग्रहणसंभवात्
य एव तारस्स एवान्यापेक्षया मन्द इति प्रतीतेस्तारत्वमन्दत्वयोरविरोधाच्चेत्याहुः तन्न॰ तथा सति कत्व
गत्वादेरपि व्यंजकवायुधर्मत्वापत्त्या ककारगकारयोरपि भेदो न सिद्ध्येदिति वर्णैक्यापत्तेः वस्तुत ॥१२१॥
स्तु॰ वर्णानित्यत्वपक्षे कण्ठताल्वाद्यभिघातानां कत्वादिकं कार्यतावच्छेदकं वर्णनित्यत्वपक्षे तु कसा

क्षात्कारत्वमितिगौरवात्.नचनित्यत्वमतेपिलौकिकविषयितयाकत्वमेवनज्ञानत्वावच्छेदकमितिन
गौर्वौरेवकाशइतिवाच्यं.कोलाहलप्रत्यक्षस्यासंग्रहप्रसंगात्.नहिकोलाहलप्रत्यक्षंकत्वादिविषयकं.
अन्यथात्वत्ययुक्ताद्यदायुत्पादकस्यापिघटप्रत्यक्षत्वमेवकार्यतावच्छेदकमितितदपिनित्यमेवस्यादि
ति.नचानित्यत्वमतेप्रत्यभिज्ञायास्तज्जातीयत्वविषयत्वेनतज्जातीयोयमितिस्यात्तत्तुसोयमितीतिवा
च्यं.यत्रप्रत्यभिज्ञायांजातित्वेनगत्वादेर्भानंतत्रैवतज्जातीयमित्याकारःयत्रतुस्वरूपतोभानंतत्रसोयमि
त्याकारइत्यभ्युपगमादिति.अत्रेदंबोध्यं.शब्दोद्विविधःध्वन्यात्मकोवर्णात्मकश्च.तत्रध्वन्यात्मकसंयोग
जन्याद्यशब्दंप्रतिगगनंसमवायिकारणं.भेर्य्याकाशसंयोगोसमवायिकारणंभेरीदंडसंयोगादिर्निमि
त्तकारणं.विभागजन्यध्वन्यात्मकाद्यशब्दंप्रतितुवंशदलाकाशविभागोसमवायिकारणं.वंशदलद्वयवि
भागोनिमित्तकारणं.द्वितीयादिशब्दंप्रतितुआद्यशब्दोसमवायिकारणं.वर्णात्मकाद्यशब्दंप्रतितुकंठताल्वा
दिनाकाशसंयोगोसमवायिकारणं.कंठताल्वादिनावाय्वादिसंयोगोनिमित्तकारणं.द्वितीयादिशब्दंप्रति

दि०क० तुआद्यशब्दोसमवायिकारणं·नचभेर्य्याकाशसंयोगकंठाद्याकाशसंयोगादीनांशब्दंप्रतिकारणत्वेमा
नाभावइतिवाच्यं·भावकार्यस्यासमवायिकारणजन्यत्वनियमेनतत्कारणत्वस्वीकारात्.तादृशनियमेमा
नाभावेतुमास्तु·तेषांकारणत्वंभेरीदंडसंयोगादिनिमित्तकारणसहकृतेनाकाशेनैवशब्दोत्पत्तिसंभवादि
ति·प्रथमादिशब्दानांचस्वकार्य्यशब्देनैवनाशः·चरमस्य॰पांत्यशब्देनोपांत्यशब्दनाशेनवानाशइति·मूले
तदैवौषधमित्यादावित्यादिनासैवेयंदीपकलिकेत्यादेःपरिग्रहःनतुतत्रापिव्यक्तिभेदएवविषयोस्त्वितो
भावार्थंप्रकाशयति.तदौषधंमयाकृतमित्यादिना·अत्रचस्ववृत्तिकत्वस्वभिन्नवृत्तिकत्वरूपविरुद्धधर्मा 217
ध्यासात्सिद्धभेदप्रत्ययस्यप्रतिबंधकस्यसत्वात्नव्यक्तिभेदोविषयःकिंतुतत्सजातीयाभेदोविषयइति·
भावः॥ ॥भानुंप्रणम्यपरिभाव्यचशास्त्रसारंमुक्तावलीकिरणएषवितत्प्रतिष्ठा॥सद्युक्तिभिर्दिनकरे
णकेरणसोयंनीतप्रकाशयदधीसुधियांमुदेस्तु·॥ ॥मुक्तावलीप्रकाशोयमज्ञानतिमिरापहः॥तेन
सतोषमायातु·नीलकंठःसतांप्रियः॥ ॥इतिश्रीमद्भारद्वाजकुलोद्भवबालकृष्णभट्टात्मजमहादेवभट्ट ॥१९२॥
प्रणीतोमुक्तावलीप्रकाशःसमाप्तः॥ ॥संवत्१९४४श्रावणशुक्लषष्ठ्यांरविवारेशिवनारायणभट्टे
नलिखितं॥शुभमस्तु॥वाराणस्यांलिखितमिदम्॥
॥ ॥

शि० त्र निर्द्धूमत्वव्यापकत्वे न साध्ये निर्वह्नित्वादेश्चाव्याप्तिः तत्र हेत्वभावस्य व्याप्यादेः प्रत्येकं यावद्विपक्षावृत्तिदल
आह साध्यवदिति अत्रान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यं नहि भवति
नीलो घटो घटादन्य इति नापीति साध्यं असमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं तत्त्वं
साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वं साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वमिति यावत् तदन
धिकरणत्वमित्यर्थः साध्यं वह्निस्तस्य च साध्यनिष्ठाधेयत्वानिरूपकत्वात्तद्वृत्तौ नातिप्रसंगः साध्यनिष्ठा
धेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षः तेन सत्तावान्द्र
व्यत्वादित्यादौ न दोषः साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणकत्वं चरमाधिकरणत्वांशस्यानतिप्रयोज
नतया तदपहाय द्वयमेकोक्त्यान्य दूषयति तदुभयमपीति साध्येत्यादेः साध्यं यदधिकरणानधिकरणं
तत्त्वाभावः साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावश्चार्थः तेन केवलान्वयिनि साध्यनिष्ठाधेयत्वानिरूप
काधिकरणाप्रसिद्ध्या नानाव्यक्तिसाध्यके च एकसाध्यव्यक्तिनिष्ठाधेयत्वानिरूपकत्वं साधनाधिकरण ॥१॥

समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादनं निदानं. व्याप्तिस्वरूपनिरूपणमा
रभते. न चेत्यादिना. साध्याभाववदवृत्तित्वस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशंक्याह. साध्यावच्छि
न्नेति. साध्यावच्छिन्ने वर्त्तते यः साध्याभावस्तद्वदवृत्तित्वमर्थः. कर्मादौ संयोगाभावस्याभिन्नत्वे मानाभावा
दत आह. साध्यवदिति. हेतोस्साध्यवत्पक्षाभिन्नदृष्टान्तवृत्तित्वेनाव्याप्तेराह. असकलेति. साकल्यं सा
६ देश ध्याभाववति साध्ये च बोध्यं साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताको 218
वासाध्याभावो ग्राह्यः. तेन विपक्षैकनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः. न वा. नानाव्याप्तिसा
ध्यकसद्धेतावव्याप्तिः. अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तेर्व्यभिचारिणि चाव्याप्यवृत्तावतिव्या
प्तेर्वारणाय भावद्वये प्रतियोगिव्यधिकरणत्वं बोध्यं. हेत्वभावेपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगि-
व्यधिकरणो बोध्यः. तत्प्रतियोगित्वं च हेतुतावच्छेदकरूपेण बोध्यं. तेन द्रव्यत्वादौ साध्ये विशिष्टसत्त्वादौ नाव्या
प्तिः. न वा विशिष्टसत्त्वादिना तादृशप्रतियोगिनि सत्तादावतिव्याप्तिः. यत्र एकव्यक्तिकं साध्यं. विपक्षो वा एकस्त

नन्वनुमितिहेतुभूतव्याप्तिज्ञाने का व्याप्तिः न तावदव्यभिचरितत्वं· तद्धि न साध्याँववदवृत्तित्वं· साध्यवद्भिन्नसाध्याभाववदवृत्तित्वं· साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यं· सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वं· साध्यवदन्यावृत्तित्वं वा· केवलान्वयिन्यभावात्· नापि साध्यासामानाधिकरण्यानधिकरणत्वं· साध्यवैयधिकरण्यानधिकरणत्वं वा· तदुभयमपि साध्यानधिकरणानधिकरणत्वं· तन्न तत्र यत्किंचित्साध्यानधिकरणाधिकरणे धूमे वासिद्धे· अथेदं वाच्यं· ज्ञेयत्वादित्यत्र समवायितया वाच्यत्वाभावो घट· एव प्रसिद्धः व्यधिकरणधर्मावछिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वात्· नचैवं घट एव व्यभिचारः साध्यतावछेदकावछिन्नसाध्यनिष्ठप्रतियोगिताकाभाववद्वृत्तित्वं हि व्यभिचारो न च वाच्यत्वाद्यभावस्तादृशो घट इति चेत्तर्हि तादृशसाध्याभावसामानाधिकरण्याभावो व्याप्तिः तथा चाप्रसिद्धिः प्रतियोग्यवृत्तिश्च धर्मो न प्र· तियोगितावछेदकः तद्विशिष्टज्ञानस्याभावधीहेतुत्वात्· अन्यथा निर्विकल्पकादपि घटो नास्तीति प्रतीत्यापत्तेः गवि शशशृंगं नास्तीति प्रतीतेरसिद्धेः शशशृंगं नास्ति च शशशृंगाभाव इत्यर्थः अथ साध्यासाध्यासामानाधि

व्यभिचारवारणायासति प्रतिवंधकइति· अग्निसंयोगानाश्रयद्रव्यत्ववति घृतादा व्यभिचारवारणाय संयोगे
त्यक्तं तादृशद्रव्यत्वस्य समानाधिकरणाग्निसंयोगासमानकालीनत्वान्न व्यभिचारः अनुच्छिद्यमानद्रव्यत्वा
दित्यस्यानुच्छिद्यमानद्रव्यत्वाधिकरणत्वादित्यर्थो न तूच्छिद्यमानद्रव्यवदित्यर्थो

219

श्रीगणेशाय नमः समारब्धेति. समारब्धं यदनुमानप्रमाणपरीक्षणं तत्कारणीभूतं यद्व्याप्तिग्रहोपायप्रतिपा
दनं तन्निदानं व्याप्तिस्वरूपनिरूपणमित्यर्थः अव्याप्यवृत्तीति. कपिसंयोगी एतद्वृक्षत्वादित्यादावित्यर्थः इदं च. ये
नरूपेण येन संबंधेन च साध्यता तदवच्छिन्नप्रतियोगिताकसाध्याभावस्य प्रवेशमाहत्य. अन्यथा तु व्याप्यवृत्ति
साध्यकस्थलेपि विशिष्टाभावादिकमादाय दोषो बोध्यः अव्याप्यवृत्तिसाध्यकेप्याकाशादिहेतावव्याप्त्यभावा
दत आह. सद्वृत्ताविति. वृत्तिमद्वृत्तावित्यर्थः ननु साध्यवद्भिन्नो यः साध्याभाववानित्यर्थे साध्याभाववत्त्वदवै
यर्थ्यं. साध्यवद्भिन्नावृत्तित्वस्यैव सम्यक्त्वात्. न चावृत्तित्वेन समं साध्यवद्भिन्नस्यान्वयाविवक्षणात्. साध्या
भाववत्तासममेव तादात्म्येन तस्यान्वयनिवेशान्नवैयर्थ्यमिति वाच्यं. तथापि. साध्यवद्भिन्नात्मको यो मतुव
र्थः संबन्धी तद्वृत्तित्वस्यैव सम्यक्त्वेन साध्याभावपदव्यर्थताध्रौव्यं स्यात् दत [illegible] स सप्तमीसमासं परामृष्टा व्या
चष्टे. साध्यवद्भिन्न इति. तथा च साध्यवद्भिन्नस्यावृत्तावनन्वयाद्यथाश्रुतन्निवेशान्नवैयर्थ्यमिति. साध्याभावसा
ध्यवद्भिन्नवृत्तित्वविशेषणत्वव्याप्यवृत्तिसाध्यकसंग्रहार्थमेवेत्याशयः साध्यवद्भिन्नवृत्तित्वादिमति धू-

ग्रा० मादेस्सत्वादव्याप्तिरसंभवो वा स्यादत आह· साध्याभाववति· न च कपिसंयोग्येतद्वृक्षत्वादित्यादेः संग्रहार्थ
मधिकरणभेदेनाभावभेदमाश्रित्यैव लक्षणमिदं कार्य्यं· तथा च साध्यवद्भिन्ने वर्त्तते योऽभावस्तद्वद्वृत्ति- हर
त्वस्यैव सम्यक्त्वात्साध्यपदं व्यर्थमिति वाच्यं· प्रतियोगितासंसर्गेन साध्यीयत्वेनैव साध्याभावस्य प्रवेशान
त्वभावस्यापीत्यतस्तद्वैयर्थ्यशंकानवकाशात्· वस्तुतः स्वप्रतियोगितावच्छेदकसंबंधेन साध्यवद्भिन्नवृ
त्तिः साध्यतावच्छेदकसंबंधेन साध्यीयो योऽभावस्तद्वद्वृत्तित्वमर्थः तथा च साध्यतावच्छेदकसंबंधेन सा
ध्यीयत्वविशिष्टार्थस्य साध्यपदस्यानुक्तौ स्वप्रतियोगितावच्छेदकीभूतसमवायादिसंबन्धेन वह्निमतोऽन्य- 220
स्मिन्पर्वतादौ वर्त्तते यस्समवायाद्यवच्छिन्नवह्न्यभावस्तद्वृत्ति धूमादेस्सत्वादव्याप्तिस्स्यादतस्तदुपात्तमिति
नव्याः केचित्तु· व्याप्यवृत्तित्वाव्याप्यवृत्तित्वादिरूपविरुद्धधर्माध्यासात्संयोगाद्यभावस्य द्रव्यगुणाद्यधिकरणभे
देन भेदो न तु गगनाभावस्यापि मानाभावात्· तथा च साध्यवद्भिन्नवृत्तिगगनाभाववति धूमादेः सत्वादव्या
प्तिः रतस्साध्यपदमित्याहुः तन्मन्दं· गुणे गगनाद्यभावे गुणत्वादिसामानाधिकरण्यं न तु द्रव्ये गगनाद्यभावे ।।।

तथात्वेपि द्वित्वादिप्रतीत्या गगनाद्यभावस्यापि गुणत्वादिसामानाधिकरण्ये तदभावयोर्विरुद्धधर्मयोः संभवादिति दिक्. न च घटत्वघटाकाशसंयोगान्यतरत्वावच्छिन्नाभाववान् गगनत्वादत्राव्याप्तिः साध्यवद्भिन्ने घटादेर्वर्तमानस्य गगनसंयोगात्मकसाध्याभावस्याधिकरणे गगनत्वहेतोः सत्त्वादिति वाच्यं. अभावाभावस्यातिरिक्ततामते एवैतल्लक्षणकरणादिति भावः भिन्नत्वरति॥ उभयनिष्ठसंयोगाभाववतो भिन्नत्वरस्यर्थः मानाभावादिति. तथा चात्राप्यव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिरिति भावः हेतोरिति. न च साध्यवत्त्वप्रतियोगिकान्योन्याभावस्य केवलान्वयित्वादसंभव एव वक्तुमुचितो नातिव्याप्तिरिति वाच्यं. उक्तं गगनादिसत्त्वावृत्तिहेतौ लक्षणसंभवात्. तस्यापि सद्धेतुतायाः स्वयं वक्ष्यमाणत्वादिति भावः. साध्यापदस्यासिद्धिकर्मतत्ते व्यक्तिपरतया तत्तद्व्यक्त्यवच्छिन्नान्योन्याभावासामानाधिकरण्यं तत्पपर्यवसितार्थस्य उक्तं पृथिवीत्वादित्यादावेव संभवात्. गंधवती पृथिवीत्वादित्यादावव्याप्तिकथनमित्यपि वदन्ति॥ ननु सकलस्य साध्यप्रतियोगिकाभावस्याधिकरणाप्रसिद्ध्या व्यभिचारिण्यतिव्याप्तिः वारणार्थं यदि साध्याभावस्य विशेषणं साकल्यं तदा वह्निमान्धूमा

जा० दित्यादिसद्धेतावव्याप्तिस्तत्रापि तद्विपक्षावृत्तित्वावच्छिन्नाभावरूपस्य तत्तत्सपक्षावृत्तित्वावच्छिन्नाभाव
रूपस्य वा साध्यप्रतियोगिकाभावस्तोमस्याधिकरणाप्रसिद्धेरत आह · साकल्यं साध्याभाववतीति · तथा च ·
साकल्यं साध्याभाववति विशेषणं न तु साध्याभावविशेषणमतो नाप्रसिद्धिरिति भावः · नन्वेवमपि साध्यप्र
तियोगिकाभाववत्सकलान्तर्गते महानसादौ वर्त्तमानस्याभावप्रतियोगित्वं धूमादेर्नास्तीत्यव्याप्तितादव
स्थ्यमत आह · साध्ये चेति · सपक्षो महानसादिस्तत्सकलसाध्याभाववानित्यदोषः । प्राचां तु · व्यभिचारिण्य
तिव्याप्तिवारणार्थं साध्याभाववति यावत्त्वे विशेषणे दत्त एव साध्ये यावत्त्वमव्याप्तिवारकतया सार्थकं भवत्य 221
तः साध्याभाववत्त्वेव साकल्यं प्राक् प्रयोजयन्ति साकल्यमित्यादिनेत्यवतारयन्ति · तन्मन्दं · साध्याभावव
ति साकल्यानुक्तावप्यतिव्याप्तिवारकतयैव साध्ये साकल्यस्य प्रथमतः सार्थक्यसंभवात् · अन्यथा गगनावृ
त्तिधर्मवान् द्रव्यत्वादित्यादौ घटत्वादिलक्षणे तत्साध्यवत्त्वाभाववद्गुणादिवृत्त्यभावप्रतियोगिनिरूप्यत्वा
दावतिव्याप्तिप्रसंगादिति ध्येयं · ननु साध्यवदवृत्तित्वावच्छिन्नप्रतियोगिताकस्य सकलसाध्यप्रतियोगि ॥२॥

काभावस्य सत्त्वादसंभवः। किंच। सकलपदोत्तरसाध्यस्य जनितान्वयबोधस्त्वात्सकलसाध्यप्रतियोगिकाभाववत्तोनुस्थापनात्तेन समं सकलपदस्य कर्मधारयोप्यनुपपन्न इत्यत साध्याभावो वेति। तथा च। साध्याभाववत्त्वेव साकल्यं देयं न तु साध्येपीति भावः। साध्याभाववति साकल्यप्रयोजनमाह। तेनेति। विपक्षैकदेशः कश्चिद्विपक्षः साध्यानिष्ठसाकल्यस्य साध्यसामान्याभावस्य वा विवक्षायाफलमाह। नवेति। एकव्यक्तिसाध्यके सकलसाध्योक्तावव्याप्तिरग्रे स्थास्यतीत्याशयेन नानेत्युक्ते। अव्याप्यवृत्तीति। कपिसंयोगी एतद्वृक्षत्वादित्यादावित्यर्थः। यद्यप्यग्रे हेत्वभावस्यापि प्रतियोगिवैय्यधिकरणावच्छिन्नस्य निवेशकरणीय इत्यव्याप्यवृत्तिहेतावप्या व्याप्तिः संभवति। तथापि। यथाश्रुतिमूलस्यापि न तत्राव्याप्तिरित्यावेदयितुं व्याप्यवृत्तिहेतूक्तिः॥ व्यभिचारिणीति। एतद्वृक्षत्वात्कपिसंयोगादित्यादावित्यर्थः। अभावद्वय इति। साध्याभावे हेत्वभावे चेत्यर्थः। अन्ते चे। साध्याभावेप्र

ग्रा० तियोगिवैयधिकरण्यं साध्यताघटकसंबंधेन प्रतियोगिनो यदनधिकरणं तद्वृत्तित्वं. तेन धूमाघ
भाववतोपि तप्तायःपिण्डादेः कालिकादिसंबंधेन धूमादिमत्त्वेपि नातिव्याप्तिः हेत्वभावे प्रतियोगि
वैयधिकरण्यं च. प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणवृत्तित्वरूपं ग्राह्यं: तेनाय
मात्मा ज्ञानादित्यादौ साध्याभाववतो घटादेर्विषयतया हेत्वभावप्रतियोगिमत्त्वेपि नाव्याप्तिः अ
स्तामिदमधिकरणभेदेनाभावभेदमादृत्य. तेन निरुक्तप्रतियोगिव्यधिकरणगुणादिवृत्ति
साध्याभावस्यैतद्वृक्षवृत्तित्वेपि नाव्याप्तितादवस्थ्यं. अन्यथा तु. प्रतियोग्यनधिकरणवृत्ति 222
त्वविशिष्टसकलसाध्याभावाधिकरणताव्यापकहेतुतावच्छेदकसंबंधावच्छिन्नप्रतियो
ग्यनधिकरणवृत्तित्वविशिष्टहेत्वभावत्वावच्छिन्नानधिकरणताकत्वमित्यत्र तात्पर्यं. हेत्वभा
वोपीत्यपिना. साध्याभावसंग्रहः तेन विशिष्टसत्तावान् जातेरित्यादौ नातिव्याप्तिः यद्यपि साध्याभावो ॥३॥
पीत्येव क्रमानुरोधादुक्तमुचितमपि शब्दादेव हेत्वभावस्य लाभसंभवात्. तथापि न प्रतियोगि

त्वं चेत्यग्रेतनतत्पदेनानिर्दिष्टहेत्वभावपरामर्शसंभवाद्धेत्वभावप्रतियोगित्वमित्यभिधाने चगौरवादिदमभिधानं. प्रतियोगितानवच्छेदकावच्छिन्नप्रतियोगीति. प्रतियोगिपदं प्रतियोगितावच्छेदकताघटकसंबंधेनावच्छेदकस्य वैशिष्ट्यलाभाय. तेन ह्रदादौ कालिकसंबंधेन धूमत्वाद्यवच्छिन्नस्य काष्ठादेः संयोगेन सत्त्वेऽपि वह्निमान्धूमादित्यादौ नाव्याप्तिः तत्प्रतियोगित्वं हेत्वभावप्रतियोगित्वं. हेतुतावच्छेदकरूपेणेति. हेतुतावच्छेदकसंबंधेनेत्यपि बोध्यं. तेनात्मभिन्नं द्रव्यत्वादित्यादौ साध्याभाववत्यात्मनि वर्त्तमानस्य प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणस्य कालिकादिसंबंधावच्छिन्नद्रव्यत्वाभावप्रतियोगित्वस्य द्रव्यत्वे सत्त्वेऽपि नातिव्याप्तिः न च हेतुतावच्छेदकसंबन्धेन प्रतियोगिवैयधिकरण्योक्तावेवातिव्याप्तिवारणसंभवे हेतुतावच्छेदकसंबंधेन प्रतियोगित्वविवक्षा व्यर्थेति वाच्यं. तथा सति निर्धूमत्वव्याप्यवान्. निर्धूमत्वादित्यादौ निर्वह्नित्वं भेदमादायैव लक्षणसमन्वये निर्धूमत्वव्याप्येत्युत्तरग्रंथोक्ताव्याप्त्यलग्नकतापत्तेरिति ध्येयं. हेत्वभावे प्रतियोगिताव

जा०
छेदकावच्छिन्नविशिष्टसत्तात्वादिनेति. आदिना सत्ताद्रव्यत्वोभयत्वादिपरिग्रहः: तादृशाभावप्रतियो
नीति. द्रव्यत्वाद्यभाववद्विशिष्टनिरुक्तप्रतियोगिव्यधिकरणाभावप्रतियोगिनी सत्त्व प्रतियोगिवैय
धिकरण्यविवक्षायाः फलमाह. तेन द्रव्यत्वादाविति. अन्यथा. साध्याभाववति गुणादौ विशिष्टसत्ता
भावस्य सत्तारूपप्रतियोगिसमानाधिकरणत्वादव्याप्तिरेव स्यादिति भावः: अत्र द्रव्यत्वस्य साध्य°
तायां सकलसाध्यप्रसिद्ध्या व्याप्तेरुक्तविवक्षयाप्यप्रतीकारादादिपदं तेन गुणवत्त्वादिसाध्यस्या 223
पि संग्रहः: द्रव्येतरासमवेतमात्रं वा प्रकृते द्रव्यत्वमिति ध्येयं. हेतुतावच्छेदकावच्छिन्नप्रतियोगित्व
विवक्षायाः फलमाह. नवेति. विशिष्टसत्तात्वादिनेति. आदिना सत्ताद्रव्यत्वोभयत्वादिपरिग्रहः: तादृ°
शाभावप्रतियोगिनीति द्रव्यत्वाद्यभाववद्विशिष्टनिरुक्तप्रतियोगिव्यधिकरणाभावप्रतियोगिनीत्य
र्थः: सत्तादाविति. द्रव्यत्वादौ साध्यस्यानुवर्तते. यत्रैकव्यक्तिकमिति. तथा च द्रव्यं पृथिवीत्वादित्यत्राव्या ॥४॥
प्तिः

सकलसाध्याप्रसिद्धेरित्यर्थः नन्वितो ऽस्वरसं साध्यसामान्याभावस्यैव निवेशितत्वात् साध्ये साकल्यं न दे-
यमेवेत्यत आह ॥ विपक्षो वेति· तथा च यत्रैकाव्यक्तिरेव साध्याभाववती तत्र गगनावृत्तिधर्मवान् गगनान्य-
त्वादित्यादावव्याप्तिः साध्याभाववतस्साकल्याप्रसिद्धेरित्यर्थः ननु साध्यादिभेदेन व्याप्तेर्भेदाद्यत्रैकव्यक्ति-
क एव विपक्षस्तत्र लक्षणे साध्याभाववति साकल्यं न देयम् अशेषत्वरूपं वा साकल्यं देयमतो दोषान्तरमा-
ह· निर्द्धूमत्वव्याप्यइति· निर्द्धूमत्वे साध्यत्वे यत्रैकव्यक्तिकमित्यनेनैव गतार्थता स्यादतो व्याप्यपर्य्यन्तानु-
धावनं· निर्द्धूमत्वव्याप्यस्य स्नेहादेः स्नेहत्वादिना साध्यत्वे वह्न्यभावस्य व्यभिचारित्वात्तदसंग्रहे न दोषा-
येत्यत उक्तं· तत्त्वेन साध्य इति· निर्द्धूमत्वव्याप्यत्वेन साध्य इत्यर्थः प्रत्येकमिति· हेत्वभावस्य महानसीया-
दिवह्नेश्चालनीन्यायेन साध्याभाववत्सकलान्तर्गतपर्वताद्यवृत्तित्वादव्याप्तिरिति भावः निरुक्तप्रति-
योगिवैयधिकरण्यावच्छिन्नसाध्याभावव्यापकतावच्छेदकं निरुक्तप्रतियोगिवैयधिकरण्यावच्छिन्नाभा-
ववत्त्वं तद्धर्मवत्त्वं व्याप्तिरित्युक्तौ तु नैष दोष इति ध्येयं ॥ ४ ॥ ननु साध्यवत्प्रतियोगिकान्यत्वस्य धूमादिम-

न्नेयत्रमीवच्छि २

ज्ञा०

तिसत्त्वादव्याप्तिरत आह॰ अत्रेति॰ तथाच साध्यवत्पदेन निरूढलक्षणोपस्थापितस्य साध्यवत्त्वावच्छि
न्नप्रतियोगिताकस्यान्यपदार्थैकदेशेऽन्यत्वे तादात्म्येनान्वयात्साध्यवति च साध्यतावच्छेदकविशिष्टसाध्य
वत्त्वावच्छिन्नप्रतियोगिताकभेदासत्त्वान्नाव्याप्तिः गुरुधर्मस्यावच्छेदकत्वोपगमाच्च द्रव्यं पृथिवीत्वादित्य
त्र द्रव्यत्वत्वविशिष्टद्रव्यत्वावच्छिन्नभेदाप्रसिद्ध्या नाव्याप्तिरिति भावः तद्धर्मविशिष्टबोधकपदसमभिव्या
हृतेनान्यादिपदेनोपस्थापितेऽन्यत्वादौ तद्धर्मावच्छिन्नप्रतियोगिताकत्वप्रकारेणैव तादात्म्येनान्वयो न 224
तु तद्धर्माश्रयनिष्ठप्रतियोगिताकत्वेनेति व्युत्पत्तौ प्रमाणमाह॰ न हीति॰ तथाच तादृशव्युत्पत्त्यस्वीकारे नी
लघटेपि घटप्रतियोगिकभेदसत्त्वान्नीलो घटो घटादन्य इत्यपि व्यवहारः स्यादिति भावः केचित्तु॰ व्युत्प॰
त्तिरन्यादिपदशक्तिः अन्यादिपदस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकभेदवति शक्तत्वात्॰ तथाच
घटत्ववति घटत्वावच्छिन्नप्रतियोगिताकभेदासत्त्वान्नीलो घटो घटादन्य इति न व्यवहार इत्याहुः तन्मन्दं॰
अन्यादिपदस्य लाघवेन भेदवत्येव शक्तिः अन्वयितावच्छेदकस्य घटत्वादिरूपतया नानात्वेनानन्तश॰ ॥५॥

पर्य्यन्तानुसरणमिति पाठः ५

क्तिकल्पनायां गौरवात्. न चानन्तव्युत्पत्तिकल्पनायां तवापि गौरवमिति वाच्यं. अनन्तशक्तिकल्पनायामपि तत्तदन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वबोधं प्रति तत्तत्पदसमभिव्याहारस्य नियामकत्वेन कल्पनीयत्वापत्तेः ममतु केवलादन्यादिपदादपि भेदवानिति बोधः अत्र च इवां घटान्यदित्यादिप्रयोगः स्यादेतो यन्निष्ठप्रतियोगिताकत्वेन भेदोऽन्यादिशब्देन बोध्यस्तद्वृत्तिधर्मस्यैवानुयोगितावच्छेदकत्वोक्तेः तेन एव घटो घटान्य इत्यस्य वारणसंभवात्. नीलघटत्वस्यानुयोगितावच्छेदकत्वोंन्न वारणमिति मन्तव्यं. नीलो घटो घटान्य इत्येव सम्यक्पाठः तथैव प्रकृतोपयोगित्वसंगतेः घटादन्य इति पाठस्तु. साध्यवदन्येत्यत्र पंचमीसमासे लुप्तविभक्तिस्मारितप्रतियोगित्वे प्रकृत्यर्थतावच्छेदकावच्छिन्नत्वस्य संसर्गमर्यादया भानमाहुस्त्यकथंचित्संगमनीयः घटः पटो नेत्यादौ तु पटपदं मुख्यार्थपरमेव ननु प्रकृते इव पटत्वावच्छिन्नप्रतियोगिताकपरं निपातातिरिक्तस्थले एव नामार्थयोर्भेदान्वयः स्या व्युत्पन्नतया नञ्पदोपस्थाप्यभेदे पटत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेणापटस्यान्वयसंभवात्. पटत्वावच्छिन्नप्रतियोगि

जो॰ ताकत्वेनुपटत्वमवच्छिन्नत्वं प्रतियोगित्वं चेति त्रितयमपि विशेष्यविशेषणभावापन्नः संसर्गो ननु वस्तुगत्या
पटत्वावच्छिन्नं यत्प्रतियोगित्वं तन्मात्रं पटो नेत्यत्र पटत्वावच्छिन्नत्वस्याप्यनुभवसिद्धत्वात्· अन्यथा प्रतियोगि
ताव्यक्तिभिरेव तत्तद्विशिष्टबुद्ध्युपपत्तौ पटत्वादेस्तदवच्छेदकत्वमेव न स्यान्मानाभावात्· अत एव केवलान्व
यिग्रंथे वह्निर्नास्तीत्यत्र वह्नित्वं अवच्छिन्नत्वं प्रतियोगित्वं च संसर्गमर्यादया भासत इति स्वयमप्युक्तं· इ
त्यंच· प्रमेयं नास्ति कम्बुग्रीवादिमान्नास्तीत्यादिशाब्दबोधानां संसर्गकोटावेव प्रतियोगितायाः प्रमेयत्वाद्य
वच्छिन्नत्वावगाहित्वे तथा भ्रमत्वे संसर्गप्रकारसाधारण विशेषणविशेष्यभावस्यैव सर्वत्र भ्रमत्वादिघ
टकत्वात्· अन्यथा· स्वरूपसंबंधेन प्रमेयत्वाद्यवच्छिन्नप्रतियोगित्वस्यालीकतयाऽवंइतसंबंधेन
प्रमेयस्याभावधर्मिण्यन्वयासंभवेन भ्रमत्वानुपपत्तेः मद्रूपरागेणाप्यसत्यासंसर्गमर्यादया
भानस्यानंगीकारात्· क्लृप्तेन घटत्वाद्यवच्छिन्नप्रतियोगित्वसंबंधेन चाभावे प्रमेयस्यासत्वेन ताद
शसंबंधेन भ्रमत्वस्य वक्तुमशक्यत्वात्· घटत्वादेरन्वयितानवच्छेदकतया तदवच्छिन्नप्रतियोगि ॥६॥

त्वसंबंधेनप्रमेयत्वादिविशिष्टाभावेनिराकांक्षत्वाच्च.अतएवघटवत्यपिघटोनास्तीत्यादेः
प्रमाणत्वापत्तेःननुघटत्वावच्छिन्नप्रतियोगितासंबंधेनघटविशिष्टस्यघटविशेषाभावस्य
तत्रसत्वात्.एतेनसत्तासमवायिन्यपिगुणादौविशिष्टसत्तात्वावच्छिन्नस्यसमवायेनासत्व
वत्घटत्वाद्यवच्छिन्नप्रतियोगित्वसंबंधेनघटत्वाद्यवच्छिन्नवतोपिघटाद्यभावस्यननाहृ
शासंबंधेनप्रमेयत्वाद्यवच्छिन्नवत्वमतःप्र